(3 Books)

(2) Sankhya Tatta Kaumudi

(1) # SANKHYA SARA

(3) Tarka Sangraha - Sanskrit

A TREATISE ON

SANKHYA PHILOSOPHY

BY

VIJNANA BHIKSHU


EDITED AND PUBLISHED BY

PANDIT JIBANANDA VIDYASAGARA B. A.

Superintendent Free Sanskrit College.

No. 2 Ramanatha MaJumdar's Street Calcutta.

Baridbaran Mukerji
College of Law, Calcutta



CALCUTTA.

Printed at the Sarasu[illegible] Press,

1884.

THE RAMAKRISHNA MISSION INSTITUTE OF CULTURE
LIBRARY
CALCUTTA

be had from Pandit Jibananda Vidyasagara B. A.
Superintendent Free Sanskrit College, Calcutta.

एतानि मुद्रितसंस्कृतपुस्तकानि।

१	आशुबोध व्याकरणम्	२।°	
२	धातुरूपादर्शः	२	
३	शब्दस्तोम महानिधिः	१०	
४	सिद्धान्तकौमुदी सरलासहिता	।।	
५	सिद्धान्तबिन्दुसार (वेदान्त)	॥	
६	तुलादानादिपद्धतिः (यन्त्राक्षरैः	४	
७	गयाश्राद्धादिपद्धतिः	१	
८	शब्दार्थरत्नम्	॥°	
९	वाक्यमञ्जरी (यन्त्राक्षरैः)	।०	
१०	छन्दोमञ्जरी तथा छत्तरत्नाकर सटीक	॥/	
११	वेणीसंहार नाटक	१	
१२	मुद्राराक्षस नाटक सटीक	१॥	
१३	रत्नावली नाटिका सटीक	॥।	
१४	मालविकाग्निमित्र सटीक	१॥	
१५	धनञ्जय विजय सटीक	।	
१६	महावीरचरितनाटक	१॥	
१७	सङ्क्षिप्तचन्द्रकौमुदी सटीक	२	
१८	वैयाकरणभूषणसार	॥।	
१९	लीलावती	॥।	
२०	बीजगणित	१	
२१	शिशुपालबध सटीक(माघ)	४	
२२	किरातार्जुनीय सटीक	२॥	
२३	कुमारसम्भव पूर्वखण्ड सटीक	॥।	
२४	कुमारसम्भव उत्तरखण्ड	॥	
२५	अष्टकम् पाणिनीयम्	।॥।	
२६	वाचस्पत्यम् (बृहदभिधान)	१२	
२७	कादम्बरी सटीक	४	
२८	राजप्रशस्ति	/	
२९	अनुमानचिन्तामणि तथा अनुमानदीधिति		
३०	सर्वदर्शनसंग्रहः		
३१	भामिनीविलास सटीक		
३२	हितोपदेश सटीक		
३३	भाषापरिच्छेदमुक्तावली स		
३४	बहुविवाहवाद		
३५	दशकुमारचरित सटीक		
३६	परिभाषेन्दुशेखर		
३७	कविकल्पद्रुम धातुपाठः		
३८	चक्रदत्त (वैद्यक)		
३९	उणादिसूत्र सटीक		
४०	मेदिनीकोष		
४१	पञ्चतन्त्रम्		
४२	विद्वन्मोदतरङ्गिणी(चम्पूक		
४३	माधवचम्पू		
४४	तर्कसंग्रह		
४५	प्रसन्नराघव नाटक		
४६	विवेकचूड़ामणि		
४७	काव्यसंग्रह (सम्पूर्ण)		
४८	लिङ्गानुशासन सटीक		
४९	अलङ्कार सटीक		
५०	विक्रमोर्वशी (सटीक)		
५१	वसन्ततिलक भाष		
५२	गायत्री व्याख्या		
५३	सांख्यदर्शन (भाष्यसहित)		
५४	भोजप्रबन्ध		
५५	मलोदय सटीक		
५६	ईश केन कठ प्रश्न मुण्ड माण्डूक्य (सटीक सभाष्य)		
५७	छान्दोग्य सटीक सभाष्य		
५८	तैत्तिरीय ऐतरेय श्वेत उपनिषद् सभाष्य सटीक		

साङ्ख्यसारः


विज्ञानभिक्षुविरचितः

(3 Books)

वि, ए, उपाधिधारिणा

श्रीजीवानन्द-विद्यासागरभट्टाचार्येण

संस्कृतः प्रकाशितश्च ।



कलिकातानगर्य्यां

सरस्वतीयन्त्रे मुद्रितः ।

सं १८८३ ।

প্রিণ্টর শ্রীক্ষেত্রমোহন মুখোপাধ্যায়
নং ২০ ঝামাপুকুরলেন্
প্রকাশক শ্রীজীবানন্দবিদ্যাসাগর
২ নং রমানাথমজুম্দারেরষ্টিট্

R.M.I.C LIBRARY
Acc No 20617
Class No.
Date:
St Card ✓
Class. 891h
Cat. 891h
Bk.Card ✓
Checked 891h

साङ्ख्यसारः ।

पूर्वभागः ।

प्रथमः परिच्छेदः ।

महदाख्यः स्वयम्भूर्यो जगदङ्कुर ईश्वरः ।
सर्वात्मने नमस्तस्मै विष्णवे सर्वजिष्णवे ॥ १ ॥
साङ्ख्यकारिकया लेशादात्मतत्त्वं विवेचितम् ।
साङ्ख्यसारविवेकोऽतो विज्ञानेन प्रपञ्च्यते ॥ २ ॥
प्रायः सङ्कलिता साङ्ख्यप्रक्रिया कारिकागणे ।
साऽतोऽत्र वर्ण्यते लेशात् तदनुक्तांशमात्रतः ॥ ३ ॥
साङ्ख्यभाष्ये प्रकृत्यादेः स्वरूपं विस्तरान् मया ।
प्रोक्तं तस्मात् तदप्यत्र सङ्क्षेपादेव वक्ष्यते ॥ ४ ॥

आत्मानात्मविवेकसाक्षात्कारात् कर्तृत्वाद्यखिलाभिमाननिवृत्त्या तत्कार्यरागद्वेषधर्माधर्माद्यनुत्पादात् पूर्वोत्पन्नकर्मणां चाऽविद्यारागादिसहकार्युच्छेदरूपदाहेन विपाकानारम्भकत्वात् प्रारब्धसमाप्त्यनन्तरं पुनर्जन्माभावेन त्रिविधदुःखात्यन्तनिवृत्तिरूपो मोक्षो भवतीतिश्रुतिस्मृतिडिण्डिमः । तत्र श्रुतयः । अथाऽकामयमानो योऽकामो निष्कामो न तस्य प्राणा उत्क्रामन्तीहैव समवलीयन्ते ।

आत्मानं चेद् विजानीयादयमस्मीति पूरुषः ।

किमिच्छन् कस्य कामाय शरीरमनुसञ्ज्वरेत् ॥

{यदा सर्वे प्रमुच्यन्ते कामा येऽस्य हृदि स्थिताः ।
अथ मर्त्योऽमृतो भवत्यत्र ब्रह्म समश्नुते ॥

कामान् यः कामयते मन्यमानः
स कर्मभिर्जायते तत्र तत्र ।
पर्याप्तकामस्य कृतात्मनस्तु
इहैव सर्वे प्रविलीयन्ति कामाः ॥

इत्याद्याः । स्मृतयश्च कौर्माद्याः । यथा कौर्मे ।

रागद्वेषादयो दोषाः सर्वे भ्रान्तिनिबन्धनाः ।
कार्यो ह्यस्य भवेद् दोषः पुण्यापुण्यमिति श्रुतिः ॥
तदभावे सर्वेषां सर्वदेहसमुद्भवः ।

इति । मोक्षधर्मे च ।

इन्द्रियाणीन्द्रियार्थाश्च नोपसर्पन्त्यतर्षुलम् ।
हीनश्च करणैर्देही न देहं पुनरर्हति ॥

तस्मात् तर्षात्मकाद् रागाद् बीजाज् जायन्ति जन्तवः ।

इति । ननु रागाभावेऽपि केवलकर्मवशान् नरकादिप्राप्तेः कथं रागस्य कर्मसहकारित्वं विपाकारम्भ उपपन्नम् । नरकादौ विशेषतो रागाभावेऽपि सामान्यतो रागसत्त्वात् । निषिद्धस्त्र्यादिगामिनां स्त्र्यादिरागादेव तप्तलोहमयनारीसमालिङ्गनादिरूपनरकोत्पत्तेः । यद्यप्यविद्यास्मितारागद्वेषाभिनिवेशपञ्चकमेव जन्मादिविपाकारम्भे कर्मणां सहकारि भवति ।

तदेव सप्तकं कर्मेति
लिङ्गं मनो यत्र निषिक्तमस्य ।

इति श्रुतावभिमानरागद्वेषादिजन्यस्य विषयवासनाख्य-सङ्कसामान्यस्यैव जन्मादिविपाकारम्भे कर्मसहकारित्व-सिद्धेः।

यत्र यत्र मनो देही धारयेत् सकलं धिया।

स्नेहाद् द्वेषाद् भयाद् वाऽपि याति तत्तत्स्वरूपताम्॥

इत्यादिस्मृतेश्च। तथा च क्लेशमूलः कर्माशयः। सति मूले तद्विपाको जात्यायुर्भोगाः इति योगसूत्राभ्यामप्यदृष्टे तद्वि-पाकारम्भे च क्लेशानां हेतुत्ववचनाच्च। तथाऽप्यविद्या-स्मितासत्त्वे रागस्याऽऽवश्यकत्वाद् द्वेषभययोश्च रागमूल-कत्वाद् राग एव मुख्यतो जन्मादिहेतुतया यथोक्तवाक्यै-र्निर्दिश्यत इति। ननु।

क्षीयन्ते चाऽस्य कर्माणि तस्मिन् दृष्टे परावरे।

इत्यादिश्रुतेर्ज्ञानस्य प्राचीनकर्मनाशकत्वमेवोचितं दाहकत्वं कथमिष्यत इति चेन् न।

ज्ञानाग्निदग्धकर्माणं तमाहुः पण्डितं बुधाः।

इत्यादिवाक्यैर्दाहस्याऽपि श्रवणेन लाघवाद् दाहपरत्व-स्यैव नाशादिवाक्येष्वपि कल्पनौचित्यात्। कर्मणां दाहस्य क्लेशाख्यसहकार्युच्छेदेन नैष्फल्यम्। कर्मणां नाशस्तु प्रारब्धभोगान्ते चित्तनाशादेव भविष्यति। अतो लोक-सिद्धेनाऽविद्यानाशेनैव द्वारेण कर्मफलानुत्पत्तिसम्भवान् न ज्ञानस्य कर्मनाशकत्वं गौरवादित्यादिकं योगवार्त्तिके प्रपञ्चितमस्माभिरिति दिक्। तस्माद् विवेकसाक्षात्कारा-दविद्यास्मितारागादिक्लेशनिवृत्तौ त्रिविधदुःखात्यन्तनिवृ-त्तिरूपपरमपुरुषार्थः सिध्यतीत्युपपन्नम्। तथा च योग-

सूत्रद्वयम्। हेयं दुःखमनायतम्। विवेकख्यातिरविप्लवा हानोपाय इति।

इति श्रीविज्ञानभिक्षुविरचिते साङ्ख्यसारेऽभ्यर्हितत्वादादौ विवेकख्यातिफलस्य परमपुरुषार्थस्य परिच्छेदः।

अथ द्वितीयः परिच्छेदः।

अथाऽऽत्मानात्मविवेकज्ञानस्य किं स्वरूपं तदुच्यते। आत्मा तावत् सुखदुःखाद्यनुभवितेति सामान्यतो लोकप्रसिद्धिः अनात्मा च प्रकृत्यादिर्जडवर्गः तयोरन्योन्यवैधर्म्येण परिणामित्वापरिणामित्वादिरूपेण दोषगुणात्मकेन हेयोपादेयतया पृथक्त्वेन ज्ञानं विवेकज्ञानम्। तथा च श्रुतिः। स एष नेति नेत्यात्माऽगृह्यो न हि गृह्यतेऽशीर्यो न हि शीर्यतेऽसङ्गो न हि सज्यतेऽसितो न व्यथते न रिष्यतीत्यादि। स्मृतिश्च।

सोऽथ प्रतिनिवृत्ताक्षो गुरुदर्पणबोधितः।
स्वतोऽन्यां विक्रियां मौढ्यादास्थितामञ्जसेक्षत॥
अथाऽसौ प्रकृतिर्नाहमियं हि कलुषात्मिका।
शुद्धबुद्धस्वभावोऽहमिति त्यजति तां विदन्॥
एवं देहेन्द्रियादिभ्यः शुद्धत्वेनाऽऽत्मनि स्मृते।
निखिला सविकारेयं त्यक्तप्रायाऽहिचर्मवत्॥

इति। सूत्रं च। एवं तत्त्वाभ्यासान् नेति नेतीतित्यागाद् विवेकसिद्धिरिति। तत्त्वज्ञानस्य लक्षणं च मात्स्ये कृतम्।

अव्यक्ताद्ये विशेषान्ते विकारेऽस्मिंश्च वर्णिते।

चेतनाचेतनात्मवस्तुज्ञानेन ज्ञानमुच्यते ॥

इति। यद्यप्यन्योन्यभेदज्ञानमेव विवेकज्ञानं तथाऽप्यात्मविशेष्यकमेव तन्मोक्षकारणं भवति। आत्मा वाऽरे द्रष्टव्य इत्यादिश्रुतिस्मृतिभ्यः। नन्वनात्मन्यात्मबुद्धिरूपा याऽविद्या पातञ्जलादिभूता तस्याः कथमात्मविशेष्यकविवेकज्ञाननाश्यत्वं प्रकारादिभेदादिति चेन्न। तादृशाविद्याया अनात्मविशेष्यकविवेकज्ञानद्वारेणाऽऽत्मविशेष्यकविवेकज्ञाननाश्यत्वादिति। यच्च योगिन निर्विकल्पकमात्मज्ञानं जायते तद् विवेकज्ञानद्वारैव मोक्षकारणं भवति न तु साक्षादविद्यानिवर्तकत्वाभावात्। अहं गौरः कर्ता सुखी दुःखीत्यादिज्ञाननैव ह्यविद्या संसारानर्थहेतुतया श्रुतिस्मृतिन्यायसिद्धा तस्याश्च निवर्तिका नाऽहं गौर इत्यादिरूपा विवेकख्यातिरेव भवति। समाने विषये ग्राह्याभावत्वप्रकारकग्राह्याभावज्ञानत्वेनैव विरोधात्। अन्यथा शुक्तिनिर्विकल्पकस्याऽपि इदं रजतमिति ज्ञानविरोधित्वापत्तेः। किञ्च यथोक्ताभावज्ञाने ग्राह्यज्ञानविरोधित्वस्याऽऽवश्यकतया निर्विकल्पकज्ञानस्य भ्रमनिवर्तकत्वं न पृथक् कल्प्यते गौरवात्। अपि चाऽथाऽत आदेशो नेति नेति न ह्येतस्मादिति नेत्यन्यत् परमस्तीत्यादिश्रुत्या विवेकोपदेशापेक्षयोत्तमोपदेशो नाऽस्तीत्युच्यते।

क्षेत्रक्षेत्रज्ञयोरेवमन्तरं ज्ञानचक्षुषा।
भूतप्रकृतिमोक्षं च ये विदुर्यान्ति ते परम् ॥

इति गीतादिवाक्यैश्च विवेकज्ञानस्यैव मोक्षहेतुत्वमुच्यते।

अतो विवेकज्ञानमेव साक्षादविद्यानिहत्या मोक्षहेतुः।

योगेन केवलात्मसाक्षात्कारस्तु योग्यानुपलब्धिविधयोपाध्यादिगतधर्माभावमुपाध्यादिभेदं च ग्राहयति ततोऽविद्यानिवृत्तिरिति। एतेन सर्वभूतेषु समताज्ञानमात्मनः सर्वात्मकत्वादिज्ञानं च श्रुतिस्मृत्योर्गीयमानं विवेकज्ञानस्यैव शेषभूतं सवदर्शनेषु मन्तव्यम्। ज्ञानान्तराणां साक्षादभिमानानिवर्तकत्वात्। ब्रह्ममीमांसायां त्वयं विशेषो यत् परमात्मविवेकशेषत्वम्। साङ्ख्यशास्त्रे तु सामान्यात्मविवेकशेषत्वमिति दिक्। ननु यथोक्तविवेकख्यातितोऽप्यत्यन्तमविद्योच्छेदो न घटते। विवेकख्यातेरविद्याप्रतिबन्धकत्वमात्रत्वेन विवेकख्यातिनाशोत्तरं पुनरभिमानसम्भवात्। शुक्तिरजतविवेकदर्शिनोऽपि कालान्तरे शुक्तौ रजतभ्रमवदिति। मैवम्। दृष्टान्तवैषम्यात्। शुक्त्यादिषु जातेऽपि साक्षात्कारे दूरत्वादिरूपविषयदोषाणां पटलादिरूपकरणदोषाणां चोत्पत्तिसम्भवेन पुनर्भ्रमो युक्तः। अनात्मन्याभिमाने त्वनादिवासनैव दोषः सर्वास्तिकसम्मतः जातमात्रस्याऽभिमाने दोषान्तरानुपलब्धेः। सा मिथ्याज्ञानवासना यदा विवेकख्यातिपरम्पराजन्यदृढ़वासनोन्मूलिता तदैव विवेकसाक्षात्कारनिष्ठोच्यते। तत्पूर्वमवश्यं वासनालेशतो मिथ्यांशस्य कस्याऽप्यात्मनि भावात् तस्यां च विवेकख्यातिनिष्ठायां जातायां न पुनरभिमानः सम्भवति वासनाख्यदोषाभावादिति तु महद् वैषम्यम्। यदि तु बुद्धिपुरुषयोरन्योन्यप्रतिबिम्बनादिकमविवेककारणं दोष इष्यते तदा तु तद्दोषं बाधित्वैव विवेकसाक्षात्कार उदित इति न तस्य पुनर्भ्रमहेतुत्वं फलबलेन योगजधर्मसहक-

तस्यैव तस्य दोषत्वकल्पनासम्भवादिति । विवेकख्याति-
निष्ठा च गीतादिषु लक्षिता ।

प्रकाशं च प्रवृत्तिं च मोहमेव च पाण्डव ! ।
न द्वेष्टि सम्प्रवृत्तानि न निवृत्तानि काङ्क्षति ॥
उदासीनवदासीनो गुणैर्यो न विचाल्यते ।
सर्वारम्भपरित्यागी गुणातीतः स उच्यते ॥

इति (गुणातीतो" निवृत्तगुणाभिमानः) अधिकं तु ज्ञान-
लक्षणमग्रे वक्ष्यामः । नन्वेवमपि विवेकप्रतियोगिपदा-
र्थानामानन्त्येन प्रातिस्विकरूपैः सर्वपदार्थेभ्यो विवेकग्रहा-
सम्भवात् कथं विवेकख्यातेर्मोक्षहेतुत्वमिति चेन् न । दृश्य-
त्वपरिणामित्वादिसामान्यरूपैर्विवेकग्रहसम्भवात् । तथा
हि । द्रष्टा स्वसाक्षात्प्रकाश्येभ्यो भिन्नः प्रकाशकत्वाद् यो
यस्य प्रकाशकः स तस्माद् भिन्नः यथा वटादालोकी वृत्ति-
प्रकाश्याच् च वृत्तिरित्यनुमानेनाऽऽदावन्तर्दृश्येभ्यो बुद्धि-
वृत्तितदारूढार्थेभ्यो विवेकतो बुद्धिसाक्षी सिध्यति । कर्म-
कर्तृविरोधश्चाऽनुकूलस्तर्कः । अत्र आत्मनि व्यभिचारवार-
णाय साक्षात्पदम् वृत्तिद्वारैवाऽऽत्मनः स्वविषयत्वात् ।
नन्वत्राऽनुमाने बुद्धिवृत्तिमात्राद् विवेकः सिध्यतु । तस्या
एव साक्षादात्मदृश्यत्वात् न प्रकृत्यादिभ्य इति चेन् न
वृत्तीनामज्ञातसत्त्वाभावेन ह्यत्राऽनुमाने लाघवाद् वक्ष्य-
माणतर्कगणाच् चाऽखिलवृत्तीनां द्रष्टा विभुकूटस्थनि-
त्यैकज्ञानस्वरूपतयैव सिध्यति । यथा नैयायिकानां चितिः
सकर्तृका कार्यत्वादित्यनुमाने लाघवात् कर्तुरेकत्वमित्य-
त्वादिकं तद्वत् । तत्र विभुत्वं परिच्छिन्नभिन्नत्वं कूटस्थत्वा-

दिकलं च परिणामिभिन्नत्वादिकमतो बुद्ध्याद्यनीहं ग्-दृश्यरूपतो विवेकग्रहे सति तदुत्तरानुमानेन परिणामित्वा-परिणामित्वादिरूपैः सामान्यतोऽप्यात्मानात्मविवेकग्रहो घटत इति। अतएव पातञ्जले सत्त्वपुरुषान्यताख्यातिरेव मोक्षहेतुतया स्थले स्थले व्यासभाष्ये प्रोक्ता। सत्त्वपुरुषा-न्यताख्यातिरूपदृग्दृश्यविवेकग्रहोत्तरं यथोक्तरीत्या प्रकृत्या-दिविवेकग्रहात्। तत्र च सत्त्वशब्दे बुद्धिस्थत्वेन बुद्धिसत्त्व-मुक्तमिति। एवं च प्रकृत्यादिपदार्थानां विशिष्यज्ञानाभा-वेऽपि तद्विवेकज्ञानं घटते। एतेन दृग्दृश्यविवेकाद्विद्या-निवृत्तिरिति प्राचां प्रवादोऽप्युपपादितः। किञ्चाऽऽत्मा प्रकृतितत्कार्येभ्यो भिन्नोऽपरिणामित्वादित्याद्यनुमानैरपि सामान्यतो दृश्यविवेको द्रष्टरि सम्भवतीति। यत् त्वाधु-निका वेदान्तिम्मुवा दृश्यत्वेनैव प्रकृत्यादीनां द्रष्टृत्वेन च प्रकृत्याद्यखिलजडेभ्य आत्मविवेकं मन्यन्ते।

घटद्रष्टा घटाद्भिन्नः सर्वथा न घटो यथा।
देहद्रष्टा तथा देहो नाऽहमित्यादिरूपतः॥

तन् न। आत्मा वाऽरे द्रष्टव्य इत्यादिश्रुतिभिरात्मनोऽपि दृश्यत्वात् साक्षाद् दृश्यत्वविवक्षया च प्रकृत्यादेरसङ्ग्रहात् करणद्वारैव तदर्थनात्। अथैवं कल्पनीयं आत्मनो वृत्तिः, व्याप्यत्वमेव दृश्यत्वं श्रुत्यादिभिर्विधीयते न तु प्रकाश्यत्व-रूपफलव्याप्यत्वम्। स्वयम्प्रकाशस्वरूपस्य प्रकाशापेक्षाविर-हात्। अतोऽत्र दृश्यत्वं प्रकाश्यत्वं तच् चाऽऽत्मनि नाऽस्तीति तदपि तुच्छम्। यथा ह्यहमित्यनुभूयमानोऽप्यात्मा चैतन्याख्यफलव्याप्यो न भवतीति भवद्भिरुच्यते तथैव

बौद्धैरपीष्यते सुखदुःखादिमत्त्वेनाऽपि बुद्धिः स्वप्रकाशतया चैतन्यव्याप्या न भवतीति । तथा चाऽऽत्मनोऽपि बुद्धावपि दृश्यत्वासिद्धया दृश्यत्वेन रूपेण बुद्धिविवेकोऽत्यन्तापेक्षितोऽपि न सिध्यतीति भाष्यादिषु चाऽन्यान्यत्र दूषणान्युक्तानीति दिक् । ननु सम्भवत्येवं सामान्यरूपेण विवेकग्रहः । तथाऽपि सामान्यान्येव बहूनि सन्ति परिणामित्वसंहत्यकारित्वसुखदुःखमोहात्मकत्वचतुर्विंशतितत्त्वत्वादीन्यतस्तैस्तै रूपैर्विवेकग्रहाणां मोक्षहेतुत्वेऽननुगमदोष इति चेन् न । अभिमानप्रतिबन्धकत्वागत्वे नैवाऽनुगमादिति । अथैवं सामान्यरूपेण विवेकस्यैव सर्वाभिमाननिवर्तकतया नाऽहं देहो नेन्द्रियाणीत्यादिप्रत्येकरूपैर्विवेकग्रहाणां मोक्षहेतुत्वं श्रुतिस्मृत्योरुच्यमानं कथं घटेतेति चेन् न । अवान्तरविवेकानां सामान्यविवेकप्रपञ्चमात्रत्वादिति ।

इति श्रीविज्ञानभिक्षुविरचिते सांख्यसारे मोक्षहेतुविवेकज्ञानस्य स्वरूपस्य परिच्छेदः ।

अथ तृतीयः परिच्छेदः ।

अथ के ते प्रकृत्यादयो येभ्यः पुरुषो विवेचनीय इत्युच्यते ।

प्रकृतिर्महदहङ्कारौ तन्मात्रैकादशेन्द्रियम् ।
भूतानि चेति सामान्यात् चतुर्विंशतिरेव ते ॥

एतेष्वेव धर्मधर्म्यभेदेन गुणकर्मसामान्यानामन्तर्भावः ।
तत्र प्रकृतित्वं साक्षात् परम्परयाऽखिलविकारोपादानत्वं

प्रकृष्टा कृतिः परिणामरूपाऽस्या इति व्युत्पत्तेः। प्रकृतिः मतिरजा प्रधानमव्यक्तं तमो माया विद्येत्यादयः प्रकृतेः पर्यायाः।

आप्तौति विद्याऽविद्येति मायेति च तथा परे।
प्रकृतिश्च परा चेति वदन्ति परमर्षयः॥

इति स्मृतेः। सा च साम्यावस्थयोपलक्षितं सत्त्वादिद्रव्यत्रयम्। कार्यसत्त्वादिवारणायोपलक्षितात्मम्। साम्यावस्था च न्यूनाधिकभावेनाऽसंहननावस्था अकार्यावस्थेति यावत्। महदादिकं तु कार्यसत्त्वादिकं न कदाऽप्यकार्यावस्थं भवतीति तद्व्यावृत्तिः। वैषम्यावस्थायामपि प्रकृतित्वसिद्धय उपलक्षितमित्युक्तम्। "अकार्यमिति तूपलक्षितात्मस्य निष्कृष्टार्थः। सत्त्वादिगुणवती सत्त्वाद्यतिरिक्ता प्रकृतिरिति न शङ्कनीयम्। सत्त्वादीनामतद्धर्मत्वं तद्रूपत्वादिति साङ्ख्यसूत्रेण सत्त्वादीनां प्रकृतिस्वरूपत्वहेतुना प्रकृतिधर्मत्वप्रतिषेधात्। योगसूत्रतद्भाष्याभ्यामपि गुणानामेव प्रकृतित्ववचनाच् च। गुणेभ्य एव कार्योत्पत्तौ तदन्यप्रकृतिकल्पनावैयर्थ्याच् च। प्रकृतेर्गुणा इत्यादिवाक्यं तु वनस्य वृक्षा इतिवद् बोध्यम्।

सत्त्वं रजस्तम इति प्रकृतेरभवन् गुणाः।

इति सत्त्वादीनां प्रकृतिकार्यत्ववचनं तु गुणनित्यतावाक्यविरोधेन महत्तत्त्वकारणीभूतकार्यसत्त्वादिपरमेव। महदादिसृष्टिर्हि गुणवैषम्यात् श्रूयते। तच्च वैषम्यं सजातीयबलवलनेन गुणान्तरव्याहृतप्रकाशादिफलोपहितः सत्त्वादिव्यवहारयोग्यः परिणाम इति। एतेनाऽष्टाविंशतितत्त्व-

पचोऽप्युपपादितो मन्तव्यः । वैकल्प एव सत्त्वादित्रयवहा-
रश्च श्रुतौ दृश्यते । यथा तम एवेदमग्र आस तत्परेणेरितं
विषमत्वं प्रयात्येतद् वै रजसो रूपं तद्रजः खल्वोरितं
विषमत्वं प्रयात्येतद् वै सत्त्वस्य रूपमिति । सत्त्वादित्रयं
च सुखप्रकाशलाघवप्रसादादिगुणवत्तया संयोगविभागा-
दिमत्तयाऽऽश्रितत्वोपादानत्वादिना च द्रव्यत्वेऽपि पुरु-
षोपकरणत्वात् पुरुषबन्धकत्वाच्च गुणशब्देनोच्यते ।
इन्द्रियादिवत् । गुणानां सुखदुःखमोहात्मकत्वप्रवादस्तु
धर्मधर्म्यभेदात् । मनसः संङ्कल्पात्मकत्ववत् । तत्र सत्त्वं
सुखप्रसादप्रकाशाद्यनेकधर्मकं प्राधान्यतस्तु सुखात्मकमु-
च्यते एवं रजोऽपि दुःखकालुष्यप्रवृत्त्याद्यनेकधर्मकं प्राधा-
न्यतस्तु दुःखात्मकमुच्यते । तथा तमोऽपि मोहावरणस्तम्भ-
नाद्यनेकधर्मकं प्राधान्यतस्तु मोहात्मकमुच्यते । त एव ध-
र्मास्तेषां लक्षणानि भवन्ति । सत्त्वादिसञ्ज्ञा चाऽन्वर्था ।
सतो भावः सत्त्वमुत्तमत्वमिति व्युत्पत्त्या हि धर्मप्राधान्ये-
नोत्तमं पुरुषोपकरणं सत्त्वशब्दार्थः । मध्यमं च रजःशब्दार्थो
रागयोगात् । अधमं च तमःशब्दार्थः । अधर्मावरणयोगात् ।
तानि च सत्त्वादीनि प्रत्येकमसङ्ख्यव्यक्तयः । लघुत्वादिध-
र्मैरन्योन्यसाधर्म्यं वैधर्म्यं च गुणानामिति साङ्ख्यसूत्रात् ।
अत्र हि सूत्रे लघुत्वादिना बहूनां सत्त्वानां साधर्म्यं तेनैव
रजस्तमोभ्यां वैधर्म्यम् । एवं चलत्वादिना गुरुत्वादिना च
बहूनां रजसां बहूनां च तमसां तदुभयमुक्तमिति । किञ्च
यदि सत्त्वादित्रयमेकैकव्यक्तिरेव स्यात् तत् त्रयं विश्वमेव
वक्तव्यम् । एकदानेकब्रह्माण्डादिसृष्टिश्रवणात् । तथा च

कार्याणामनन्तवैचित्र्यं न घटते । न च संयोगवैचित्र्याद् वैचित्र्यं स्यादिति वाच्यम् । विभूनां तेषां गुणानां स्वतः संयोगवैचित्र्यासम्भवात् । द्रव्यान्तरस्य चाऽवच्छेदकीभूतस्याऽभावादिति । तस्मात् सत्त्वादोन्यसङ्ख्यव्यक्तिकान्येव द्रव्याणि । तेषु त्रित्ववचनं तु सत्त्वत्वादिविभाजकोपाधित्रयेण वैशेषिकाणां नवद्रव्यवचनवदिति सिद्धम् । तानि च सत्त्वादीनि यथायोग्यमणुविभुपरिमाणकानि । अन्यथा रजसश्चलस्वभावत्ववचनविरोधात् । आकाशकारणत्वस्य च विभुत्वौचित्यात् । सर्वेषां कारणद्रव्याणां विभुत्वे कार्याणां परिच्छिन्नत्वानुपपत्तेश्च । नन्वेवं वैशेषिकोक्तान्येव पार्थिवाखादीनि प्रकृतिरित्यायातमिति चेन्न । गन्धादिगुणशून्यत्वेन कारणद्रव्येषु पृथिवीत्वाद्यभावतोऽस्माकं विशेषात् । तदुक्तं विष्णुपुराणादिषु ।

अव्यक्तं कारणं यत् तत् प्रधानमृषिसत्तमैः ।
प्रोच्यते प्रकृतिः सूक्ष्मा नित्यं सदसदात्मकम् ॥
शब्दस्पर्शविहीनं तद् रूपादिभिरसंयुतम् ।
त्रिगुणं तज् जगद्योनिरनादिप्रभवाप्ययम् ॥

इत्यादिना ।

वैशेषिकाणां कारणद्रव्येषु गन्धाद्यनुमानं तु भाष्येऽस्माभिर्निराकृतम् । अथैवमपि प्रकृतेरणुविभुसाधारणसत्त्वार्थैकव्यक्तिरूपत्वेऽपरिच्छिन्नत्वैकत्वाक्रियत्वसिद्धान्तक्षतिरिति चेन्मैवम् । कारणद्रव्यस्वरूपप्रकृतित्वेनैवाऽपरिच्छिन्नत्ववचनात् । मध्यत्वेन गन्धानां पृथिवीव्यापकतावत् । आकाशादिप्रकृतीनां विभुत्वेनैव प्रकृतिविभुत्वसिद्धान्तोपपत्तेश्च ।

तथा पुरुषभेदेन सर्गभेदेन च भेदाभावस्यैवैकशब्दार्थत्वात् । अजामेकामिति श्रुतिस्तथाऽवगमात् । अथाऽध्यवसायाभिमानादिक्रियाराहित्यस्यैवाऽक्रियशब्दार्थत्वात् । अन्यथा श्रुतिस्मृतिषूक्तस्य प्रकृतित्वोभयत्वाऽनुपपत्तेरिति । प्रकृतिगताश्चाऽपरे विशेषा भाष्ये द्रष्टव्याः । प्रकृत्यनुमानं चेदम् । सुखदुःखमोहात्मकं महदादिकार्यं सुखदुःखमोहात्मकद्रव्यकार्यं सुखदुःखमोहात्मकत्वात् वस्त्रादिकार्यशय्यादिवदिति । श्रुतिस्मृती चाऽत्राऽनुग्राहकस्तर्कः । एवं सामान्यतोऽनुमितायाः प्रकृतेर्विशेषाः ग्राह्यात् योगाच्चाऽवगन्तव्याः अनुमानस्य सामान्यमात्रविषयकत्वात् । नन्वन्तरेव सुखादिकमुपलभ्यते बाह्यवस्तुषु सुखादौ किं प्रमाणं येन दृष्टान्तता स्यादिति । उच्यते । अन्तःकरणस्य सुखादिहेतुतया विषयेषु सुखादिकं सिध्यति । न च रूपादिगतोत्तमत्वादिकमेव सुखाद्युत्पादने नियामकम् उत्तमत्वादेर्जातिरूपत्वे नीलत्वपीतत्वादिना जातिसाङ्कर्यापत्तेः । कालादिभेदैरेकस्या एव रूपव्यक्तेः सुखदुःखोत्पादकत्वाच्च । अतः सुखादिमत्त्वमेवोत्तमत्वादिकम् । किञ्च घटरूपमिति प्रत्ययवत् स्त्रीसुखं चन्दनसुखमित्यादिप्रत्ययादपि विषये सुखाद्युचितम् । अधिकं तु भाष्ये द्रष्टव्यम् । तदेवं प्रकृतिर्निरूपिता । महत्तत्त्वं निरूप्यते । प्रकृतेः सकाशाद् बुद्ध्याख्यं महत्तत्त्वं जायते । तस्य धर्मादिरूपप्रकृष्टगुणयोगान् महत्तत्त्वज्ञा तदेव च लक्षणम् । महान् बुद्धिः प्रज्ञेत्यादयश्च तस्य पर्यायाः । तथा चोक्तमनुगीतायाम् ।

महानात्मा मतिर्विष्णुर्जिष्णुः सम्भुश्च वीर्यवान् ।

बुद्धिः प्रज्ञोपलब्धिश्च तथा ब्रह्मा धृतिः स्मृतिः ॥
पर्यायवाचकैरेतैर्महानात्मा निगद्यते ।
सर्वतः पाणिपादश्च सर्वतोऽक्षिशिरोमुखः ॥
सर्वतः श्रुतिमांल्लोके सर्वं व्याप्य स तिष्ठति ।
अणिमा लघिमा प्राप्तिरीशानो ज्योतिरव्ययः ॥
ज्ञानवन्तश्च ये केचिदलुब्धा जितमन्यवः ।
विमुक्ताः सर्व एवैते महत्त्वमुपयान्त्युत ॥
विष्णुरेवाऽऽदिसर्गेषु स्वयम्भूर्भवति प्रभुः ॥

इति । अत्र सत्त्वाद्यंशत्रयेण महतो देवतात्रयोपाधित्वात् तद्विवेकेन ब्रह्मविष्णुशिवत्ववचनम् । तदुक्तं विष्णौ—

सात्त्विको राजसश्चैव तामसश्च त्रिधा महान् ।

इति । मात्स्ये च ।—

सविकारात् प्रधानात् तु महत्तत्त्वमजायत ।
महानिति यतः ख्यातिर्लोकानां जायते सदा ॥
गुणेभ्यः क्षोभ्यमाणेभ्यस्त्रयो देवा विजज्ञिरे ।
एका मूर्तिस्त्रयो देवा ब्रह्मविष्णुमहेश्वराः ॥

इति । अणिमेत्यादिभावनिर्देशो धर्मधर्म्यभेदात् । ब्रह्मरुद्रोपेन्द्रयाऽप्यादौ विष्णुरूपेणैव महानाविर्भवतीति विष्णुरेवेत्यर्द्धेनोक्तम् । इदमेव महत्तत्त्वमंशतो रजस्तमःसम्भेदेन परिणतं सद् व्यष्टिजीवानामुपाधिधर्मादियुक्तं क्षुद्रमपि भवति महदुपरागाद् विपरीतमिति साङ्ख्यसूत्रात् । महत्तत्त्वस्य प्राधान्येनाऽसाधारण्येन चाऽध्यवसायो वृत्तिः महदहङ्कारमनस्तितयात्मकस्यान्तःकरणस्य महत्तत्त्वं बीजावस्थेति । अत्र प्रकृतेर्महान् महतोऽहङ्कार इत्यादिसृष्टिक्रमे

शास्त्रमेव प्रमाणम् । अनुमानेन सामान्यतः कार्याणां सकारणकत्वमात्रसिद्धेः न तु सृष्टौ भूतादिक्रमो वाऽन्तः करणादिक्रमो वेत्येकतरावधारकमनुमानं सम्भवति । सृष्टिलङ्गाभावात् । श्रुतिस्मृत्यनुगृहीतं यथाकथञ्चिल्लिङ्गं तु महदादिक्रमेऽस्तीति भाष्येऽस्माभिः प्रदर्शितम् । महत्तत्त्वं निरूपितम् । अहङ्कारो निरूप्यते । महत्तत्त्वादहङ्कार उत्पद्यते अङ्कुरात् शाखावत् । तस्य चाऽभिमानिकत्वादहङ्कारसञ्ज्ञा कुम्भकारसञ्ज्ञावत् । तदेव लक्षणम् । तस्य च पर्यायाः कौर्मे प्रोक्ताः ।

अहङ्कारोऽभिमानश्च कर्ता मन्ता च संस्मृतः ।
आत्मा देही च जीवो यत्नः सर्वाः प्रवृत्तयः ॥

इति । स चाऽहङ्कारस्त्रिविधतया त्रिविधकार्यहेतुः । तदुक्तं कौर्मे ।

वैकारिकस्तैजसश्च भूतादिश्चैव तामसः ।
त्रिविधोऽयमहङ्कारो महतः सम्बभूव ह ॥
तैजसादिन्द्रियाणि स्युर्देवा वैकारिकाद् दश ।
एकादशं मनश्चाऽत्र स्वगुणेनोभयात्मकम् ॥
भूतसन्मात्रसर्गस्तु भूतादेरभवन् प्रजाः ।

इति । वैकारिकः सात्त्विकः । तैजसो राजसः । स्वगुणेन्द्रियवृत्तिषु साहाय्यरूपेणोत्कर्षेण । उभयात्मकं ज्ञानकर्मेभयेन्द्रियात्मकम् । अन्यत्रमना अभूवं नाऽश्रौषमित्यादिश्रुत्या मनसो ज्ञानकर्मेभयेन्द्रियसहकारित्वसिद्धेरिति । (एकादशेन्द्रियदेवाश्च)

दिग्वातार्कप्रचेतोऽश्विवह्नीन्द्रोपेन्द्रमित्रकाः ।

अनुवाद

इति । अहङ्कारो निरूपितः । इन्द्रियादीनि निरूप्यन्ते ।
अहङ्कारादादौ मन उत्पद्यते ।

शब्दरागाच्छ्रोत्रमस्य जायते भावितात्मनः ।
रूपरागात् तथा चक्षुर्घ्राणं गन्धजिघृक्षया ॥

इत्यादिना मोक्षधर्मादाविन्द्रियादीनां मनोवृत्तिरागादि-कार्यत्वश्रवणात्। ततश्चाऽहङ्कारात् सङ्कल्पपूर्वकं दशेन्द्रियाणि पञ्चतन्मात्राणि चोत्पद्यन्ते । इन्द्रियतन्मात्रयोश्च कार्यकारणभावस्याऽभावात् क्रमनियमो नाऽस्ति । तत्रेन्द्रियेषु नाऽस्त्यवान्तरकार्यकारणभावः प्रमाणाभावात्। तन्मात्रेषु त्वस्ति । स यथा। शब्दतन्मात्रात् वक्ष्यमाणक्रमेण स्पर्शतन्मात्रं शब्दस्पर्शोभयगुणकमेवं क्रमेणैकैकगुणवृद्धया परतन्मात्रत्रयं पूर्वपूर्वतन्मात्रेभ्य उत्पद्यते पातञ्जलभाष्ये तन्मात्रेषु क्रमेणैकैकगुणवृद्धिवचनात्। ततश्च पञ्चतन्मात्रेभ्यः पञ्चभूतानि जायन्ते । तत्राऽहङ्कारात् पञ्चतन्मात्राणां तद्द्वारा भूतानां चोत्पत्तौ क्रमः कूर्मविष्णुादिपुराणेषूक्तः यथा कूर्मे।

भूतादिस्तु विकुर्वाणः शब्दमात्रं ससर्ज ह ।
आकाशं सुषिरं तस्मादुत्पन्नं शब्दलक्षणम् ॥
आकाशस्तु विकुर्वाणः स्पर्शमात्रं ससर्ज ह ।
वायुरुत्पद्यते तस्मात् तस्य स्पर्शो गुणो मतः ॥

इत्यादिक्रमेणेति । नन्वेवमाकाशादिभूतचतुष्टयस्याऽपि तत्त्वान्तरारम्भकत्वेन प्रकृतित्वापत्त्या केवलविकृतित्वसिद्धान्तक्षतिरिति चेन्न आकाशादीनां स्पर्शादितन्मा-

त्वेष्वहङ्कारोपष्टम्भमात्रेण कारणत्वस्य पुराणेषूक्तत्वादि-
ति । तदेवं त्रयोविंशतितत्त्वानामुत्पत्तिरुक्ता । तत्र पञ्च-
भूतानि वर्जयित्वाऽहङ्कारं च बुद्धौ प्रवेश्य समुदायकं लिङ्ग-
शरीरसञ्ज्ञं भवति वक्ष्यमाणवदात्मनोऽभिव्यक्तिस्थान-
त्वात् । तच्च सर्वपुरुषाणां सर्गादावुत्पद्य प्राक्तनप्रलय-
पर्यन्तं तिष्ठति । तेनैव चेहलोकपरलोकयोः संसरणं
जीवानां भवति । प्राणश्च बुद्धेरेव वृत्तिभेद इत्यतो न
लिङ्गशरीरात् पृथङ् निर्दिश्यते । तस्य लिङ्गशरीरस्य सूक्ष्मा-
णि पञ्च भूतान्याश्रयश्चित्रादिवदाश्रयं विना परमसूक्ष्मस्य
लोकान्तरगमनासम्भवात् । इदं च लिङ्गशरीरमादौ स्व-
म्भव उपाधिभूतमेकमेव जायते । तस्यैव विराडाख्यवच्य-
माणस्थूलशरीरवत् । ततश्च व्यष्टिजीवानामुपाधिभूतानि
व्यष्टिलिङ्गशरीराणि तदंशभूतानि ततो विभज्यन्ते ।
पितुर्लिङ्गशरीरात् पुत्रलिङ्गशरीरवत् । तदुक्तं सूत्रकारेण
"व्यष्टिभेदः कर्मविशेषादिति" । मनुनाऽप्युक्तम् ।

तेषां त्ववयवान् सूक्ष्मान् षण्णामप्यमितौजसाम् ।
सन्निवेश्याऽऽत्ममात्रासु सर्वभूतानि निर्ममे ॥

इति । षण्णामिति षडिन्द्रियं समस्तलिङ्गशरीरोपलक्षकम् ।
"तथा च स्वयम्भूः स्वलिङ्गशरीरावयवान् सूक्ष्मान् अल्पान्
आत्ममात्रासु स्वांशचेतनेषु संयोज्य सर्वप्राणिनः ससर्जे-
त्यर्थः । लिङ्गशरीरं निरूपितम् । स्थूलशरीरोत्पत्तिरुच्य-
ते । दशगुणितेमहत्तत्त्वमध्येऽहङ्कारोऽहङ्कारस्योऽपि दश-
गुणितस्य मध्ये व्योम व्योम्नोऽपि दशगुणितस्य मध्ये
वायुर्वायोरपि दशगुणितस्य मध्ये तेजः तेजसोऽपि दश-

गुणितस्य मध्ये जलं जलस्याऽपि दशगुणितस्य मध्ये पृथिवी समुत्पद्यते। सैव स्थूलशरीरस्य बीजम्। तदेव च पृथिवीरूपं बीजमण्डरूपेण परिणमते। तस्याऽपि दशगुणितस्याऽण्डरूपस्य पृथिव्यावरणस्य मध्ये चतुर्दशभुवनात्मकं स्वयम्भुवः स्थूलशरीरं तत्सङ्कल्पादेवोत्पद्यते। तेनैव शरीरेण स्वयम्भूर्नारायण इत्युच्यते। तदुक्तं मनुना स्वयम्भुवं प्रकृत्य।

सोऽभिध्याय शरीरात् स्वात् सिसृक्षुर्विविधाः प्रजाः।
अप एव ससर्जाऽऽदौ तासु वीजमवासृजत्॥
तदण्डमभवद्धैमं सहस्रांशुसमप्रभम्।
तस्मिन जज्ञे स्वयं ब्रह्मा सर्वलोकपितामहः॥
स वै शरीरी प्रथमः स वै पुरुष उच्यते।
आदिकर्ता स भूतानां ब्रह्माऽग्रे समवर्तत॥
आपो नारा इति प्रोक्ता आपो वै नरसूनवः।
ता यदस्याऽयनं पूर्वं तेन नारायणः स्मृतः॥

इत्यादिनेति। तत एव चाऽऽदिपुरुषात् व्यष्टिपुरुषाणां विभागादन्ते च तत्रैव लयात् स एव चैक आत्मेति श्रुतिस्मृत्योर्व्यवस्थियते। अतो न व्यवहारपरतया नारायण एव सर्वभूतानामात्मेति श्रुतिस्मृतिविरोध इति। ततश्च स नारायणो विराट्शरीरो स्वनाभिकमलकर्णिकास्थानीयस्य सुमेरोरुपरि चतुर्मुखाख्यस्वयम्भुवं सृष्ट्वा तद्वराऽन्यानपि व्यष्टिशरीरिणः स्थावरान्तान् ससर्ज। तथा च स्मर्यते।

तच्छरीरसमुत्पन्नैः कार्यैस्तैः करणैः सह।
क्षेत्रज्ञाः समजायन्त गात्रेभ्यस्तस्य धीमतः॥

इति । यत् तु शेषशायिनो नारायणस्य नाभिकमलस्रोत-
चतुरादिभ्यश्चतुर्मुखस्याऽऽविर्भावः श्रूयते तद् दैनन्दिन-
सर्गेष्वेव कल्पभेदेन मन्तव्यम् । दैनन्दिनप्रलयेष्वेव हि
नारायणशरीरे प्रविश्यैकीभूय सुप्तानां देवातां चतुर्मुखा-
दिक्रमेणाऽऽविर्भावः शेषशायिनः सकाशाद् घटते न
त्वादिसर्गेषु । दैनन्दिनप्रलय एव लीलाविग्रहेण शयना-
दिति । तदेवं सङ्क्षिपतश्चतुर्विंशतितत्त्वानि तेषां सृष्टिरूपं
प्रयोजनं चोक्तम् । तत्र यद् यस्माज् जायते तस्य तदापू-
रणेनैव स्थितिः ततस्तस्य संहारोऽपि तत्रैव भवति ।

{यद् यस्माज् जायते तत्त्वं तत् तत्र प्रविलीयते ।
लीयन्ते प्रतिलोमानि जायन्ते चोत्तरोत्तरम् ॥}

इति भारतादिभ्य इति । एते च सृष्टिस्थितिसंहाररूपाः
स्थूला एव परिणामाश्चतुर्विंशतितत्त्वानां कूटस्थपुरुष-
विवेकाय प्रदर्शिताः । सूक्ष्मा अप्यन्ये प्रतिक्षणपरिणामा
एतेषां स्मर्यन्ते । तथा ।

नित्यदा ह्यङ्गभूतानि भवन्ति न भवन्ति च ।
कालेनाऽलक्ष्यवेगेन सूक्ष्मत्वात् तन्न दृश्यते ॥

इति । अतश्च सर्वं जडवस्तु परमार्थतः सर्वदैवाऽसदुच्यते ।
ततश्च तस्माद् विरज्याऽऽत्मैव परमार्थसत्यो दुःखभीरुभि-
र्द्रष्टव्यः । तदुक्तमनुगीतायाम् ।

अव्यक्तबीजप्रभवो बुद्धिस्कन्धमयो महान् ।
महाहङ्कारविटप इन्द्रियाङ्कुरकोटरः ॥
महाभूतप्रशाखश्च विशेषप्रतिशाखवान् ।
सद्वापर्णः सदापुष्पः शुभाशुभफलोदयः ॥

गुणितस्य मध्ये जलं जलस्याऽपि दशगुणितस्य मध्ये पृथिवी समुत्पद्यते। सैव स्थूलशरीरस्य बीजम्। तदेव च पृथिवीरूपं बीजमण्डरूपेण परिणमते। तस्याऽपि दशगुणितस्याऽण्डरूपस्य पृथिव्यावरणस्य मध्ये चतुर्दशभुवनात्मकं स्वयम्भुवः स्थूलशरीरं तत्सङ्कल्पादेवोत्पद्यते। तेनैव शरीरेण स्वयम्भूर्नारायण इत्युच्यते। तदुक्तं मनुना स्वयम्भुवं प्रकृत्य।

सोऽभिध्याय शरीरात् स्वात् सिसृक्षुर्विविधाः प्रजाः।
अप एव ससर्जाऽऽदौ तासु बीजमवासृजत्॥
तदण्डमभवद्धैमं सहस्रांशुसमप्रभम्।
तस्मिन जज्ञे स्वयं ब्रह्मा सर्वलोकपितामहः॥
स वै शरीरी प्रथमः स वै पुरुष उच्यते।
आदिकर्ता स भूतानां ब्रह्माऽग्रे समवर्तत॥
आपो नारा इति प्रोक्ता आपो वै नरसूनवः।
ता यदस्याऽयनं पूर्वं तेन नारायणः स्मृतः॥

इत्यादिनेति। तत एव चाऽऽदिपुरुषात् व्यष्टिपुरुषाणां विभागादन्ते च तत्रैव लयात् स एव चैक आत्मेति श्रुतिस्मृत्योर्व्यवक्रियते। अतो न व्यवहारपरतया नारायण एव सर्वभूतानामात्मेति श्रुतिस्मृतिविरोध इति। ततश्च स नारायणो विराट्शरीरी स्वनाभिकमलकर्णिकास्थानीयस्य सुमेरोरुपरि चतुर्मुखाख्यस्वयम्भुवं सृष्ट्वा तद्वराऽन्यानपि व्यष्टिशरीरिणः स्थावरान्तान् ससर्ज। तथा च स्मर्यते।

तच्छरीरसमुत्पन्नैः कार्यैस्तैः करणैः सह।
क्षेत्रज्ञाः समजायन्त गात्रेभ्यस्तस्य धीमतः॥

इति । यत् तु शेषशायिनो नारायणस्य नाभिकमलस्रोत-
श्चतुरादिभ्यश्चतुर्मुखस्याऽऽविर्भावः श्रूयते तद् दैनन्दिन-
सर्गेष्वेव कल्पभेदेन मन्तव्यम् । दैनन्दिनप्रलयेष्वेव हि
नारायणशरीरे प्रविश्यैकीभूय सुप्तानां देवातां चतुर्मुखा-
दिक्रमेणाऽऽविर्भावः शेषशायिनः सकाशाद् घटते न
त्वादिसर्गेषु । दैनन्दिनप्रलय एव लीलाविग्रहेण शयना-
दिति । तदेवं सङ्क्षेपतश्चतुर्विंशतितत्त्वानि तेषां सृष्टिरूपं
प्रयोजनं चोक्तम् । तत्र यद् यस्माज् जायते तस्य तदापू-
रणेनैव स्थितिः ततस्तस्य संहारोऽपि तत्रैव भवति ।

{यद् यस्माज् जायते तत्त्वं तत् तत्र प्रविलीयते ।
लीयन्ते प्रतिलोमानि जायन्ते चोत्तरोत्तरम् ॥}

इति भारतादिभ्य इति । एते च सृष्टिस्थितिसंहाररूपाः
स्थूला एव परिणामाश्चतुर्विंशतितत्त्वानां कूटस्थपुरुष-
विवेकाय प्रदर्शिताः । सूक्ष्मा अप्यन्ये प्रतिक्षणपरिणामा
एतेषां स्मर्यन्ते । तथा ।

नित्यदा ह्यङ्गभूतानि भवन्ति न भवन्ति च ।
कालेनाऽलक्ष्यवेगेन सूक्ष्मत्वात् तन्न दृश्यते ॥

इति । अतश्च सर्वं जडवस्तु परमार्थतः सर्वदैवाऽसदुच्यते ।
ततश्च तस्माद् विरज्याऽऽत्मैव परमार्थसत्यो दुःखभीरुभि-
र्द्रष्टव्यः । तदुक्तमनुगीतायाम् ।

अव्यक्तबीजप्रभवो बुद्धिस्कन्धमयो महान् ।
महाहङ्कारविटप इन्द्रियाङ्कुरकोटरः ॥
महाभूतप्रशाखश्च विशेषप्रतिशाखवान् ।
सद्वापर्णः सदापुष्पः शुभाशुभफलोदयः ॥

आजीवः सर्वभूतानां ब्रह्मद्वेष्टः सनातनः ।
एतज् ज्ञात्वा च तत्त्वेन ज्ञानेन परमासिना ॥
छित्त्वा चाऽच्चरतां प्राप्य जहाति मृत्युजन्मनी ।

इति श्रीविज्ञानभिक्षुविरचिते साङ्ख्यसारे विवेकप्रतियोगिनो
प्रकृत्यादीनां स्वरूपपरिच्छेदः ।
इति साङ्ख्यसारस्य पूर्वभागः ।

अथोत्तरभागः ।

प्रथमः परिच्छेदः ।

अथ शिष्यैः सुखेनैव ग्रहीतुं पद्यमालया ।
विवेकस्याऽनुयोग्यात्मा पुरुषाख्यो निरूप्यते ॥ १ ॥
तत्र सामान्यतः सिद्धो जानेऽहमितिधीबलात् ।
द्रष्टाऽतो नित्यविभ्वादिधर्मैरेव स साध्यते ॥ २ ॥
भोक्ता नित्यस्तदर्थत्वात् तत्कर्मोत्पादितत्वतः ।
महदादिविकाराणां सर्वेषामविशेषतः ॥ ३ ॥
अपि चाऽदृष्टसंस्कारौधारत्वाद् बीजरूपतः ।
धौरनादिरतोऽस्याश्च सिद्धा भोक्तुरनादिता ॥ ४ ॥
स्वस्वामिभावानादित्वमृते भोक्तृव्यवस्थितेः ।
स्वभुक्तवृत्तिसंस्कारवत्त्वं स्वत्वं तु बुद्धिषु ॥ ५ ॥
स्वाम्यं स्वनिष्ठसंस्कारहेतुवृत्तेश्च भोक्तरि ।

अतश्च घटते स्खलनाग्रे कैवल्यमात्मनः ॥ ६ ॥
भोक्तुस्वाऽनादिभावस्य विनाग्रे ह्येवसम्भवात् ।
न नाग्रो भोक्तुरस्तीति भोक्ता नित्यो हि सिध्यति ॥ ७॥
जन्यो ज्ञानप्रकाग्रोऽस्य नित्यत्वे तु न युज्यते ।
न ह्यप्रकाग्रे कुत्राऽपि प्रकाग्रोत्पत्तिरीक्ष्यते ॥ ८ ॥
कार्यं प्रकाग्राख्यगुणेऽवयवानां हि तद्गुणः ।
कारणं तेन नाऽनित्यः प्रकाग्रो नित्यवस्तुनि ॥ ९ ॥
प्रकाग्राग्रयसंयोगात् प्रकाग्रभ्रम इन्धने ।
आदग्रे चाऽऽव्रतेर्भङ्गात् प्रकाग्रोत्पत्तिविभ्रमः ॥ १० ॥
तस्मान्नित्यात्मनो ज्ञानं नित्यं वाच्यं तथा सति ।
लाघवाज् ज्ञानमेवाऽऽत्मा निराधारः प्रकल्प्यते ।११॥
अनाग्रितत्या द्रव्यं संयोगादेश्च तन्मतम् ।
अहं जानेऽहमित्यादिबुद्धिरप्युपपद्यते ॥ १२ ॥
पिण्डेऽहन्धीर्हि मूढ़ानां ध्रुवैवाऽनादिदोषतः ।
संयोगात् तत्र पिण्डे तु ज्ञानवत्त्वमतिः प्रमा ॥ १३ ॥
सन्तु वाऽऽधेयताल्पत्वजन्मनाग्रादिबुद्धयः ।
ग्रोत्रस्य नभसीवाऽर्थज्ञानस्य ज्ञानमात्रके ॥ १४ ॥
तस्माल्लाघवतर्केण बाधकाभावतस्तथा ।
श्रुत्यादिभिश्च नित्यात्मा चिद्रूपेणैव सिध्यति ॥ १५ ॥
तज् ज्ञानं विभु नित्यत्वाद् देहव्यापितयाऽपि च ।
मध्यत्वे नाग्रिता हि स्यादणुत्वे वाऽल्पदेग्रता ॥ १६ ॥
विभुत्वेऽपि स्वधौद्वत्तेरेव साक्षान्निरीक्षणात् ।
न सर्वत्र सदा सर्वभानं ज्ञाने प्रसज्यते ॥ १७ ॥
अर्थभानं चितावर्थप्रतिबिम्बो मतो बुधैः

2 THE RAMAKRISHNA MISSION INSTITUTE OF CULTURE LIBRARY

वृत्तेरेव चितौ साक्षात् प्रतिबिम्बनयोग्यता ॥ १८ ॥
अतोऽसङ्गेऽपि कूटस्थचैतन्ये विभुनि भ्रुवे ।
वृत्तिद्वारकमेवाऽन्यभानं फलबलान्मतम् ॥ १९ ॥
अन्वयव्यतिरेकाभ्यां वृत्तिजन्यतयाऽखिलः ।
वृत्त्यैकाधिकरण्येन कामादिर्धीषु नाऽऽत्मसु ॥ २० ॥
अतोऽन्तःस्थविकाराणां स्वस्वबुद्धिष्ववस्थितेः ।
कूटस्थ एव सर्वोऽपि चिदाकाशगणः समः ॥ २१ ॥
नित्यशुद्धो नित्यबुद्धो नित्यमुक्तो निरञ्जनः ।
स्वप्रकाशो निराधारः प्रदीपः सर्ववस्तुषु ॥ २२ ॥
नन्वेवमेकतैवाऽस्तु लाघवादात्मनां खवत् ।
धीष्वेव सुखदुःखादिवैधर्म्यादिति चेन्न तत् ॥ २३ ॥
भोगाभोगादिवैधर्म्येणैकरूपेऽपि चिद्गणे ।
श्रुतिस्मृतिभ्यामुक्तेन भेदसिद्धेः परस्परम् ॥ २४ ॥
सुखादिप्रतिबिम्बात्मा भोगोऽप्यस्य न वस्तुतः ।
तथाऽप्यस्य चितौ भावाभावौ स्यातां हि भेदकौ ॥ २५ ॥
औपाधिको यथा श्यामरागौ स्फटिकभेदकौ ।
खदृष्टान्तश्च विषमो वैधर्म्यासिद्धितोऽम्बरे ॥ २६ ॥

इति श्रीविज्ञानभिक्षुविरचिते साङ्ख्यसारे पुरुषस्वरूप-
परिच्छेदः ।

अथ द्वितीयः परिच्छेदः ।

अथाऽऽत्मानात्मवैधर्म्यं गुणदोषात्मके तयोः ।
वक्ष्ये विस्तारतो येन विवेकोऽतिस्फुटो भवेत् ॥ १ ॥

सामान्यात्मघनाकाशे सान्निध्येरितशक्तिभिः ।
जायते लीयते भूत्वा भूयोऽयं जगदम्बुदः ॥ २ ॥
त्रिगुणात्मकशक्तीनां परिणामैरतश्चितिः ।
आधारविधया विश्वोपादानमविकारतः ॥ ३ ॥
यथाऽऽधारतया तोयं धरोपादानमिष्यते ।
स्वस्थपार्थिवतन्मात्रद्वारेणैवं चितिर्मता ॥ ४ ॥
अतो जगदुपादानमपि ब्रह्माऽविकारतः ।
कूटस्थनित्यपर्यायपरमार्थसदुच्यते ॥ ५ ॥
स्वार्थत्वात् स्वानुभूत्या च सिद्धत्वात् परमार्थसत् ।
स्वतः स्थित्या स्वतः सिद्ध्या लोकैः सन्निति हीर्यते ॥ ६ ॥
प्रतिक्षणविकारेण तैस्तै रूपैरपायतः ।
प्रकृत्यादिरसत् सर्वो जडार्थोऽब्धौ तरङ्गवत् ॥ ७ ॥
यत् तु कालान्तरेणाऽपि नाऽन्यसञ्ज्ञामुपैति वै ।
परिणामादिसम्भूतां तद् वस्त्वित्यादिकस्मृतेः ॥ ८ ॥
परार्थाधीनमत्वाच्च परदृष्ट्या च सिद्धितः ।
परतः सन्नसन्नेव तत्परापेक्षया मतः ॥ ९ ॥
सतोऽस्तित्वं तु नाऽसत्ता नास्तित्वे सत्यता कुतः ।
इति गारुडतश्चैवं सदसत्त्वव्यवस्थितेः ॥ १० ॥
अतो न सन्नाऽसदिदं जगत् सदसदात्मकम् ।
असद्विषयकत्वाच्च तस्य धीस्तात्त्विको भ्रमः ॥ ११ ॥
जगद्वृक्षस्य चैतन्यं सारोऽसारस्तथेतरत् ।
प्रपञ्चस्य स्थिरांशो हि चितिरेवाऽविकारतः ॥ १२ ॥
तदन्यदखिलं तुच्छमसारत्वादुदीर्यते ।
तथाऽनृतमसच्चाऽपि तदपेक्षास्थिरत्वतः ॥ १३ ॥

एवंविधैवाऽऽत्मसत्ता अन्यासत्ता च दर्शिता ।
वासिष्ठादौ विस्तरतो यथा लेशात् तदुच्यते ॥ १४ ॥
स्वप्नो जाग्रत्यमद्रूपः स्वप्ने जाग्रदसद्वपुः ।
मृतिर्जन्मन्यसद्रूपा मृतौ जन्माऽप्यसन्मयम् ॥ १५ ॥
जगन्मयी भ्रान्तिरिति न कदाऽपि न विद्यते ।
विद्यते न कदाचिच्च जलबुद्बुदवत् स्थितम् ॥ १६ ॥
आत्मैवाऽस्ति परं सत्यं नाऽन्याः संसारदृष्टयः ।
शुक्तिकारजतं यद्वद् यथा मरुमरीचिका ॥ १७ ॥
अस्ति सर्वगतं शान्तं परमात्मघनं शुचि ।
अचिन्त्याचिन्मात्रवपुः परमाकाशमाततम् ॥ १८ ॥
तत् सर्वगं सर्वशक्ति सर्वं सर्वात्मकं स्वयम् ।
यत्र यत्र यथोदेति तथाऽऽस्ते तत्र तत्र वै ॥ १९ ॥
आविर्भावतिरोभावमयास्त्रिभुवनोमयः ।
स्फुरन्त्यां ततते यस्मिन्मरावि व मरीचयः ॥ २० ॥
असत्येव सतो तोयनद्येव लहरी चला ।
मनसेवेन्द्रजालश्रीर्जागतो प्रवितन्यते ॥ २१ ॥
ब्रह्मणा तन्यते विश्वं मनसैव स्वयम्भुवा ।
मनोमयमतो विश्वं यन्नाम परिदृश्यते ॥ २२ ॥
यो ह्यशुद्धमतिर्मूढो रूढो न वितते पदे ।
वज्रसारमिदं तस्य जगदस्त्यसदेव सत् ॥ २३ ॥
अव्युत्पन्नस्य कनके कानके कटके यथा ।
कटकत्वमिरेवाऽस्ति न मनागपि हेमधीः ॥ २४ ॥
तथाऽज्ञस्य पुरागारनगनागेन्द्रभासुरा ।
दृश्यदृगेवाऽस्ति न त्वन्या परमार्थदृक् ॥ २५ ॥

इत्यादिवाक्यैर्वासिष्ठे नाऽत्यन्तासत्यतोदिता ।
जगतोऽपरवाक्यैर्हि सत् कार्यं प्राक्तनं मतम् ॥ २६ ॥
नामरूपविनिर्मुक्तं यस्मिन् सन्तिष्ठते जगत् ।
तमाहुः प्रकृतिं केचिन्मायामेकेऽपरे क्षणम् ॥ २७ ॥
सुषुप्तावस्थया चक्रपद्मरेखा शिलोदरे ।
यथा स्थिता चितेरन्तस्तथेयं जगदावली ॥ २८ ॥
प्रकृतिव्रततिर्व्योम्नि जाता ब्रह्माण्डसत्फला ।
इत्यादिवाक्यैः साङ्ख्यीयसत्कार्यादुपवर्णनात् ॥ २९ ॥

इति श्रीविज्ञानभिक्षुविरचिते साङ्ख्यसारे आत्मानात्मनोः
सत्यत्वासत्यत्ववैधर्म्यपरिच्छेदः ।

अथ तृतीयः परिच्छेदः ।

तदेवमात्मनः सत्ता दर्शिताऽन्यविलक्षणा ।
अथ चिद्रूपतां वक्ष्ये बुद्धिवृत्तिविलक्षणाम् ॥ १ ॥
अनुभूतिश्चितिर्बोधो वेदनं चोच्यते पुमान् ।
वेद्यं जडं तमोऽज्ञानं प्रधानादिकमुच्यते ॥ २ ॥
वेदनं वेद्यसम्बन्धादेव वेत्तमिधीयते ।
यथा प्रकाश्यसम्बन्धात् प्रकाशोऽपि प्रकाशकः ॥ ३ ॥
यथा वाऽर्थोपरागेण भानमर्थस्य भासकम् ।
एवं वेद्योपरक्तस्याऽस्वांशस्याऽऽधारतांऽशिनि ॥ ४ ॥
असङ्गायां चितौ वेद्योपरागोऽयं न धीष्विव ।

किन्तु साक्षाद् द्वारतो वा चिति तत्प्रतिबिम्बनम् ॥५॥
वाह्यं हृत्याख्यकरणाभावाद्नुपरागतः ।
चितिर्नैवेक्षते ज्ञेयं विभुत्वेऽपि च सर्वतः ॥ ६ ॥
तथा चिदपि हृत्याख्यकरणाभावतोऽर्थवत् ।
स्वगोचरां हृत्तिमृते तिष्ठत्यज्ञातसत्तया ॥ ७ ॥
तदेवं चिद्विराकारा प्रकाशाकाशरूपिणी ।
तिष्ठत्यव्यक्तरूपा च मोक्षादौ हृत्यभावतः ॥ ८ ॥
बुद्धिवृत्तिस्तु साकारा परिच्छिन्ना च दीपवत् ।
व्यक्ता च सर्वदा तद्वदसङ्घा क्षणभङ्गुरा ॥ ९ ॥
जडा च परदृश्यत्वाद् घटदीपादिवन्मता ।
हृत्तेः प्रकाशता त्वर्थाकारत्वादक्षतैव हि ॥ १० ॥
यथाऽऽस्याकारतार्हत्वादादर्शस्तत्प्रकाशकः ।
सर्वाकारत्वयोग्यत्वात् सैवं सर्वप्रकाशिका ॥ ११ ॥
न पुनर्हृत्तिदृष्टृत्वं चितस्तद्भिन्नद्रष्टृता ।
हृत्तेर्यतो गौरवं स्याद् द्वयोर्ज्ञातृत्वकल्पने ॥ १२ ॥
बुद्ध्यारूढं स्वन्यवस्तु तद्द्वारा प्रतिबिम्बितम् ।
पश्यत्यनुभवो नाऽन्यो द्रष्टा बुद्ध्यादिकोऽखिलः ॥ १३ ॥
इत्येवं बुद्धिवृत्तिभ्यो वैलक्षण्यं चितीरितम् ।
चिदचित्त्वाख्यवैधर्म्यं देहादिभ्यः स्फुटन्त्विदम् ॥१४॥
अन्योन्यप्रतिबिम्बेन सारूप्याद् वृत्तिबोधयोः ।
बोधव्यवहृतिर्वृत्तौ लोहेऽग्निव्यवहारवत् ॥ १५ ॥
नैवाऽल्पबुद्ध्याश्रयोऽयं विवेको वृत्तिबोधयोः ।
तार्किका यत्र सम्मूढाः साङ्ख्यानां श्रेष्ठता यतः ॥१६॥
विज्ञानवादिनो बौद्धा वृत्तिबोधाविवेकतः ।

ज्ञातात्मत्वश्रुतौ मूढ़ा मेनिरे क्षणिकां चितिम् ॥१७॥
सत्त्वपुंसो विवेकोऽयं वृत्तितद्बोधरूपयोः।
नाऽशक्यः सुधियां यद्वद्धंसानां क्षीरनीरयोः ॥ १८ ॥
एतद्ग्रन्थस्य संसारी मोक्षस्तत्रैव संस्थितः।
यद् वृत्तिभ्यो विवेकेन तद्बोधस्याऽवधारणम् ॥ १९ ॥
सर्वोऽप्यनुभवं वेद न कश्चिदपि वेदताम्।
विवेकमात्रमस्मिन् हि भासमानेऽप्यपेक्षते ॥ २० ॥
आत्मा विवेक्तुं वाह्यार्थं न शक्यो वृत्तिमिश्रणात्।
अतो वृत्ती विवेक्तव्यो वृत्तिबोधतयैव सः॥ २१ ॥
यथा बुद्ध्या विवेकार्हो नाऽग्निरङ्गारमिश्रणात्।
सोऽङ्गारे तु विवेकार्हो काष्ठदग्धृतया स्फुटम् ॥२२॥
अतएव श्रुतौ स्वप्ने दृश्यवृत्तिविवेकतः।
स्वयंज्योतिःस्वरूपेण तस्या द्रष्टा प्रदर्शितः ॥ २३ ॥
साक्षात् प्रकाशो यो यस्य स तद्भिन्नो मतो बुधैः।
घटादिभ्यो यथाऽऽलोक आलोकाच्चाऽपि वृत्तयः ॥२४॥
वृत्तेः साक्षात् प्रकाशत्वादतोऽनुभवरूपकः।
वृत्तिभ्यो भिन्न आत्मेति श्रौतो मार्गः स्वदर्शने ॥२५॥
एवमादिप्रकारेण बुद्धिसत्त्वप्रकाशतः।
विलक्षणतया सिद्धश्चित्प्रकाशोऽस्य भासकः ॥ २६ ॥
स्वप्नदेहादिदृष्टान्तैस्तस्माच्छ्रुत्यादिदर्शितैः।
जाग्रद्देहेन्द्रियार्थेभ्यश्चितिर्भिन्नतया मता ॥ २७ ॥
स्वप्ने देहादिकं सर्वं चिद्भिन्नं चिति भासते।
जाग्रत्येवं विशेषस्तु यद् वाह्यमपि भासते ॥ २८॥
स्वप्ने मनोमयत्वाच्च साक्षाच्चिद्विषयोऽखिलम्।

करणद्वारतो बाह्यं चितो आयति गोचरः ॥ २९ ॥
सर्वं देहादिकं स्वप्नजाग्रतोरेकरूपतः ।
भाति चिद्व्योम्नि नाऽत्रार्थंबाह्यान्तर्भेदतो भिदा ॥ ३० ॥
चिद्व्योम्नि वासनातो धीः प्रमाणाद् वाऽर्थरूपिणी ।
ततश्चितोऽर्थभानं यत् तत् समं स्वप्नजाग्रतोः ॥ ३१ ॥
तदिदं स्वानुभूत्यैव प्रोच्यते न परोक्षतः ।
स्वप्नदृष्टान्तसट्टघो नोपायोऽस्त्याऽऽत्मदर्शने ॥ ३२ ॥
सुषुप्तौ हि यथा स्वप्ने स्वात्मन्येवेक्षतेऽखिलम् ।
आत्मानं चैकदेशस्थं मन्यते जागरे तथा ॥ ३३ ॥
सुषुप्तिरात्मनस्तत्त्वं स्वरूपावस्थितेस्तदा ।
जाग्रत्स्वप्नौ मायिकौ तु मृषासारूप्यतो धिया ॥ ३४ ॥
बुद्धेः सुषुप्तिस्तमसाऽऽवरणं तद्विलक्षणा ।
चितेः सुषुप्तिर्वृत्त्याख्यदृश्यावरणशून्यता ॥ ३५ ॥
पूर्णः कूटस्थनित्यश्च स्वस्वधीमात्रवृत्तिदृक् ।
वृत्त्याख्यदृश्यविरहात् सर्वदा नेक्षते पुमान् ॥ ३६ ॥
वृत्तिदेशे यथा बोधस्तथा सर्वत्र सर्वदा ।
वृथैव तप्यते मूढ़ैर्व्यर्थनाशादिनाऽऽत्मनः ॥ ३७ ॥
दुःखभोगमहारोगनिदानं देहगेहिनी ।
बुद्धिर्न त्यज्यते मूढ़ैर्महानिद्रासुखं यतः ॥ ३८ ॥
अनादिबुद्धिगार्हस्थ्यं विवेकस्त्यज्यते न चेत् ।
न मोक्षो बाह्यसन्न्यासादिहाऽमुत्राऽसुखं परम् ॥ ३९ ॥
समचिन्मात्ररूपेषु स्वपरात्मसु सर्वदा ।
बुद्धिमात्रविवेकेन स्वपरादिभिदा मृषा ॥ ४० ॥
चिन्मात्रे निर्गुणे स्वामिन्यारोप्यैवाऽऽत्मकर्तृताम् ।

स्वाम्यवज्ञापराधेन बध्यते धीः स्वकर्मभिः ॥ ४१ ॥

साध्वी तु धीः पतिं दृष्ट्वा याथातथ्येन तत्परा ।
इहाऽऽनन्दमयी चाऽन्ते पतिदेहे लयं व्रजेत् ॥ ४२ ॥

नाहं कर्ता सुखी दुःखी चिन्मात्राकाग्ररूपकः ।
एवं नाथं चिन्तयन्ती न पत्युर्दुःखभोगदा ॥ ४३ ॥

इति श्रीविज्ञानभिक्षुविरचिते सांख्यसारे आत्मानात्मनो-
श्चिदचित्त्वैधर्म्यपरिच्छेदः ।

अथ चतुर्थः परिच्छेदः ।

इत्येवमात्मनः प्रोक्तो बुद्ध्यादिभ्यो विलक्षणः ।
चित्प्रकाशोऽधुनाऽऽनन्दरूपता वक्ष्यते तथा ॥ १ ॥

दुःखं कामसुखापेक्षा सुखं दुःखसुखात्ययः ।
इति स्मृतेः सुखात्सत्यं नित्यनिर्दुःखताऽऽत्मनः ॥ २ ॥

परिभाषाबलाद् रूढिबाधः सर्वत्र सम्मतः ।
अन्यथा परिभाषेयं मोक्षशास्त्रे भवेद् वृथा ॥ ३ ॥

यद्वा परोक्षवादेन परमप्रियतास्पदे ।
रूपिका सुखगीः पुंसि विभुत्वाद्यै खशब्दवत् ॥ ४ ॥

नाऽऽनन्दं न निरानन्दनित्यादिश्रुतिभिः स्फुटम् ।
आत्मन्यानन्दरूपत्वनिषेधाद् युक्तिसंयुतात् ॥ ५ ॥

उपासाद्यर्थशून्यत्वान्नेति नेति श्रुतेस्तथा ।
निषेधवाक्यं बलवद् विधिवाक्यादिति स्थितिः ॥ ६ ॥

निर्निरानन्दमिति च स्वोपाध्यानन्दभोक्तृताम् ।
स्वामित्वरूपिणीं वक्ति न निर्धन इतीव हि ॥ ७ ॥
प्रेयोऽन्यस्माच्च सर्वस्मादिति श्रुत्या सुखादपि ।
उक्त आत्मा प्रियस्तस्य सुखत्वोक्तिश्च नोचिता ॥ ८ ॥
आनन्दाद्याः प्रधानस्य इति वेदान्तसूत्रतः ।
वेदान्तेऽपि न सिद्धान्त आत्मनः सुखरूपता ॥ ९ ॥
विस्तराद् ब्रह्ममीमांसाभाष्येऽस्माभिः परीक्षितम् ।
चितेरसुखरूपत्वं प्रेमा व्याख्यायतेऽधुना ॥ १० ॥
मा न भूवमहं यद्वद् भूयासंमितिरूपकः ।
निर्निमित्तोऽनुरागो यः स प्रेमा परमार्थिति ॥ ११ ॥
अन्याशेषतया बुद्धेः स्नेहोऽयं न सुखेष्वपि । ८०६।८
अतः प्रियतमः स्वात्मा नाऽन्योऽतो ह्यधिकः प्रियः ॥१२॥
आत्मत्वेनाऽऽत्मनि प्रेमा न सुखत्वाद्यपेक्षते ।
अहं स्यामिति चेद् यस्मात् सुखं स्यामिति नेष्यते ॥१३॥
तथा च सुखतादुःखाभावते वाऽऽत्मताऽपि च ।
प्रेम्णि प्रयोजिका सिद्धा स्वतःप्रेमात्मतैव तु ॥ १४ ॥
तस्माद् वस्तुत आत्मैव प्रियो नौपाधिकत्वतः ।
औपाधिकीतरप्रीतिरस्थिरत्वान्न तात्त्विकी ॥ १५ ॥
प्रीतिरन्यत्र चाऽनित्याऽविवेकाद्यैः सुखादिषु ।
आत्मप्रीतिस्तु नित्याऽतो नित्यानन्दः पुमान् मतः ॥१६॥
आत्मनः प्रियतां बुद्धिर्यदि पश्येत् समाहिता ।
सर्वातिशायिनीं तर्हि सुखाब्धौ किं न मज्जति ॥१७॥
प्रियदर्शनतो बुद्धेः सुखं लोकेषु दृश्यते ।
अतोऽनुमेयं परमप्रियदृष्ट्या परं सुखम् ॥ १८ ॥

आत्मार्थत्वेन सर्वत्र प्रीतिरात्मा स्वतः प्रियः ।
दृश्यते श्रुतिभिः प्राह आत्मदृष्टिविधित्सया ॥ १९ ॥
ततोऽप्यनुपमं ज्ञेयं प्रियात्मेक्षणतः सुखम् ।
भुञ्जते तत् सुखं धीरा जीवन्मुक्ता महाधियः ॥ २० ॥
अन्तरात्मसुखं सत्यमविसंवादि योगिनम् ।
अपश्यन् क्षपणो बाह्यसुखार्थी वञ्चितो जनः ॥ २१ ॥
सुखाशया बहिः पश्यन् देही हीन्द्रियरन्ध्रकैः ।
वातायनैर्गृहीत्वाऽन्तः सुखं वेत्ति न बाह्यदृक् ॥ २२ ॥
दुःखलभ्यान् दुःखमयान् परिणामेऽतिदुःखदान् ।
विषयोत्थान् सुखाभासान् धिक् स्वात्मसुखरोधकान् ॥ २३ ॥

इति श्रीविज्ञानभिक्षुविरचिते साङ्ख्यसारे आत्मानात्मनोः
प्रियाप्रियत्ववैधर्म्यपरिच्छेदः ।

अथ पञ्चमः परिच्छेदः ।

परिच्छेदत्रयेणोक्तं सच्चिदानन्दरूपकम् ।
गीयमानं श्रुतिस्मृत्योरात्मनो लक्षणत्रयम् ॥ १ ॥
तद्वैपरीत्यमन्येषां लक्षणं चेरितं स्फुटम् ।
आभ्यां तु गुणदोषाभ्यां विवेको दोषहृत् परः ॥ २ ॥
नैर्गुण्यसगुणत्वादिवैधर्म्याण्यपराण्यपि ।
वक्ष्यन्ति वक्ष्ये सङ्क्षेपात् पुम्प्रकृत्योरतः परम् ॥ ३ ॥
धियोऽर्थाकारया हृत्या जनितत्वात् सुखादयः ।

सामानाधिकरण्येन कल्प्यन्ते लाघवाद् धियाम् ॥४॥
मच्छदार्ढ्यडत्वेन तद्धेतुश्च जडो मतः ।
कार्यकारणसाजात्यं दृष्टं लोके हि सर्वतः ॥ ५ ॥
अत आत्मा बोधमात्रतया सिध्यति लाघवात् ।
गुणाः सर्वे प्रकृत्यादेर्विकाराश्चेतरेऽखिलाः ॥ ६ ॥
आत्मा तु निर्गुणस्त्वद्वत् कूटस्थश्च मतो बुधैः ।
चितेः कूटस्थसज्ञा तु स्थिरत्वाद् गिरिकूटवत् ॥ ७ ॥
लेपश्चेतरसम्बन्धे तद्रूपैकपरक्तता ।
यथा विषयसम्बन्धाद् बुद्धौ भवति वासना ॥ ८ ॥
भाण्डादौ द्रव्ययोगाच्च तत्तद्द्रव्यस्य वासना ।
लेपहेतुश्च सम्बन्धः सङ्गः सम्बन्धि चाञ्जनम् ॥ ९ ॥
अतो निरञ्जनोऽसङ्गो निर्लेपश्चोच्यते पुमान् ।
नभःपुष्करपत्रादिदृष्टान्तैः परमर्षिभिः ॥ १० ॥
चिन्मात्रानन्तशक्त्यब्धौ पुमर्थपवनेरिताः ।
सत्त्वादिशक्तयो यान्ति विश्वबुद्बुदरूपताम् ॥ ११ ॥
अत ईशश्चिदात्मैव जगतः सन्निधानतः ।
मणिवत् प्रेरकत्वेन जडानामयसामिव ॥ १२ ॥
पुमानेव जगत्कर्ता जगद्भर्ताऽखिलेश्वरः ।
स्वाम्यर्थं भृत्यवद् यस्माज्जडवर्गः प्रवर्तते ॥ १३ ॥
करणानि च देहेषु राजार्थमधिकारिवत् ।
भोग्यजातं मनोमन्त्रिणयर्पयन्ति स्वभावतः ॥ १४ ॥
तैर्भोग्यैर्युक्तमात्मानमावेदयति धीश्चिति ।
इच्छामात्रेण तद् भुङ्क्ते राजेवाऽऽत्माऽखिलेश्वरः ॥१५॥
धनादेरीश्वरो देही देहस्येन्द्रियमीश्वरम् ।

इन्द्रियस्येश्वरी बुद्धिर्बुद्धेरात्मेश्वरः परः ॥ १६ ॥
कूटस्थस्येश्वरस्याऽन्यो नाऽस्ति प्रेरक इत्यतः ।
ईश्वरस्याऽवधित्वेन द्रष्टा वै परमेश्वरः ॥ १७ ॥
अन्यस्याऽऽगन्तुकैश्वर्यं बहुव्यापारसङ्कुलम् ।
निर्व्यापारस्य निर्दोषमनाद्यैश्वर्यमात्मनः ॥ १८ ॥
सर्वशक्तिमयो ह्यात्मा शक्तिमण्डलताण्डवः ।
संसारं तन्निवृत्तिं च मायया ऽऽप्नोति हेलया ॥ १९ ॥
सर्वातिशायि निर्दोषमैश्वर्यमिदमात्मनः ।
पश्यतो योगिनो ब्राह्ममप्यैश्वर्यं तृणायते ॥ २० ॥
बाह्यस्याऽऽत्मोच्यते देही देहस्याऽऽत्मेन्द्रियाणि च ।
बुद्धिरात्मेन्द्रियान्तस्यं बुद्धेरात्मा तु चिन्नभः ॥ २१ ॥
अत आत्मावधित्वेन परमात्मोच्यते चितिः ।
तथाऽन्तःकरणैर्योगाज्जीव इत्युच्यते चितिः ॥ २२ ॥
अविद्याकार्यरहितः परमात्मेति च स्मृतिः ।
यस्य यद् व्यापकं तस्य तद् ब्रह्माऽतो धरादिकम् ॥२३॥
प्रकृत्यन्तं भवेद् ब्रह्म स्वस्वकार्याद्यपेक्षया ।
सेश्वरे साङ्ख्यवादेऽपि चितिरेवाऽनुमन्यते ॥ २४ ॥
परे वा परमात्मत्वादिकं तु न जडे क्वचित् ।
अध्यक्षव्यापकत्वाभ्यां परं ब्रह्म तु चेतनः ॥ २५ ॥
तस्याऽध्यक्षं व्यापकं च न हेतुविधयाऽस्ति हि ।
असङ्ख्यात्मा नभोराशिरविभक्तैकरूपकः ॥ २६ ॥
घोऽतश्चिद्घनविज्ञानघनात्मघनसंज्ञकः ।
प्रकाशस्याऽनपेक्षत्वात् स्वस्य दृष्टतयाऽपि च ॥ २७॥
स्वप्रकाशः पुमानुक्त इतरे तद्विलक्षणाः ।

भोगोऽभ्यवहृतिः सा च कूटस्थे नाऽस्ति धीष्विव ॥२८॥

{धीवृत्ति प्रतिबिम्बाख्यगौणभोगा तु भोक्तृता ।
साक्षाद् धीवृत्तिद्रष्टृत्वाद् बुद्धिसाक्ष्युच्यते पुमान् ॥२९॥

विना विकारं द्रष्टृत्वात् साक्षी तूक्तोऽखिलस्य सः ।
चैत्योपरागरूपत्वात् साक्षिताऽप्यभ्रवा चितः ॥ ३०

उपलक्षणमेवेदमपि व्यावृत्तये जडात् ।
अतः पुमाननिर्देश्योऽणुश्च सूक्ष्मश्च कथ्यते ॥ ३१ ॥

विना दृश्यमदृश्यत्वाद्व्यक्तश्चोच्यते स्वतः ।

{अदृश्यो दृश्यते राहुर्गृहीतेन यथेन्दुना ॥ ३२ ॥
अदृश्यं चाऽस्यमादर्शे चित् तथा स्वस्वबुद्धिषु ।

चिति विश्वस्य सङ्गश्चेद् विश्वं भासेत सर्वदा ॥ ३३ ॥

विश्वाधारोऽयतः शून्यमिति चिह्नीयते खवत् ।
दृश्यदोषान् मृषाबुद्धिर्द्रष्टर्यारोप्य निर्मले ॥ ३४ ॥

आदर्शे मलवद् व्योम्नि दोषदृष्ट्या तु तप्यते ।
वस्तुतश्चिति नाऽस्त्येव मलो दृश्याश्रितः सदा ॥ ३५ ॥

अतश्च निर्मलः स्वस्थो निर्दोषश्चोच्यते पुमान् ।

{सजातीयेषु वैधर्म्यलक्षणा नाऽस्ति यद् भिदा ॥ ३६ ॥
अत आत्मा समः प्रोक्त ऐकरूप्याच्च सर्वदा ।

देहाध्यक्षतया देही पुर्यभिव्यक्तितः पुमान् ॥ ३७ ॥

एकाकित्वादद्वितीयः केवलश्चोच्यते तु सः ।
चिच्छक्त्यप्रतिबन्धेन प्रोच्यतेऽनावृतः पुमान् ॥ ३८

सर्वस्वामितया चाऽऽत्मा चेतनः चेतवेदनात् ।
हृत्सरोवरधीपद्मदलवृत्तिषु लीलया ॥ ३९ ॥

चरन्निवाऽऽनन्दमीनान् भुञ्जानो हंस उच्यते । ।

हकारेण वहिर्याति सकारेण विशन् पुनः ॥ ४० ॥
प्राणहत्याऽनये चाऽपि प्राण्यात्मा हंस उच्यते ।
शरीरागारछद्व्योमगुहायां बुद्धिभार्यया ॥ ४१ ॥
व्यज्यमानस्तया सार्धं स्वपन्निव गुहाशयः ।
त्रिगुणात्मकमायां स्वां सान्निध्यात् परिणामयन् ॥४२॥
मायीति कथ्यते चाऽऽत्मा तत्कृतानृतवेषधृक् ।
खान्येकादश भूतानि पञ्चैतानि तु षोडश ॥ ४३ ॥
पुंसः कलास्तत्त्वतस्तु निरंशत्वात् स निष्कलः ।
अहंशब्दः स्वामिवाची स्वामी साक्षी तु चेतसः ॥४४॥
अतोऽहमिति शब्देन चिन्मात्रं प्रोच्यते बुधैः ।
सर्वेश्वरः सर्ववेत्ता सर्वकर्ताऽद्वयः पुमान् ॥ ४५ ॥
सामान्यादुच्यते यद्वद् राजा सर्वनराधिपः ।
आत्माद्वैतस्य सूचेण जातिमात्रेण वर्णनात् ॥ ४६ ॥
प्रलये हि विजातीयद्वैतशून्यत्वमात्मनाम् ।
असङ्गत्वान्नित्यशुद्धो नित्यबुद्धश्च चित्त्वतः ॥ ४७ ॥
नित्यमुक्तस्तथा नित्यनिर्दुःखत्वात् पुमान् मतः ।
इत्यादिगुरुशास्त्रोक्तादिशा स्वानुभवेन च ॥ ४८ ॥
वैधर्म्यादात्मनोऽनात्मविवेकः क्रियतां बुधैः ।
परिच्छेदचतुष्केण पुम्प्रकृत्योः सुविस्तरात् ।
वैधर्म्यगण उक्तोऽयं ध्यायिनामाशु मुक्तिदः ॥ ४९ ॥

इति श्रीविज्ञानभिक्षुविरचिते सांख्यसारे आत्मवैधर्म्य-
गणपरिच्छेदः ।

अथ षष्ठः परिच्छेदः ।

विवेकमेव सद्युक्त्या मत्वा तदनुभूयते ।
राजयोगं यथा कुर्यात् समासेन तदुच्यते ॥ १ ॥
अशक्तो राजयोगस्य हठयोगेऽधिकारवान् ।
वासिष्ठे हि वसिष्ठाय भुसुण्डेनैवमीरितम् ॥ २ ॥
ज्ञानाद्वृत्तौ राजयोगे प्राणायामासने हठे ।
मुख्ये तेऽङ्गतयाऽन्योन्यं सेव्ये शक्त्यनुसारतः ॥ ३ ॥
विषयेऽनन्तदोषा ये श्रुतिस्मृतिसमीरिताः ।
त आदौ परिदृष्टव्याश्चित्तस्थैर्याय योगिभिः ॥ ४ ॥
कामबीजान्यनन्तानि सम्परोहन्ति यद्धृदि ।
तत्राऽटवीनिभे ज्ञानपुण्यशस्यं न वर्धते ॥ ५ ॥
दोषदृष्ट्यग्निसन्दग्धे कामबीजे तु चेतसि ।
गुरुशास्त्रहलैः क्लृप्ते सुक्षेत्रे तद्विवर्धते ॥ ६ ॥
सत्येष्वसक्तां प्रचुरां तथा रम्येष्वरम्यताम् ।
सुखेषु प्रचुरं दुःखं पश्यन् धीरो विरज्यते ॥ ७ ॥
ब्रह्मलोकोऽपि नरको विनाशामेध्यपूरितः ।
युक्तश्च स्वाधिकैरन्यैस्त्वैगुण्यादपि दुःखयुक् ॥ ८ ॥
तत्रत्यैरपि मुक्त्यर्थं यत्यते जन्मभीरुभिः ।
अतो ज्ञेयः समासेन लोकः सर्वोऽपि दुःखयुक् ॥ ९ ॥
इदं मे स्यादिदं मा स्यादितीच्छाव्यथितं मनः ।
स्वभावात् तेन विज्ञेयं दुःखं चित्तेन सङ्गतिः ॥ १० ॥
'सुखं सुषुप्तिः परमा दुःखं विषयवेदनम् ।

सुखदुःखसमासोऽयं किमन्यैर्बहुभाषितैः ॥ ११ ॥
तस्मादनर्थानर्थाभान् परीत्य विषयान् सुधीः ।
उत्सृजेत् परमार्थार्थी बालरम्यानिवाधनान् ॥ १२ ॥
इत्यादिकानन्तदोषदृष्ट्या रागस्य तानवे ।
मायाविवेकतः शुद्धमात्मानं चिन्तयेत् सदा ॥ १३ ॥
इदं तदिति निर्देष्टुं गुरुणाऽपि न शक्यते ।
उदासीनस्याऽऽत्मतत्त्वं स्वयमेव प्रकाशते ॥ १४ ॥
बुद्धिबोधात्मको बुद्धिसाक्षी बुद्धेः परो विभुः ।
कूटस्थोऽहं चिदादित्य ईत्येकाग्र्योऽनुचिन्तयेत् ॥ १५ ॥
वृत्तिबोधो घटच्छिद्रमिव नाश्यत्व ईक्ष्यते ।
वस्तुतो वृत्तिबोधोऽहं पूर्णो व्योमवदक्षयः ॥ १६ ॥
अन्तर्यद् दृश्यते सर्वं तद् बुद्धेर्वृत्तिरुच्यते ।
तेभ्यो दुःखात्मकेभ्योऽहं साक्षात् तद्वीक्षिता पृथक् ॥ १७ ॥
कर्मकर्तृविरोधो हि वृत्त्या वृत्तिप्रकाशने ।
वृत्तिधारकल्पने च गौरवादिति निश्चितम् ॥ १८ ॥
हर्षशोकभयक्रोधलोभमोहमदैस्तथा ।
द्वेषाभिमानकार्पण्यनिद्रालस्यस्मरादिभिः ॥ १९ ॥
धर्माधर्मैश्च सम्पूर्णा बुद्धिर्दुःखमयी तु मे ।
आत्मानं दर्शयत्येव भास्करायेव रोगिणः ॥ २० ॥
अहं सर्वगतं शान्तं परमात्मघनं शुचि ।
अचिन्त्यचिन्मात्रनभो विश्वदर्पणमक्षयम् ॥ २१ ॥
निरञ्जनं निराधारं निर्गुणं निरुपद्रवम् ।
निर्विशेषं सजातीयात् समस्तार्थाऽवभासकम् ॥ २२ ॥
ब्रह्मविष्णुमहेशाद्याः स्थावरान्ताश्च चेतनाः ।

अवैधर्म्यात्मकाभेदादहमित्यनुचिन्तयेत् ॥ २३ ॥
अहमन्ये च पुरुषाः समचिद्व्योमरूपिणः ।
अत आत्मैक एवाऽहमिति श्रुतिषु गीयते ॥ २४ ॥
इति पश्यन् स्वभोगैश्च योगो विश्वं प्रपूजयेत् ।
आत्मयागोऽप्ययं प्रोक्तः श्रुत्युक्तः साङ्ख्ययोगिनाम् ॥२५॥
सर्वभूतस्थमात्मानं सर्वभूतानि चाऽऽत्मनि ।
समं पश्यन्नात्मयाजी स्वाराज्यमधिगच्छति ॥ २६ ॥
इत्येवं मनुनाऽऽप्यात्मयागो ज्ञानाङ्गमीरितः ।
तस्माद्भवदानेन स्वभोगार्चनेन च ॥ २७ ॥
मन्मानयन् भूतजातमात्मानमनुचिन्तयेत् ।
ब्रह्मविष्णुशिवादीनां भोगे रागश्च हीयते ॥ २८ ॥
तेषां स्वसाम्यदृष्ट्याऽतः साम्यं योगो विचिन्तयेत् ।
उत्पत्तौ प्रलये चैव सर्वावस्थासु सर्वदा ॥ २९ ॥
सर्वेषामेकरूपत्वे द्रष्टूरागादिकं कुतः ।
विष्ण्वादयो महैश्वर्यं भुञ्जाना अपि नाऽधिकाः ।३०॥
मत्तोऽतीऽलं तदैश्वर्यैरविवेकिजनप्रियैः ।
गुणकर्मादिभिः किञ्चिन्निरीक्ष्याऽधिकमात्मनः ॥३१॥
तदर्थं यतते लोको नाऽहं पश्यामि मेऽधिकम् ।
तद्वा न्यूनं न पश्यामि यदतिक्रमशङ्कया ॥ ३२ ॥
देवा दैत्यजयायैव यतिष्ये तज्जयाभया ।
अहं यथा तथैवाऽन्ये आब्रह्मा नारका जनाः ॥ ३३ ॥
दृश्यन्ते स्वात्मवत् प्रेम्णा पितृभ्रातृसुतादिवत् ।
अ ईश ईशितव्यो वा कः श्रेष्ठः कोऽधमोऽपि वा ॥३४॥
अभिन्ने भेददृष्ट्या स्यान्मृत्योर्भयमिति श्रुतिः ।

चिद्व्योमस्वैकरूपेषु ईशानीशादिरूपकः ॥ २५ ॥
रूपभेदो ह्यसन् सर्वः स्फटिके रूपभेदवत् ।
धियां रूपैः पुमानेको बहुरूप इवेयते ॥ २६ ॥
त्वक्चर्मादिरूपाद्यैर्मायीव बहुरूपधृक् ।
मामातिङ्ग्य निराकारं विविधाकारधारिणी ॥ २७ ॥
मायैवैका हि नृत्यन्ती मोहयत्यखिला धियः ।
पुंसां भेदो बुद्धिभेदादम्बुभेदाद् यथा रवेः ॥ २८ ॥
व्योम्नश्च छिद्ररूपेण भेदः कुम्भादिभेदतः ।
अतः शुद्धो बुद्धमुक्तः सर्वदा सर्वगोऽव्ययः ॥ २९ ॥
अहमन्ये च तत्राऽहो यत्र मित्रादिधीर्मृषा ।
ब्रह्मणीशे हराविन्द्रे सर्वभूतगणे तथा ॥ ४० ॥
उत्तमाधममध्यत्वविभागो मायया मृषा ।
त्रिगुणात्मकमायायास्त्रैविध्यादात्मनोऽपि हि ॥ ४१ ॥
उत्तमाधममध्यत्वत्रैविध्यं नैव हि स्वतः ।
यथा देहे तथाऽन्यत्र चित्प्रकाशोऽयमव्ययः ॥ ४२ ॥
व्यक्ताव्यक्तताभेदौ ह्यन्तरबाह्ययोः ।
एवमन्येऽपि पुरुषा बद्धमुक्तादिविशेषतः ॥ ४३ ॥
ईशानीशादिविशेषाच्च पुरुषार्थो न मेऽस्त्यतः ।
महानिद्रैव मे साध्वी दुःखभोगहरा प्रिया ॥ ४४ ॥
अप्रिया मूढचित्तानामसाध्वी धीहतात्मनाम् ।
चिदादर्शे मयि धियो यद्यपि प्रतिबिम्बनम् । ४५
तत्त्वतो नैव दोषाय तथाऽपि त्याज्य मेव तत् ।
स्वभावादस्य हेयत्वं स्वानुभूत्या हि सिध्यति ॥ ४६ ॥
यथा कोऽपि परस्याऽपि दैन्यं न दिदृक्षति ।

स्वामिन्यारोप्याऽऽत्मदोषान् साध्वीयमनुतप्यते ॥ ४७ ॥
निर्दोषं स्वामिनं दृष्ट्वा निर्दोषा स्यात् पतिव्रता ।
एवमस्या रूपभेदेऽप्येकरूपोऽस्मि सर्वदा ॥ ४८ ॥
भुञ्जानो वाऽप्यभुञ्जानस्तां मदर्थामनन्यगाम् ।
यथैकरूपतोपाधियोगायोगदृशास्वहो ॥ ४९ ॥
आदर्शस्याऽमलस्यैव चिन्नभोदर्पणस्य मे ।
दृश्यबुद्धिगता दोषाः साक्षात् तद्द्रष्टरि प्रभौ ॥ ५० ॥
न सन्ति मयि मोहाद्या भास्करे भास्यदोषवत् ।
दुःखैर्बध्वा स्वमात्मानं त्यक्त्वा मद्भावमागता ॥ ५१ ॥
मुच्यते दुःखबन्धाद् धीर्न मे मोक्षो न बन्धनम् ।
कूटस्थासङ्गचिद्व्योम्नि धीदुःखप्रतिबिम्बनम् ॥ ५२ ॥
योऽन्यो बन्धो भोगरूपः सोऽपि चिद्दर्पणे मृषा ।
जाग्रदादित्रयावस्थासाक्षी ताभिर्विवर्जितः ॥ ५३ ॥
अहं पूर्णश्चिदादित्य उदयास्तविवर्जितः ।
दर्पणे मुखवद् विश्वं मयि बोधे न तात्त्विकम् ॥ ५४ ॥
विभुत्वेऽपि च वाङ्मात्रः सुषुप्त्यादावदर्शनात् ।
मयि वाऽन्यत्र वा पुंसि केवलानुभवे विभौ ॥ ५५ ॥
भाति यत् तद्विवर्त्तो धीप्रतिबिम्बात्मकत्वतः ।
शुक्तौ रजतवद् विश्वमतो मयि न दोषकृत् ॥ ५६ ॥
मरीचौ तोयवत् तद्वद् व्योमादौ नगरादिवत् ।
कालत्रयेऽपि नाऽस्त्येव मयि विश्वं सनातने ॥ ॥५७॥
अस्त्वथवा माऽस्तु बुद्ध्यादौ मम तेन किम् ।
मयि सर्वं यथा व्योम्नि सर्वत्राऽहं यथा नभः ॥ ५८ ॥
न सर्वं मयि सर्वत्र नाऽहं वाक्षेपतः खवत् ।

अत एवाऽविभागाख्याभेदेन क्षीरनीरवत् ॥ ५८ ॥
ज्ञानात्मकमिदं विश्वं गायन्ति परमर्षयः ।
जगन्मम मदर्थत्वान्मच्छरीरसुखादिवत् ॥ ६० ॥
यथा मम तथाऽन्येषां ममैवेति धियो भ्रमः ।
वस्तुतस्तु न कस्याऽपि किमपि व्यभिचारतः ॥ ६१ ॥
स्वामित्वस्याऽध्रुवत्वेन पान्थस्याऽऽवासगेहवत् ।
एकं चिन्मात्रमस्तीह शुद्धं शून्यं निरञ्जनम् ॥ ६२ ॥
सूक्ष्मात् सूक्ष्मतरं तत्र न जगन्न जगत्क्रिया ।
दृश्यते सर्वदृश्याढ्या स्वच्छबुद्धिपरम्परा ॥ ६३ ॥
चिन्मण्डलमहादर्शे प्रतिविम्बमुपागता ।
{ क्वचिद् व्यक्तं क्वचित् सूक्ष्मं नभः सर्वत्र तिष्ठति ॥६४॥
{ यथा तथा चिदाकाशं धीदेशेऽन्यत्र च स्थितम् ।
चिदाकाशमयं विश्वं यतोऽतो धीरितस्ततः ॥ ६५ ॥
भ्रमन्ती तत्र तत्रैव भासतेऽर्के घटादिवत् ।
धर्माधर्मौ जन्ममृत्यू सुखदुःखादि चाऽखिलम् ॥ ६६ ॥
जाग्रत्यपि मृषा स्वप्न इव जन्मादिकं मम ।
{ दृश्ययोगवियोगाभ्यां चितो जन्मविनाशधीः ॥ ६७ ॥
{ अभिव्यक्त्यनभिव्यक्तिदोषाभ्यां वह्निनो यथा ।
महासुषुप्तौ भवजन्ममृत्यु-
दुःस्वप्नधाराः क्षणभङ्गुरा धियः ।
पश्याम्यहं ताभिरलिप्तरूपो
घनैरुपेतैर्विगतैः रवेः किम् ॥ ६८ ॥
इत्येवं सततं ध्यायन्नेकाग्रमनसा सुधीः ।
साक्षात्करोत्यात्मतत्त्वं वागगोचररूपतः ॥ ६९ ॥

स्वरूपं निर्मलं शान्तं मनस्त्यजति चेत् क्षणम् ।
तदैव दृश्यसंस्कारशेषात् सङ्गृह्यतीन्द्रियम् ॥ ७० ॥
उत्थितानुत्थितांस्तत्र इन्द्रियारीन् पुनः पुनः ।
विवेकेनैव वज्रेण हन्यादिन्द्रो गिरीनिव ॥ ७१ ॥

इति श्रीविज्ञानभिक्षुविरचिते साङ्ख्यसारे राजयोगप्रकारपरिच्छेदः ।

अथ सप्तमः परिच्छेदः ।

एवमात्मानुभविनो जीवन्मुक्तस्य लक्षणम् ।
स्पष्टं वक्ष्ये भवेद् येन ज्ञानाज्ञानपरीक्षणम् ॥ १ ॥
श्रवणान्मननाद् वाऽऽपि अन्यथाऽऽत्मज्ञताभ्रमात् ।
कुर्याद् गुरुमविद्वांसं स्याच्चाऽज्ञो ज्ञाभिमान्यपि ॥ २ ॥
नैश्वर्यानागतज्ञत्वादिकं ज्ञानस्य लक्षणम् ।
तद्दृतेऽपि हि कैवल्यं योगभाष्यकृतेरितम् ॥ ३ ॥
श्रौतस्मार्तानि वाक्यानि ज्ञानिनो मोक्षभागिनः ।
लक्षकाण्येव लिख्यन्ते विश्वासातिशयाय वै ॥ ४ ॥
यत्र सर्वाणि भूतानि आत्मैवाऽभूद् विजानतः ।
तत्र को मोहः कः शोक एकत्वमनुपश्यतः ॥ ५ ॥
यः सर्वत्राऽनभिस्नेहस्तत् तत् प्राप्य शुभाशुभम् ।
नाऽभिनन्दति न द्वेष्टि तस्य प्रज्ञा प्रतिष्ठिता ॥ ६ ॥
न विस्मरति सर्वत्र यथा सततगो गतिम् ।
न विस्मरति निश्चेत्यं चिन्मात्रं प्राज्ञधीस्तथा ॥ ७ ॥
नोदेति नाऽस्तमायाति सुखे दुःखे मुखप्रभा ।
यस्यापूर्वस्थितिर्यस्य स जीवन्मुक्त उच्यते ॥ ८ ॥
यो जागर्त्ति सुषुप्तस्थो यस्य जाग्रन्न विद्यते ।

यस्य निर्वासनो बोधः स जीवन्मुक्त उच्यते ॥९॥
रागद्वेषभयादीनामनुरूपं चरन्नपि ।
योऽन्तर्व्योमवदत्यच्छः स जीवन्मुक्त उच्यते ॥ १० ॥
यस्य नाऽहङ्कृतो भावो बुद्धियस्य न लिप्यते ।
कुर्वतोऽकुर्वतो वाऽपि स जीवन्मुक्त उच्यते ॥ ११ ॥
अपि शीतरुचावर्कें अत्युष्णेऽपीन्दुमण्डले ।
अप्यधःप्रसवत्यग्नौ जीवन्मुक्तो न चाऽन्यधीः ॥ १२ ॥
चिदात्मन इमा नित्यस्फुरन्तीह शक्तयः ।
इत्यस्याऽऽश्चर्यजालेषु नाऽभ्युदेति कुतूहलम् ॥ १३ ॥
परव्यसनिनीं नारीं व्यग्राऽपि गृहकर्मणि ।
तदेवाऽऽस्वादयत्यन्तर्नवसङ्गरसायनम् ॥ १४ ॥
एवं तत्त्वे परे शुद्धे धीरो विश्रान्तिमागतः ।
तदेवाऽऽस्वादयत्यन्तर्बहिर्व्यवहरन्नपि ॥ १५ ॥
यो नित्यमध्यात्ममयो नित्यमन्तर्मुखः सुखी ।
गम्भीरश्च प्रसन्नश्च गिरावि महाह्रदः ॥ १६ ॥
परानन्दरसास्वादो रमते स्वात्मनाऽऽत्मनि ।
सर्वकर्मपरित्यागी नित्यहृष्टो निरामयः ॥ १७ ॥
न पुण्येन न पापेन नेतरेणाऽपि लिप्यते ।
येन केन चिदाच्छन्नो येन केन चिदागतः ॥ १८ ॥
यत्र क्वचन शायी च स सम्राडिव राजते ।
वर्णधर्माश्रमाचारशास्त्रमन्त्रनयेप्सितः ॥ १९ ॥
निर्गच्छति जगज्जालात् पञ्जरादिव केशरी ।
वाचामतीतविषमो विषयाग्राहगोचितः ॥ २० ।
कलामप्युपगतः शोभां शरदीव नभस्तलम् ।

निःस्तोत्रो निर्नमस्कारः पूज्यपूजाविवर्जितः ॥ २१ ॥
संयुक्तो वा वियुक्तो वा सदाचारनयक्रमैः ।
एतावदेव खलु लिङ्गमलिङ्गमूर्त्तेः
संप्राप्तसंसृतिचिरभ्रमनिर्वृतस्य ।
तद्यस्य यन्मदनकोपविषादलोभ-
मोहापदामनुदिनं निपुणं तनुत्वम् ॥ २२ ॥
तुर्यविश्रान्तियुक्तस्य प्रतीपस्य भवार्णवात् ।
न कृतेनाऽकृतेनाऽर्थो न श्रुतिस्मृतिविभ्रमैः ॥ २३ ॥
तनुं त्यजतु वा तीर्थे श्वपचस्य गृहेऽथवा । शिवो वाँ
ज्ञानसम्प्राप्तिसमये मुक्त एवाऽमलाशयः ॥ २४ ॥
न मोक्षो नभसः पृष्ठे न पाताले न भूतले ।
सर्वाशासङ्क्षये चेतःक्षयो मोक्ष इति श्रुतेः ॥ २५ ॥
जीवन्मुक्तपदं त्यक्त्वा स्वदेहे कालसात्कृते ।
विशत्यदेहमुक्तत्वं पवनोऽस्पन्दतामिव ॥ २६ ॥
अनाप्ताखिलशैलादिप्रतिबिम्बे हि यादृशी ।
स्याद् दर्पणे दृपेणता केवलात्मस्वरूपिणी ॥ २७ ॥
अहं त्वं जगदित्यादौ प्रशान्ते दृश्यसंभ्रमे ।
स्यात् तादृशी केवलता स्थिते द्रष्टर्यवोचणे ॥ २८ ॥
चिन्मात्रं चैत्यरहितमनन्तमजरं शिवम् ।
अनादिमध्यनिलयं यदनाधि निरामयम् ॥ २९ ॥
न शून्यं नाऽपि चाऽऽकारं न दृश्यं न च दर्शनम् ।
अनाख्यमनभिव्यक्तं तत् किञ्चिदवशिष्यते ॥ ३० ॥

इति श्रीविज्ञानभिक्षुविरचिते साङ्ख्यसारे जीवन्मुक्तिपरममुक्त्योः
परिच्छेदः ।

इति साङ्ख्यसारस्योत्तरभागः । साङ्ख्यसाराख्यं प्रकरणं समाप्तम् ।

ष्टाष्टाध्यायक सटीक सभाष्य	१०
सुश्रुत वैद्यक	४
गार्ङ्गधर (वैद्यक)	१
तानपञ्चविंशतिः	॥०
पातञ्जलदर्शन (सभाष्यसटीक)	४
आत्मतत्त्वविवेक (बौद्धाधिकार)	२
सुक्तिकोपनिषत्	⁄
उपमान चिन्तामणि	।०
नागानन्द नाटक	१
पूर्णप्रज्ञ दर्शनम् सभाष्य	२
चन्द्रशेखरचम्पूकाव्य	२
सामवेदस्य मन्त्र ब्राह्मणम् (भाष्य सहितम्)	२
सामवेदस्य आरण्यसंहिता	
णाचार्य कृत भाष्यसहिता	१
वेङ्कटमाधवभट्टकानाटिका सटीक	
कारण्डव्यूह (बौद्धशास्त्र)	२
कालिदास नाटक अभिज्ञानशाकुन्तल अलङ्कारसटीक	२
प्रियदर्शिका नाटिका सटीक	॥
सारस्वत व्याकरण सटीक	
र्द्धम्	१।
वासवदत्ता सटीक	२
(कालिदास कृत पुष्पबाण-	
विलास काव्य सटीक	॥
सहिष शतकम्, पदारविन्द	
तकम्, स्तुतिशतकम्, मन्दस्मित	
शतकम्, कटाक्षशतकम्,	१
मनुसंहिता टीका सहित	५
नैषधचरितम् टीका सहित	१०
चन्द्रालोक प्राचीन अलङ्कार	॥
शीरसमुद्रोदय (खनिशास्त्र)	१०

भावप्रकाश (वैद्यक)	१०
प्रबोधचन्द्रोदय नाटक सटीक	२
अनर्घराघवनाटक (मुरारिकृत)	२
दैवतब्राह्मण सभाष्य	१
षड्विंशब्राह्मणम् सभाष्य	१
मीमांसा परिभाषा	॥०
अर्थसंग्रह (लौगाक्षीमीमांसा)	॥०
रघुवंश सटीक	१॥०
मेघदूत सटीक	॥
कथासरित्सागर (सम्पूर्ण)	६
ईश्वरानुमानचिन्तामणि (गङ्गेशोपाध्याय कृत)	१
न्यायदर्शन सभाष्य सवृत्ति	२॥
सटीक वाल्मीकिरामायण बालकाण्डम्	२
साहित्यदर्पण टीकासहित अलङ्कार शास्त्र	४
मदनपालनिघण्टुः (वैद्यक)	१
संस्कृतशिक्षामञ्जरीप्रथमभागः	/
संस्कृतशिक्षामञ्जरीद्वितीयभागः	।०
साहित्यदर्पणम् (अलङ्कार)	१॥
श्रीहर्षचरित बाणभट्टकृत	२
अमरकोष	॥
वेदान्तसूत्र शङ्कराचार्यकृत शारीरकभाष्य तथा गोविन्दानन्द- कृत टीका सहित	१०
वेदान्तपरिभाषा	१
वेदान्तसारसटीक	
सटीक निदान (वैद्यक)	
कामन्दकी नीतिसार	
सङ्क्षिप्तसारसुतप्रकरण सटीक	

११० अत्रि, विष्णु, हारीत याज्ञवल्क्य, उशना, अङ्गिरा, यम, आपस्तम्ब, संवर्त्त, कात्यायन, बृहस्पति पराशर, व्यास, शङ्ख, लिखित, दक्ष गौतम शातातप वशिष्ठ प्रणीत संहिता (धर्मशास्त्र) १५

१११ मत्स्यपुराण ६

११२ चरकसंहिता(वैद्यक)सम्पूर्ण १०

११३ रसेन्द्रचिन्तामणि तथा रसरत्नाकर (वैद्यक) ६

११४ भगवद्गीता शङ्करभाष्य आनन्दगिरिकृतटीका तथा सुबोधिनीसमेत ५

११५ शब्दशक्तिप्रकाशिका १

११६ मालतीमाधव सटीक १॥

११७ सटीक भट्टिकाव्य ४

११८ सटीक काव्यप्रकाश ४

११९ सभाष्य शाण्डिल्यसूत्र ॥/

१२० लघुकौमुदीव्याकरणम् ॥०

१२१ महानाटकम्(हनुमन्नाटक) १

१२२ दशरूपकम्(अलङ्कार) १॥०

१२३ भोजचम्पू (भोजदेवकृत चम्पूरामायणम्) १

१२४ भारत चम्पूसटीक ४

१२५ मार्कण्डेयपुराणम् ५

१२६ गोलाध्यायः १

१२७ गणिताध्यायः १

१२८ पञ्चदशी (सटीक) २

१२९ पातञ्जलदर्शनस्य भोजवृत्तिः १

१३० प्रबुद्धरौहिणेयनाटक सटीक १

१३१ प्रबुद्धहास्यम्

१३२ बृहत्संहिता वा वाराहीसंहिता

१३३ तर्कामृत (जगदीशकृत)

१३४ द्वात्रिंशत्पुत्तलिका

१३५ उत्तररामचरित सटीक

१३६ शङ्करविजय १॥

१३७ मृच्छकटिकप्रकरण सटीक

१३८ काव्यादर्शसटीक(अलङ्कार)

१३९ अष्टाङ्गहृदय संहिता (वाग्भटकृत वैद्यक)

१४० शुक्रनीति सटीक

१४१ गीतगोविन्द सटीक

१४२ अग्निपुराणम्

१४३ विष्णुपुराणम् सटीक

१४४ मीमांसादर्शन सभाष्य

१४५ अध्यात्मरामायणम् सटी॰

१४६ महानिर्वाणतन्त्रम् सटीक ।

१४७ मीमांसादर्शनस्य अधिकरणमाला

१४८ श्रुतबोधः (छन्दोग्रन्थ)

१४९ बालरामायण नाटक सटी॰

१५० लिङ्गपुराणम्

१५१ चण्डकौशिकनाटक सटीक ।

१५२ चैतन्यचन्द्रोदयनाटक सटीक

१५३ कलापव्याकरणम्

१५४ कुसुमाञ्जलि सटीक

१५५ संगीत पारिजात

१५६ साङ्ख्यसार

कलिकाता संस्कृतविद्यामन्दिरे वि, ए, उपाधिधारिणः
श्रीउमेशानन्दविद्यासागर-भट्टाचार्यस्य-सकाशात् लभ्यानि॥

SANKHYA ṬATTWA KOUMUDI.

BY

VACHASPATI MISHRA

EDITED BY

DHARMADHIKARI DHUNDHIRAJA PANTA

SHARMANA

॥ साङ्ख्यतत्त्वकौमुदी ॥

निखिलतन्त्रमहामहोपाध्याय श्रीवाचस्पतिमिश्रविरचिता

धर्माधिकारिढुण्ढिराजपन्तशर्मणा

संशोधिता

Benares:

BRAJ B. DAS & Co.,

GENERAL BOOK AGENTS.

1873.

PRINTED AT THE BENARES PRINTING PRESS,

BY CHHANNU LAL.

नोपैते विद्यायैते दुःखैरिति नरो जीवः।
भगवान् सर्वभूतेषु लक्षितः स्वात्मना हरिः। दृश्यैर्बुद्ध्यादिभिर्द्रष्टा
लक्षणैरनुमापकैः॥
तामामनन्ति प्रकृतिं पुरुषार्थप्रवर्तिनीम्।
तद्दर्शिनमुदासीनं त्वामेव पुरुषं विदुः॥
पुरुषार्थविदः इतिशेषः
(श्रीपुराणम्०

ॐ तत्सत् परमात्मनेनमः

॥ साङ्ख्यतत्त्वकौमुदी ॥

वाचस्पतिमिश्रविरचिता ॥

पञ्चमः कपिलोनाम सिद्धेशः कालविप्लुतम् ।
प्रोवाचासुरये सांख्यं तत्त्वग्राम विनिर्णयम् ॥ भागवते ॥

॥ श्रीगणेशाय नमः ॥

॥ सांख्यसप्ततिः ॥

अजामेकां लोहितशुक्लकृष्णां बह्वीः प्रजाः सृजमानां नमामः ।
अजा ये तां जुषमाणां भजन्ते जहात्येनां भुक्तभोगां (2) अजोऽन्यः ॥
कपिलाय महामुनये मुनये शिष्याय तस्य चासुरये ।
पञ्चशिखाय तथेश्वरकृष्णायैते नमस्यामः ॥

इह खलु प्रतिपिप्सितमर्थं प्रतिपादयन् प्रतिपादयिताऽवधेयवचनो भवति प्रेक्षावताम् अप्रतिपिप्सितन्तु प्रतिपादयन्नायं लौकिको नापि परीक्षक इति प्रेक्षावद्भिरुन्मत्तवदुपेक्ष्येत स चैषां प्रतिपिप्सितोऽर्थो यो ज्ञातः सन् परमपुरुषार्थाय कल्पत इति प्रारिप्सितशास्त्रविषयज्ञानस्य परमपुरुषार्थसाधनहेतुत्वात्तद्विषयजिज्ञासामवतारयंति ।

दुःखत्रयाभिघाताज्जिज्ञासा तदपघातके हेतौ ।
दृष्टे सापार्था चेन्नैकान्तात्यन्ततोऽभावात् ॥ १ ॥

दुःखं शास्त्रविषयो न जिज्ञास्येत यदि दुःखं नाम जगति न स्यात् सर्वा न जिहासितं जिहासितं वा अशक्यसमुच्छेदम् अशक्यसमुच्छेदता च द्वेधा दुःखस्य नित्यत्वाद्वा तदुच्छेदोपायापरिज्ञानाद्वा, अशक्यसमुच्छेदत्वेऽपि च शास्त्रविषयस्य ज्ञानस्यानुपायाद्वा सुकर-

॥ सेवमानाम् प्रीयमाणाञ्च भोगं साधयन्ती ॥ (क)

स्योपायान्तरस्य सद्भावाद्वा । तत्र न तावद्दुःखं नास्ति नाप्यनिहासि-
तमित्यत उक्तं दुःखत्रयाभिघातादिति । दुःखानां त्रयं दुःखत्रयं
तत्तु आध्यात्मिकमाधिदैविकमाधिभौतिकञ्च । तत्राध्यात्मिकं द्वि-
विधं शारीरं मानसञ्च । शारीरं वातपित्तश्लेष्मणां वैषम्यनिमित्तं मान-
से कामक्रोधलोभमोहेर्ष्याविषादाप्रियसंयोगप्रियविप्रयोगक्षुत्तृड्जरा-
सर्व्वचेतनाधर्म्मानिष्टसंयोगादिनिमित्तं दुःखम् । एवमाध्यात्मिकं द्वयं
च दुःखं द्वेधा आधिभौतिकमाधिदैविकञ्च तत्राधिभौतिकं मानुष-
पशुपक्षिसरीसृपस्थावरनिमित्तम् आधिदैविकं यक्षराक्षसविनायकग्रहा-
द्यावेशनिबन्धनम् तदेतत् प्रत्यात्मवेदनीयं दुःखं रजःपरिणामभेदो
न शक्यते प्रत्याख्यातुम् । तदनेन दुःखत्रयेणान्तःकरणवर्त्तिना चे-
तनाशक्तेः प्रतिकूलाभिसम्बन्धो ऽभिघात इति । एतावता प्रति-
कूलवेदनीयत्वं जिहासाहेतुरुक्तः । यद्यपि च न सन्निरुध्यते दुःखं
तथापि तदभिभवः शक्यः कर्त्तुमित्युपरिष्टान्निवेदयिष्यते । तस्मादु-
पपन्नं तदपघातके हेताविति । तस्य दुःखत्रयस्यापघातकस्तदप-
घातकः उपसर्जनस्यापि बुद्ध्या समाकृष्टस्य तदा परामर्शः अपघा-
तकश्च हेतुः शास्त्रप्रतिपाद्यो नान्य इत्याशयः ।

अत्राशङ्क्यते दृष्टे सापार्था चेत् । अयमर्थः अस्तु दुःखत्रयं
जिहासितञ्च तद्भवतु भवतु च तच्छक्यहानं सहताञ्च शास्त्रगम्य
उपायस्तदुच्छेत्तुं तथाप्यत्र प्रेक्षावतां न युक्ता जिज्ञासा दृष्टस्यैवो-
पायस्य तदुच्छेदकस्य सुकरस्य विद्यमानत्वात् तत्त्वज्ञानस्य त्वनेक-
जन्माभ्यासपरम्परायाससाध्यतयातिदुष्करत्वात् । तथाच लौकिका-
न्यायः
गृहकोणे नामाभाणुकः । अथ वित्तमनु विन्देत किमर्थं पर्व्वतं व्रजेत् । इष्ट-
स्यार्थस्य संसिद्धौ को विद्वान् यत्नमाचरेदिति । सन्ति चोपायाः बल-
वन्तः शारीरदुःखप्रतीकारायेषत्करा भिषग्भिरुपदिष्टाः । मानसस्याधि

सन्तापस्य प्रतीकाराय मनोज्ञस्त्रीपानभोजनविलेपनवस्त्रालङ्कारादि-विषयप्राप्तिरुपायः सुकरः । एवमाधिभौतिकदुःखस्य नीतिशास्त्राभ्यासकुशलतानिरत्ययस्थानाध्यासनादिः प्रतीकारहेतुरीषत्करः । तथाधिदैविकस्यापि दुःखस्य माणिमन्त्रौषधाद्युपयोगः सुकरः प्रतीकारोपाय इति । निराकरोति । नेति । कुतः, एकान्तात्यन्ततोऽभावात् । एकान्तो दुःखनिवृत्तेरवश्यम्भावः अत्यन्तो दुःखस्य निवृत्तस्य पुनरनुत्पादस्तयोरेकान्तात्यन्तयोरभाव एकान्तात्यन्ततोऽभाव इति । षष्ठीस्थाने सार्व्वविभक्तिकस्तसिः । एतदुक्तं भवति यथाविधिरसायनादिकामिनीनीतिशास्त्राभ्यासमन्त्राद्युपयोगेऽपि तस्य तस्याध्यात्मिकादेर्दुःखस्य निवृत्तेरदर्शनादनैकान्तिकत्वं, निवृत्तस्यापि पुनरुत्पत्तिदर्शनादनात्यन्तिकत्वमिति सुकरोऽप्येकान्तिकात्यन्तिकदुःखनिवृत्तेर्न दृष्ट उपाय इति नापार्थो जिज्ञासेत्यर्थः । यद्यपि दुःखममङ्गलं तथापि तत्परिहारार्थत्वेन तदपघातो मंगलमेवेति युक्तं शास्त्रादौ तत्कीर्त्तनमिति ॥ १ ॥

स्यादेतत् माभूदृष्ट उपायो वैदिकस्तु ज्योतिष्टोमादिः सहस्र संवत्सरपर्य्यन्तः कर्म्मकलापस्तापत्रयमेकान्तमत्यन्तञ्चापनेष्यति । श्रुतिश्च स्वर्गकामोयजेतेति । स्वर्गश्च यन्न दुःखेन सम्भिन्नं न च ग्रस्तमनन्तरम् । अभिलाषोपनीतञ्च यत् सुखं स्वःपदास्पदमिति ॥ दुःखविरोधी सुखविशेषश्च स्वर्गः स च स्वसत्तया समूलघातमपहन्ति दुःखं, न चैष क्षयी । तथाहि श्रूयते "अपाम सोममभृता अभूमेति" तत्प्रक्षये कुतोऽस्यामृतत्वसम्भवः । तस्माद्वैदिकस्येपायस्य तापत्रयप्रतीकारहेतोर्मुहूर्तयामाहोरात्रमाससंवत्सरादिनिर्वर्त्तनीयतयानेकजन्मपरम्परायाससम्पादनीयाद्विवेकज्ञानादीषत्करत्वात्पुनरप्यपार्था जिज्ञासा[illegible]क्ष्याह ।

दृष्टवदानुश्राविकः स ह्यविशुद्धिक्षयातिशययुक्तः ।
तद्विपरीतः श्रेयान् व्यक्ताव्यक्तज्ञविज्ञानात् ॥ २ ॥

गुरूपाठादनुश्रूयत इत्यनुश्रवो वेदः । एतदुक्तं भवति श्रूयत एव परं न तु केन चित् क्रियत इति तत्र भव आनुश्रविक इति तत्र प्राप्तो ज्ञात इति यावत् आनुश्रविकोऽपि कर्म्मकलापो दृष्टेन तुल्यवर्त्तत इति ऐकान्तिकात्यन्तिकदुःखप्रतीकारानुपायत्वस्योभयत्रापि तुल्यत्वात् । यद्यपि चानुश्रविक इति सामान्येनाभिहितं तथापि कर्म्मकलापाभिप्रायोद्रष्टव्यः विवेकज्ञानस्याप्यानुश्रविकत्वात् तथाच श्रूयते "आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो विज्ञातव्यः न स पुनरावर्त्तते न स पुनरावर्त्तते" इति । अस्यां प्रतिज्ञायां हेतुमाह स ह्यविशुद्धिक्षयातिशययुक्तः । अविशुद्धिः सोमादियागस्य पशुबीजादिवधसाधनता । यथाह स्म भगवान् पञ्चशिखाचार्य्यः 'स्वल्पः संकरः सपरिहारः सप्रत्यवमर्षः' इति । स्वल्पःसंकरः ज्योतिष्टोमादिजन्मनः प्रधानापूर्व्वस्य पशुहिंसादिजन्मनानर्थहेतुना अपूर्व्वेण । सपरिहारः कियतापि प्रायश्चित्तेन परिहर्त्तुं शक्यः । अथ प्रमादतः प्रायश्चित्तमपि नाचरितं प्रधानकर्म्मविपाकसमये च पच्यते तथापि यावदसौवनर्थं सूते तावत् सप्रत्यवमर्षः प्रत्यवमर्षेण सहिष्णुतया सह वर्त्तत इति मृष्यन्ते हि पुण्यसम्भारोपनीतस्वर्गसुधामहाह्रदावगाहिनः कुशलाः पापमात्रोपपादितां दुःखवाह्निकणिकाम् ।

न च मा हिंस्यात् सर्व्वा भूतानीति सामान्यशास्त्रं विशेषशास्त्रेणाग्नीषोमीयं पशुमालभेतेत्यनेन बाध्यत इति युक्तं, विरोधाभावात् विरोधे हि बलीयसा दुर्बलं बाध्यते । नचेहास्ति काश्चिद्विरोधः भिन्नविषयत्वात् तथाच न हिंस्यादिति निषेधेन हिंसाया अनर्थहेतुभावो ज्ञाप्यते न त्वकरणत्वमपि अग्नीषोमीयं पशुमालभेतेत्यनेन तु पशुहिंसायाः कर्त्तव-

र्थत्वमुच्यते नानर्थहेतुत्वं नावस्तुत्वात् सति वाक्यभेदप्रसङ्गात् न चा-
नर्थहेतुत्वकृतोपकारकत्वयोः काश्चिद्विरोधः हिंसा हि पुरुषस्य दोषमा-
वक्ष्यति कृतोश्चोपकारिष्यतीति ।

क्षयातिशयौ च फलमतावप्युपाये उपचरितौ क्षयित्वञ्च स्वर्गा-
देः सत्त्वे सति कार्य्यत्वादनुमितमिति । ज्योतिष्टोमादयः स्वर्गमात्र-
स्य साधनं वाजपेयादयस्तु स्वाराज्यस्येत्यतिशययुक्तत्वम् । परसम्पदु-
त्कर्षो हि हीनसम्पदं पुरुषं दुःखा करोति । अपाम सोममृता अभूमे-
ति चामृतत्वाभिधानं चिरस्थेयमानमुपलक्षयति । यदाहुः 'आभूतसंप्लवं
स्थानममृतत्वं हि भाष्यते' इति अत एव च श्रुतिः 'न कर्म्मणा न
प्रजया धनेन त्यागेनैके अमृतत्वमानशुः । परेण नाकं निहितं गुहायां
विभ्राजते यद्यतयो विशन्ति' । तथा 'कर्म्मणा मृत्युमृतयो निषेदुः प्र-
जावन्तो द्रविणमीहमानाः । तथा परे ऋषयो मनीषिणः परं कर्म्म-
ण्यो ऽमृतत्वमानशु'रिति । तदेतत्सर्व्वमभिप्रेत्याह, तद्विपरीतः श्रेयान्
तस्मादानुश्राविकादुःखापघातकादुपायात् सोमादेरविशुद्धादनित्यसा-
तिशयफलाद्विपरीतो विशुद्धो हिंसादिसंकराभावान्नित्यनिरतिशयफलो-
ऽसकृदपुनरावृत्तिश्रुतेः । न च कार्य्यत्वेनानित्यता फलस्य युक्ता भाव
कार्य्यस्य तथात्वात् दुःखप्रध्वंसस्य तु कार्य्यस्यापि तद्वैपरीत्यात् । न
च दुःखान्तरोत्पादः कारणाप्रवृत्तौ कार्य्यानुत्पादात् विवेकज्ञानोपज-
ननपर्य्यन्तत्वाच्च कारणप्रवृत्तेः । एतच्चोपरिष्टादुपपादयिष्यते ।

अक्षरार्थस्तु तस्मादानुश्राविकादुःखापघातकाद्धेतोर्विपरीतः सत्त्व-
पुरुषान्यताप्रत्ययः साक्षात्कारो दुःखापघातको हेतुः अत एव श्रेयान्
आनुश्राविको हि वेदविहितत्वान्मात्रया दुःखापघातकत्वाच्च प्रशस्यः।
सत्त्वपुरुषान्यताप्रत्ययो ऽपि प्रशस्यः तदनयोः प्रशस्ययोर्मध्ये सत्त्व-
पुरुषान्यताप्रत्ययः श्रेयान् । कुतः पुनरस्योत्पत्तिरित्यत उक्तं व्यक्ता-

व्यक्ताव्यक्तज्ञविज्ञानात् व्यक्तञ्चाव्यक्तञ्च ज्ञश्च व्यक्ताव्यक्तज्ञाः तेषां विज्ञानं विवेकेन ज्ञानम् । व्यक्तज्ञानपूर्व्वकमव्यक्तस्य तत्कारणस्य ज्ञानं तयोश्च पारार्थ्येनात्मा परो ज्ञायत इति ज्ञानक्रमेणाभिधानम् । एतदुक्तम्भवति श्रुतिस्मृतीतिहासपुराणेभ्यो व्यक्तादीन् विवेकेन श्रुत्वा शास्त्रयुक्तया च व्यवस्थाप्य दीर्घकालादरनैरन्तर्य्यसत्कारसेवितात् भावनामयाद्विज्ञानादिति । तथाच वक्ष्यति । एवं तत्त्वाभ्यासान्नास्मि न मे नाहमित्यपरिशेषम् । अविपर्य्ययाद्विशुद्धं केवलमुत्पद्यते ज्ञानमिति ॥ ५ ॥

तदेवं प्रेक्षावदपेक्षितार्थत्वेन शास्त्रारम्भं समाधाय शास्त्रमारभमाणः श्रोतृबुद्धिसमवधानाय तदर्थं संक्षेपतः प्रतिजानीते ।

मूलप्रकृतिरविकृतिर्महदाद्याः प्रकृतिविकृतयः सप्त ।
षोड़शकस्तु विकारो न प्रकृतिर्न विकृतिः पुरुषः ॥ ३ ॥

संक्षेपतो हि शास्त्रार्थस्य चतस्रो विधाः काश्चिदर्थः प्रकृतिरेव काश्चिदर्थो विकृतिरेव काश्चित् प्रकृतिविकृतिः काश्चिदनुभयरूप इति । तत्र का प्रकृतिरेवेत्यत उक्तम् मूलप्रकृतिरविकृतिः प्रकरोतीति प्रकृतिः प्रधानं सत्त्वरजस्तमसां साम्यावस्था सा अविकृतिः प्रकृतिरेवेत्यर्थः कस्मादित्यत उक्तम् मूलेति मूलञ्चासौ प्रकृतिश्चेति मूलप्रकृतिः विश्वस्य कार्य्यसंघातस्य सा मूलं न त्वस्या मूलान्तरमस्ति अनवस्थाप्रसङ्गात् । न चानवस्थायां प्रमाणमस्तीति भावः । कतमाः पुनः प्रकृतिविकृतयः कियत्यश्चेयत उक्तम् महदाद्याः प्रकृतयश्च विकृतयश्च ता इति प्रकृतिविकृतयः सप्तेति । तथाहि महत्तत्त्वमहङ्कारश्च प्रकृतिर्विकृतिश्च मूलप्रकृतेः एवमहङ्कारतत्त्वे तन्मात्राणामिन्द्रियाणाञ्च प्रकृतिर्विकृतिश्च महतः एवं पञ्च तन्मात्राणि तत्त्वानि भूतानामाकाशादीनाम् प्रकृतयो विकृतयश्चाहङ्कारस्य । अथ का विकृतिरेव

कियती चेयत उक्तं षोड़शकस्तु विकार इति षोड़शसंख्यापरिमितो गणः षोड़शकः । तुशब्दोऽवधारणे भिन्नक्रमश्च पञ्च महाभूतान्येकादशेन्द्रियाणि चेति षोडशको गणो विकार एव न प्रकृतिरिति । यद्यपि च पृथिव्यादीनामपि गोघटवृक्षादयो विकाराः एवं तद्विकारभेदानां पयोबीजादीनां दध्यङ्कुरादयस्तथापि गवादयो बीजादयो वा न पृथिव्यादिभ्यस्तत्त्वान्तरं तत्त्वान्तरोपादानत्वञ्च प्रकृतित्वमिहाभिप्रेतमिति न दोषः । सर्व्वेषां गोघटादीनां स्थूलेन्द्रियग्राह्यता च समेति न तत्त्वान्तरत्वम् । अनुभयरूपमुक्तं तदाह न प्रकृतिर्न विकृतिः पुरुष इति । एतच्च सर्व्वमुपरिष्टादुपपादयिष्यते ॥ ३ ॥

तामिममर्थं प्रामाणिकं कर्त्तुमभिमताः प्रमाणभेदा लक्षणीयाः न च सामान्यलक्षणमन्तरेण शक्यं विशेषलक्षणं कर्त्तुमिति प्रमाणसामान्यं तावल्लक्षयति ।

दृष्टमनुमानमाप्तवचनं च सर्व्वप्रमाणसिद्धत्वात् ।
त्रिविधम्प्रमाणमिष्टम्प्रमेयसिद्धिः प्रमाणाद्धि ॥ ४ ॥

अत्र च प्रमाणमिति समाख्या लक्ष्यपदं तन्निर्व्वचनञ्च लक्षणम् प्रमीयतेऽनेनेति निर्व्वचनात् प्रमां प्रति करणत्वं गम्यते । असन्दिग्धाविपरीतानधिगतविषया चित्तवृत्तिर्बोधश्च पौरुषेयः फलं प्रमा तत्साधनम्प्रमाणमिति । अनेन संशयविपर्य्ययस्मृतिसाधनेष्वप्रसङ्गः । संख्याविप्रतिपत्तिं निराकरोति । त्रिविधमिति । तिस्रो विधा अस्य प्रमाणसामान्यस्य त्रिविधमिति न न्यूनं नाप्यधिकमित्यर्थः । विशेषलक्षणानन्तरमेवैतदुपपादयिष्यामः । कतमाः पुनस्ता विधा इत्यत आह दृष्टमनुमानमाप्तवचनं चेति । एतच्च लौकिकप्रमाणाभिप्रायम् लोकव्युत्पादनार्थत्वाच्छास्त्रस्य तस्यैवात्राधिकारात् आर्षन्तु विज्ञानं योगिनामूर्ध्वस्रोतसाञ्च न लोकव्युत्पादनायालमिति सदापि नाभिहितमाधि-

कारात् । स्यादेतत् मा भूत्यूनमधिकन्तु कस्मान्न भवति, सांगीरन्ने हि वादिन उपमानादीन्यपि प्रमाणानीत्यत आह, सर्व्वप्रमाणसिद्धत्वादिति । एष्वेव दृष्टानुमानाप्तवचनेषु सर्व्वेषां प्रमाणानां सिद्धत्वादन्तर्भावादित्यर्थः एतच्चोपपादयिष्यत इत्युक्तम् । अथ प्रमेयव्युत्पादनाय प्रवृत्तं शास्त्रं कस्मात् प्रमाणं सामान्यतो विशेषतश्च लक्षयतीत्यत आह प्रमेयसिद्धिः प्रमाणाद्धीति । सिद्धिः प्रतीतिः । सेयमार्ष्या अर्थक्रमानुरोधेन पाठक्रममनादृत्य व्याख्याता ॥ ४ ॥

सम्प्रति प्रमाणविशेषलक्षणावसरे प्रत्यक्षस्य प्रमाणेषु ज्येष्ठत्वमद्धीनत्वाच्चानुमानादीनां सर्व्ववादिनामविप्रतिपत्तेश्च तदेव तावल्लक्षयति ।

प्रतिविषयाध्यवसायो दृष्टं त्रिविधमनुमानमाख्यातम् ।
तल्लिङ्गलिङ्गिपूर्व्वकमाप्तश्रुतिराप्तवचनन्तु ॥ ५ ॥

अत्र दृष्टमिति लक्ष्यनिर्देशः परिशिष्टन्तु लक्षणं समानासमानजातीयव्यवच्छेदो लक्षणार्थः । अवयवार्थस्तु विसिन्वन्ति विषयिणमनुवर्त्तन्ति स्वेन रूपेण निरूपणीयं कुर्व्वन्तीति यावत् विषयाः शब्दादयः सुखादयश्चास्मदादीनामविषयाश्च तन्मात्रलक्षणा योगिनामूर्ध्वस्रोतसाञ्च विषयाः । विषयंविषयं प्रति वर्त्तते इति प्रतिविषयमिन्द्रियं वृत्तिश्च सन्निकर्षः अर्थसन्निकृष्टमिन्द्रियमित्यर्थः तस्मिन्नध्यवसायस्तदाश्रित इत्यर्थः अध्यवसायश्च बुद्धिव्यापारो ज्ञानम् उपात्तविषयाणामिन्द्रियाणां वृत्तौ सत्यां बुद्धेस्तमोऽभिभवे सति यः सत्त्वसमुद्रेकः सोऽध्यवसाय इति वृत्तिरिति ज्ञानमिति चाख्यायते इदं ततं प्रमाणम् अनेन यश्चेतनाशक्तेरनुग्रहस्तत् फलं प्रमा बोधः । बुद्धितत्त्वं हि प्राकृतत्वादचेतनमिति तदीयोऽध्यवसायोऽप्यचेतनो घटादिवत् एवं हि बुद्धितत्त्वस्य सुखादयोऽपि परिणामभेदा अचे

नाः पुरुषस्तु सुखाद्यनुषङ्गी चेतनः सोऽयं बुद्धितत्त्वप्रतिनो ज्ञान-
सुखादिना तत्प्रतिबिम्बितरूपतया ज्ञानसुखादिमानिव भव-
तीति चेतनोऽनुगृह्यते चितिच्छायापत्त्या चाचेतनापि बुद्धिस्तदध्यव-
सायोऽप्यचेतनश्चेतन इव भवतीति। तथाच वक्ष्यति। तस्मात्तत्संयोगा-
दचेतनं चेतनावदिव लिङ्गम्। गुणकर्तृत्वेऽपि तथा कर्त्तेव भवत्यु-
दासीन इति। अत्राध्यवसायग्रहणेन संशयं व्यवच्छिनत्ति संशय-
स्य अनवस्थितग्रहणेनानिश्चितरूपत्वात् निश्चयोऽध्यवसाय इत्यनर्था-
रम्। विषयग्रहणे चासद्विषयं विपर्ययमपाकरोति प्रतिग्रहणेन चे-
न्द्रियार्थसन्निकर्षसूचनादनुमानस्मृत्यादयः पराहता भवन्ति। तदेवं
समानासमानजातीयव्यवच्छेदकत्वात् प्रतिविषयाध्यवसाय इति दृष्टस्य
सम्पूर्णं लक्षणम्। लक्षणान्तराणि तु तैर्थिकानां न दूषितानि वि-
स्तरभयादिति

नानुमानम्प्रमाणमिति वदता लौकायतिकेनाप्रतिपन्नः सन्दि-
ग्धो विपर्य्यस्तो वा पुरुषः कथं प्रतिपाद्येत न च पुरुषान्तरगता अ-
ज्ञानसन्देहविपर्यासाः शक्या अर्व्वागदृशा प्रत्यक्षेण प्रतिपत्तुं नापि
मानान्तरेण, अनभ्युपगमात्, अनवधृताज्ञानसंशयविपर्य्यासस्तु यं क-
ञ्चित् पुरुषं प्रति प्रवर्त्तमानोऽनवधेयवचनतया प्रेक्षावद्भिरुन्मत्तवदु-
पेक्ष्येत तदनेनाज्ञानादयः परपुरुषवर्त्तिनोऽभिप्रायभेदाद्वचनभेदाद्वा
लिङ्गादनुमातव्या इत्यकामेनाप्यनुमानम्प्रमाणमभ्युपेतव्यम्। तत्र
प्रत्यक्षकार्य्यत्वादनुमानं प्रत्यक्षानन्तरं लक्षणीयं तत्रापि सामान्यल-
क्षणपूर्व्वकत्वाद्विशेषलक्षणस्यानुमानसामान्यं तावल्लक्षयति। तल्लिङ्ग-
लिङ्गिपूर्व्वकमिति। लिङ्गं व्याप्यं लिङ्गि व्यापकं शङ्कितसमारो-
पितोपाधिनिराकरणेन वस्तु स्वभावप्रतिबद्धं व्याप्यं येन च प्रतिबद्धं
तद्व्यापकम्। लिङ्गलिङ्गिग्रहणेन च विषयवाचिना विषयिणं म-

स्यमुपलक्षयति धूमादिर्व्याप्यो वह्न्यादिर्व्यापक इति यः प्रत्ययस्तत्पूर्व्वकम् । लिङ्गिग्रहणञ्चावर्त्तनीयं तेन लिङ्गमस्यास्तीति पक्षधर्म्मताज्ञानमपि दर्शितं भवति । तद्व्याप्यव्यापकभावपक्षधर्म्मताज्ञानपूर्व्वकमनुमानमित्यनुमानसामान्यं लक्षितम् । अनुमानविशेषान् तन्त्रान्तरलक्षितान् अभिमतान् स्मारयति । त्रिविधमनुमानमाख्यातं तदिति । तत्सामान्यतोलक्षितमनुमानं विशेषतस्त्रिविधम् पूर्व्ववच्छेषवत्सामान्यतोदृष्टञ्च । तत्र प्रथमं तावत् द्विविधं वीतमवीतञ्च अन्वयमुखेन प्रवर्त्तमानं विधायकं वीतं व्यतिरेकमुखेन प्रवर्त्तमानं निषेधकमवीतम् । तत्रावीतं शेषवत् शिष्यते परिशिष्यते इति शेषः सएव विषयतया यस्यास्त्यनुमानज्ञानस्य तच्छेषवत् । यदाहुः प्रसक्तप्रतिषेधेऽन्यत्राप्रसङ्गाच्छिष्यमाणे सम्प्रत्ययः परिशेषइति । अस्य चावीतस्य व्यतिरेकिण उदाहरणमग्रेऽभिधास्यते । वीतञ्च द्वेधा पूर्व्ववत् सामान्यतोदृष्टञ्च । तत्रैकं दृष्टस्वलक्षणसामान्यविषयं यत् तत्पूर्व्ववत् पूर्वं प्रसिद्धं दृष्टस्वलक्षणसामान्यमिति यावत् तदस्य विषयत्वेनास्त्यनुमानज्ञानस्येति पूर्व्ववत् । यथा धूमाद्वह्नित्वसामान्यविशेषः दर्शनेऽनुमीयते तस्य च वह्नित्वसामान्यविशेषस्य स्वलक्षणवह्निविशेषो दृष्टो रसवत्त्वम् । अपरञ्च वीतं सामान्यतोदृष्टम् अदृष्टस्वलक्षणसामान्यविषयं यथेन्द्रियविषयमनुमानम् । अत्र हि रूपादिज्ञानानां क्रियात्वेन करणत्वमनुमीयते । यद्यपि च करणत्वसामान्यस्य छिदादौ वास्वादि स्वलक्षणमुपलब्धं तथापि यज्जातीयं रूपादिज्ञाने करणत्वमनुमीयते तज्जातीयस्य करणत्वस्य न दृष्टं स्वलक्षणं प्रत्यक्षेण, इन्द्रियजातीयं हि तत् करणं नचेन्द्रियत्वस्य सामान्यस्य स्वलक्षणमिन्द्रियविशेषः प्रत्यक्षगोचरेऽर्व्वाग्दृशां यथा वह्नित्वस्य सामान्यस्य स्वलक्षणं वह्निः । सोऽयं पूर्व्ववतः सामान्यतोदृष्टात् सत्यपि वीतत्वेन

तुल्यत्वे विशेषः। अत्र दृष्टे दर्शनं सामान्यतइति सामान्यस्य सार्व-
भौमत्वसिद्धिः। अदृष्टस्वलक्षणस्य सामान्यविशेषस्य दर्शनमनुमा-
नमित्यर्थः सर्वञ्चैतदस्माभिर्न्यायवार्त्तिकतात्पर्य्यटीकायां व्युत्पादितं
नेहोक्तं विस्तरभयादिति।

प्रयोक्तृवृद्धशब्दश्रवणसमनन्तरम् प्रयोज्यवृद्धप्रवृत्तिहेतुकज्ञा
नानुमानपूर्वकत्वाच्छब्दार्थसम्बन्धग्रहणस्य स्वार्थसम्बन्धज्ञानसहकारि-
णश्च शब्दस्यार्थप्रत्यायकत्वादनुमानपूर्वकत्वमित्यनुमानानन्तरं शाब्दं
लक्षयति। आप्तश्रुतिरित्यादि। तत्राप्तवचनमिति लक्ष्यनिर्देशः
पारिशिष्टं लक्षणम् आप्ता प्राप्ता युक्तेति यावत्, आप्ता चासौ श्रुतिश्चेति
आप्तश्रुतिः श्रुतिर्वाक्यजनितं वाक्यार्थज्ञानं तच्च स्वतः प्रमाणम् अ-
पौरुषेयवेदवाक्यजनितत्वेन च सकलदोषाशङ्काविनिर्मुक्तेर्युक्तं भ-
वति एवं वेदमूलस्मृतीतिहासपुराणवाक्यजनितमपि ज्ञानं युक्तम् आ-
दिविदुषश्च कपिलस्य कल्पादौ कल्पान्तराधीतश्रुतिस्मरणसम्भवः
सुप्तप्रबुद्धस्येव पूर्वेद्युरवगतानामर्थानामपरेद्युः। तथाचावट्यजैगीषव्य-
संवादे भगवान् जैगीषव्यो दशमहाकल्पवर्त्तिजन्मस्मरणमात्मन उवाच
दशसु महाकल्पेषु विपरिवर्त्तमानेन मयेत्यादिना ग्रन्थसन्दर्भेण। आ-
प्तग्रहणेन चायुक्ताः शाक्यभिक्षुनिर्ग्रन्थकसंसारमोचकादीनामागमा-
भासा निरस्कृता भवन्ति। अयुक्तत्वं चैतेषां विप्रलम्भात् छिन्नमूलत्वात् प्र-
माणविरुद्धार्थाभिधानात् कैश्चिदेव च म्लेच्छादिभिः पुरुषापसदैः प-
रिग्रहाद्बोद्धव्यम्। तुशब्देनानुमानाद्व्यवच्छिनत्ति वाक्यार्थो
हि प्रमेयो न तु तद्धर्मो वाक्यं येन तत्र लिङ्गं भवेत् न च वाक्यं वा-
क्यार्थं बोधयत्सम्बन्धग्रहणमपेक्षते अभिनवकविविरचितस्य वाक्य-
स्यादृष्टपूर्वस्याननुभूतचरवाक्यार्थबोधकत्वादिति।

एवं प्रमाणसामान्यलक्षणेषु विशेषलक्षणेषु च सत्सु यानि प्र-

माणान्तराण्युपमानादीन्यप्युपेयन्ते प्रतिवादिभिस्तानुक्तलक्षणेषु प्रमाणेषु अन्तर्भवन्ति । तथाहि । [illegible] यथा गौस्तथा गवय इति वाक्यं तज्जनिता धीरागम एव । योऽप्ययं गवयशब्दो गोसदृशस्य वाचक इति प्रत्ययः सोऽप्यनुमानं यो हि शब्दो यत्र वृद्धैः प्रयुज्यते सोऽसति वृत्त्यन्तरे तस्य वाचको यथा गोशब्दो गोत्वस्य । प्रयुज्यते चैष गवयशब्दो गोसदृशे इति तस्यैव वाचक इति ज्ञानमनुमानमेव यत्तु गवयस्य चक्षुःसन्निकृष्टस्य गोसादृश्यज्ञानं तत् प्रत्यक्षम्। अत एव स्मर्य्यमाणायां गवि गवयसादृश्यज्ञानं प्रत्यक्षं न स्यात् गवि सादृश्यमन्यच्च गवये भूयोऽवयवसामान्ययोगो हि जात्यन्तरवर्त्ती जात्यन्तरे सादृश्यमुच्यते सामान्ययोगश्चैकः स चेद्गवये गृहीतो गव्यपि तथेति नोपमानस्य प्रमेयान्तरमस्ति, यत्र प्रमाणमुपमानं भवेदिति न प्रमाणान्तरमुपमानम् । एवमर्थापत्तिरपि न प्रमाणान्तरं तथाहि जीवतश्चैत्रस्य गृहाभावदर्शनेन बहिर्भावस्यादृष्टस्य कल्पनमर्थापत्तिरभिमता वृद्धानां साप्यनुमानमेव यदा खल्वव्याप्तिः सन्नेकत्र नास्ति तदान्यत्रास्ति यदाऽव्यापकएकत्रास्ति तदान्यत्र 'नास्तीति सुकरः स्वशरीरे व्याप्तिग्रहः । तथाच सतो गृहाभावदर्शनेन लिङ्गेन बहिर्भावदर्शनमनुमानमेव न च चैत्रस्य क्वचित् सत्त्वेन गृहाभावः शक्योऽपन्होतुं येनासिद्धो गृहाभावो बहिर्भावे न हेतुःस्यात् न च गृहाभावेन वा सत्त्वमपन्हूयेत येन सत्त्वमेवानुपपद्यमानमात्मानं न बहिरवस्थापयेत् तथाहि चैत्रस्य गृहासत्त्वेन सत्त्वमात्रं वा विरुध्यते, गृहसत्त्वं वा न तावदत्र क्व चन सत्त्वस्यास्ति विरोधो गृहासत्त्वेन भिन्नविषयत्वात् देशसामान्येन गृहविशेषाक्षेपोऽपि पाक्षिक इति समान विषयतया विरोध इति चेन्न । प्रमाणनिश्चितस्य गृहेऽसत्त्वस्य पाक्षिकतया सांशयिकेन गृहसत्त्वेन प्रतिक्षेपायोगात् नापि प्रमाणनिश्चि

तो गृहाभावः पार्श्विकस्य गृहसत्त्वं प्रतिक्षिपन् सत्त्वमपि प्रतिक्षेप्तुं सांशयिकत्वं वापनेतुमर्हतीति युक्तं, गृहावच्छिन्नेन चैत्राभावेन गृहसत्त्वं विरुद्धत्वात् प्रतिक्षिप्यते न तु सत्त्वमात्रं, तस्य तत्रौदासीन्यात्। तस्मात् गृहाभावेन लिङ्गेन सिद्धेन सतो बहिर्भावो ऽनुमीयत इति युक्तम्। एतेन विरुद्धयोः प्रमाणयोर्विषयव्यवस्थया विरोधापादनमर्थापत्तेर्विषय इति परास्तम्, अवच्छिन्नानवच्छिन्नयोर्विरोधाभावात्। उदाहरणान्तराणि चार्थापत्तेरेवमेवानुमाने ऽन्तर्भावनीयानीति। तस्मान्नानुमानात् प्रमाणान्तरमर्थापत्तिरिति सिद्धम्। एवमभावो ऽपि प्रत्यक्षमेव, न हि भूतलस्य परिणामविशेषात् कैवल्यलक्षणात् अन्यो घटाभावो नाम, प्रतिक्षणपरिणामिनो हि सर्व एव भावा ऋते चितिशक्तेः स च परिणामभेद ऐन्द्रियक इति नास्ति प्रत्यक्षानवरुद्धो विषयो यत्राभावाख्यं प्रमाणान्तरमभ्युपेयमिति। सम्भवस्तु यथा खार्ष्यां द्रोणाढकप्रस्थाद्यवगमः स चानुमानमेव, खारीत्वं हि द्रोणाद्यविनाभूतं प्रतीतं खार्ष्यां द्रोणादिसत्त्वमवगमयतीति। यच्चानिर्दिष्टप्रवक्तृकं प्रवादपारम्पर्यमात्रमिति होचुर्वृद्धा [illegible], यथा, इह वटे यक्षः प्रतिवसतीति, न तत् प्रमाणमनिर्दिष्टप्रवक्तृकत्वेन सांशयिकत्वात् आप्तप्रवक्तृकत्वनिश्चये त्वागमं इत्युपपन्नं त्रिविधमेव प्रमाणमिति ॥ ५ ॥

एवन्तावद्व्यक्ताव्यक्तज्ञलक्षणप्रमेयसिद्ध्यर्थं प्रमाणानि लक्षितानि। तत्र व्यक्तं पृथिव्यादि स्वरूपतः पांशुलपादको हालिको ऽपि प्रत्यक्षतः प्रतिपद्यते पूर्ववता चानुमानेन धूमादिदर्शनात् वह्न्यादीति तद्व्युत्पादनाय मन्दप्रयोजनं शास्त्रमिति दुरधिगममनेन व्युत्पादनीयम्। तत्र यत् प्रमाणं यत्र समर्थं तदुक्तलक्षणेभ्यः प्रमाणेभ्यो निष्कृष्य दर्शयति।

[illegible] सहिता

सामान्यतस्तु दृष्टादतीन्द्रियाणां प्रतीतिरनुमानात् ।
तस्मादपि चासिद्धं परोक्षमाप्तागमात् सिद्धम् ॥ ६ ॥

तुशब्दः प्रत्यक्षपूर्ब्ववद्व्यावृत्तिं विशिनष्टि । सामान्यतोदृष्टादनुमानादध्यवसायादतीन्द्रियाणां प्रधानपुरुषादीनाम् प्रतीतिरभिधानाभिधेयसम्बन्धयोः । उपलब्धिकारणस्य शेषवत इत्यपि द्रष्टव्यम् । तत् किं सर्व्वेष्वतीन्द्रियेषु सामान्यतोदृष्टमेव प्रवर्त्तते तथा च यत्र तन्नास्ति महदाद्यारम्भक्रमे स्वर्गापूर्ब्वदेवतादौ च तेषामभावः प्राप्त इत्यत आह । तस्मादपीति । तस्मादपीत्येतावतैव सिद्धे चकारेण शेषवत इत्यपि समुच्चितमिति ॥ ६ ॥

स्यादेतत् । यथा गगनकुसुमकूर्म्मरोमशशविषाणादिषु प्रत्यक्षमप्रवर्त्तमानं तदभावमवगमयति एवं प्रधानादिष्वपि तत् कथं तेषां सामान्यतोदृष्टादिभ्यः सिद्धिरित्यत आह ।

अतिदूरात् सामीप्यादिन्द्रियघातान्मनोऽनवस्थानात् ।
सौक्ष्म्याद्व्यवधानादभिभवात् समानाभिहाराच्च ॥ ७ ॥

अनुपलब्धिरिति वक्ष्यमाणं सिंहावलोकितन्यायेनानुषञ्जनीयम् यथा उत्पतन् वियति पतत्री अतिदूरतया सन्नपि प्रत्यक्षेण नोपलभ्यते, सामीप्यादित्यत्राप्यतिरनुवर्त्तनीयः यथा लोचनस्थमञ्जनमतिसामीप्यान्न दृश्यते, इन्द्रियघातोऽन्धत्वबधिरत्वादिः, मनोऽनवस्थानात् यथा कामाद्युपहतमनाः स्फीतालोकमध्यवर्त्तिनमिन्द्रियसन्निकृष्टमप्यर्थं न पश्यति, सौक्ष्म्यात् यथा इन्द्रियसन्निकृष्टं परमाण्वादि प्रणिहितमना अपि न पश्यति, व्यवधानात् यथा कुड्यादिव्यवहितं राजदारादि न पश्यति, अभिभवात् यथा अहनि सौरीभिर्भाभिरभिभूतं ग्रहनक्षत्रमण्डलं न पश्यति, समानाभिहारात् यथा तोयदविमुक्तानुदबिन्दून् जलाशये न पश्यति । चकारोऽनुक्तसमुच्चयार्थः [illegible]ऽपि संगृहीतः

तत्त्वया क्षाराद्यवस्थायां दध्याद्यनुद्भवात् दृश्यते । एतदुक्तम्भवति न प्रत्यक्षनिवृत्तिमात्रादभावो भवत्यति प्रसङ्गात् तथाहि न हि गृहाद्बहिर्गतो गृहजनमपश्यंस्तदभावं निश्चिनुयात् अपि तु योग्यप्रत्यक्षनिवृत्तेरयमभावं निश्चिनोति न च प्रधानपुरुषादीनामस्ति प्रत्यक्षं योग्यतेति न तन्निवृत्तिमात्रात्तदभावनिश्चयो युक्तः प्रामाणिकानामिति ॥ ७ ॥

कुतमत् पुनरेतेषु कारणम्प्रधानादीनामनुपलब्धावित्यत आह ।

सौक्ष्म्यात्तदनुपलब्धिर्नाभावात् कार्य्यतस्तदुपलब्धेः ।
महदादि तच्च कार्य्यम्प्रकृति सरूपं विरूपं च ॥ ८ ॥

अथाभावादेव सप्तमरसवदेतेषामनुपलब्धिः कस्मान्न भवतीत्यत आह । नाभावात् । कुतः कार्य्यतस्तदुपलब्धेः तदिति प्रधानम्परामृशति । पुरुषोपलब्धौ तु प्रमाणं वक्ष्यति संघातपरार्थत्वादिति । दृढतरप्रमाणावधारिते हि प्रत्यक्षमप्रवर्त्तमानमयोग्यत्वान्न प्रवर्त्तत इति कल्प्यते सप्तमस्तु रसो न प्रमाणेनावधारित इति न तत्र प्रत्यक्षस्यायोग्यता शक्याध्यवसातुमिति भावः । किं पुनस्तत् कार्य्यं यतः प्रधानानुमानमित्यत आह । महदादि तच्च कार्य्यम् । एतच्च यथा गमकं तथोपरिष्टादुपपादयिष्यते । तस्य च कार्य्यस्य विवेकज्ञानोपयोगिनी सारूप्यवैरूप्ये आह । [illegible] । एते चोपरिष्टाद्विभजनीये ॥ ८ ॥

कार्य्यात्कारणमात्रं गम्यते । सन्ति चात्र वादिनां विप्रतिपत्तयः । के चिदाहुरसतः सज्जायत इति । एकस्य सतो विवर्त्तः कार्य्यजातं न वस्तु सदित्यपरे । अन्ये तु सतोऽसज्जायत इति । [illegible] सज्जायते इति वृद्धाः । तत्र पूर्वस्मिन् कल्पत्रये प्रधानं न सिध्यति । सुखदुःखमोहभेदवत्स्वरूपपरिणामशब्दात्मकं हि जगत् कारणस्य

प्रधानस्य प्रधानत्वं सत्त्वरजस्तमःस्वभावत्वं गमयति। यदि पुनरसतः सज्जायेत [असन्निरपाख्यं] कार्य्यं नाम सुखादिरूपशब्दाद्यात्मकं स्यात्, सदसतो तादात्म्यानुपपत्तेः। अथैकस्य सतो विमर्त्तः शब्दादिप्रपञ्चस्तथापि सतः सज्जायत इति न स्यात्। न चास्य प्रपञ्चात्मकत्वमपित्वप्रपञ्चस्य प्रपञ्चात्मकतया प्रतीतिर्भ्रम एव। येषामपि कणभक्षाक्षचरणादीनां सत एवकारणादसतो जन्म तेषामपि सदसतोरेकत्वानुपपत्तेर्न कार्य्यात्मकं कारणमिति न प्रधानसिद्धिः अतः प्रधानसिद्ध्यर्थं प्रथमं तावत्सत्कार्य्यं प्रतिजानीते।

असदकरणादुपादानग्रहणात्सर्वसम्भवाभावात्।
शक्तस्य शक्यकरणात्कारणभावाच्च सत्कार्य्यम्॥ ९॥

सत् कार्य्यं कारणव्यापारात् प्रागपीति शेषः। तथा च न सिद्धसाधनं नैयायिकतनयैरुद्भावनीयम्। यद्यपि बीजमृत्पिण्डादिप्रध्वंसानन्तरमङ्कुरघटाद्युत्पत्तिरुपलभ्यते तथापि न प्रध्वंसस्य कारणत्वमपि तु भावस्यैव बीजाद्यवयवस्य। अभावात्तु भावोत्पत्तौ तस्य सर्व्वत्र सुलभत्वात्सर्व्वत्र सर्व्वकार्य्योत्पादप्रसङ्ग इत्यादि न्यायवार्त्तिकतात्पर्य्यटीकायामभिहितमस्माभिः। [illegible] कणभक्षाक्षचरणमतमवशिष्यते। तत्रेदं प्रतिज्ञातं सत्कार्य्यमिति। अत्र हेतुमाह। असदकरणात्। असच्चेत् कारणव्यापारात्पूर्व्वं कार्य्यं नास्य सत्त्वं केनापि कर्त्तुं शक्यं नहि नीलं शिल्पिसहस्रेणापि शक्यं पीतं कर्त्तुं सदसत्त्वे घटस्य धर्म्मावितिचेत् तथाप्यसति धर्म्मिणि न तस्य धर्म्म इति सत्त्वं तदवस्थमेव तथा च नासत्त्वम् [illegible] नेनातदात्मना वाऽसत्त्वेन कथमसन् घटः तस्मात्कारणव्यापारात्पूर्व्वमिव [illegible] प्रागपि सदेव कार्य्यमिति। कारणव्यापारस्य सतोऽभिव्यक्तिरेवावशिष्यते। सतश्चाभिव्यक्तिरुपपन्ना। यथा पीड़नेन

तिलेषु तैलस्य अवघातेन धान्येषु तण्डुलानां दोहनेन सौरभेयीषु पयसः। [illegible] तु न निदर्शनं किञ्चिदस्ति। न ह्यव भिव्यज्यमानं चोत्पद्यमानं वा क्वचिदसदृष्टम्। इतश्च कारणव्यापारात् प्राक् सदेव कार्य्यमित्याह। [illegible]। उपादानानि कारणानि तेषां ग्रहणं कार्य्येण सम्बन्धः उपादानैः कार्य्यस्य सम्बन्धादिति यावत्। एतदुक्तं भवति। कार्य्येण संबद्धं कारणं कार्य्यस्य जनकं सम्बन्धश्च कार्य्यस्यासतो न सम्भवति तस्मात्सदिति। स्यादेतत् असम्बद्धमेव कारणैः कस्मात्कार्य्यं न जन्यते तथा चासदेवोत्पद्यतेऽत आह। सर्वसम्भवाभावात्। असंबद्धस्य जन्यत्वे असम्बद्धत्वाविशेषेण सर्वं कार्य्यजातं सर्वस्माज्जायेत् न चैतदस्ति तस्मान्नासम्बद्धमसम्बद्धेन जन्यते अपि तु संबद्धं संबद्धेन जन्यते इति। यथाहुः सांख्यवृद्धाः [illegible]। स्यादेतत् असम्बद्धमपि सत्तदेव करोति यत्र यत्कारणं शक्तम् शक्तिश्च कार्य्यदर्शनादवगम्यते अतो नाव्यवस्थेति [illegible]। शक्तस्य शक्यकरणात्। सा शक्तिः शक्तकारणाश्रया सर्वत्र वा स्याच्छक्ये वा। सर्वत्र चेत्तदवस्थैवाव्यवस्था शक्ये चेत्कथमसति शक्ये तत्रेति वक्तव्यम्। शक्तिभेद एव स तादृशो यतः किञ्चिदेव कार्य्यं जनयेन्न सर्वमिति चेत् हन्त भोः शक्तिविशेषः कार्य्यसम्बद्धो वा स्यादसम्बद्धो वा सम्बद्धत्वे नासता सम्बन्ध इति सत्कार्य्यम् असम्बद्धत्वे सैवाव्यवस्थेति सुष्ठूक्तं शक्तस्य शक्यकरणादिति। इतश्च सत्कार्य्यमित्याह। कारणभावाच्च। कार्य्यस्य कारणात्मकत्वात् न हि कारणाद्भिन्नं कार्य्यं कारणञ्च सदिति कथं तदभिन्नं कार्य्यमसद्भवेत् कार्य्यस्य कारणाभेदसाधकानि च प्रमाणानि न पटस्तन्तुभ्यो भिद्यते तद्धर्मत्वात् इह यद्यतो भिद्य-

ते तत्तस्य धर्म्मो न भवति । यथा गौरश्वस्य । धर्म्मश्च पटस्तन्तूनां तस्मान्नार्थान्तरम् । उपादानोपादेयभावाच्च नार्थान्तरत्वं तन्तुपटयोः ययोरर्थान्तरत्वं न तयोरुपादानोपादेयभावः यथा गोऽश्वयोः उपादानोपादेयभावश्च तन्तुपटयोः तस्मान्नार्थान्तरत्वमिति । इतश्च नार्थान्तरत्वं तन्तुपटयोः संयोगप्राप्तेः अर्थान्तरत्वे हि संयोगो दृष्टो यथा कुण्डबदरयोः अप्राप्तिर्वा यथा हिमवद्विन्ध्ययोः न चेह संयोगाप्राप्ती तस्मान्नार्थान्तरत्वमिति । इतश्च पटस्तन्तुभ्यो न भिद्यते गुरुत्वान्तरकार्य्यानुपलब्धेः इह यद्यस्माद्भिन्नं तस्मात्तस्य गुरुत्वान्तरकार्य्यं गृह्यते यथैकपलिकस्य स्वस्तिकस्य यो गुरुत्वकार्य्योऽवयवतिविशेषस्ततोद्विपलिकस्य स्वस्तिकस्य गुरुत्वकार्य्योऽवयवतिविशेषोऽधिकः न च तथा तन्तुगुरुत्वकार्य्यात्पटगुरुत्वस्य कार्य्यान्तरं दृश्यते तस्मादभिन्नस्तन्तुभ्यः पट इति । तान्येतान्यवीतान्यभेदसाधनानि । तदेवमभेदे सिद्धे तन्तव एव तेन तेन संस्थानभेदेन परिणताः पटो न तन्तुभ्योऽर्थान्तरं पटः । स्वात्मनि क्रियाविरोधबुद्धिव्यपदेशार्थक्रियाभेदाश्च नैकान्तिकं भेदं साधयितुमर्हन्ति एकस्मिन्नपि तत्तद्विशेषाविर्भावतिरोभावाभ्यामेतेषामविरोधात् । यथा हि कूर्म्मस्याङ्गानि कूर्म्मशरीरे निविशमानानि तिरो भवन्ति निःसरन्ति चाविर्भवन्ति न तु कूर्म्मतस्तदङ्गान्युत्पद्यन्ते प्रध्वंसन्ते वा एवमेकस्या मृदः सुवर्णस्य वा घटमुकुटादयो विशेषा निस्सरन्त आविर्भवन्त उत्पद्यन्त इत्युच्यन्ते निविशमानास्तिरोभवन्तो विनश्यन्तीत्युच्यन्ते न पुनरसतामुत्पादः सतां वा निरोधः । यथाह भगवान् कृष्णद्वैपायनः 'नासतो विद्यते भावो नाभावो विद्यते सत' इति । यथा कूर्म्मः स्वावयवेभ्यः सङ्कोचविकाशिभ्यो न भिन्नः एवं घटमुकुटाद्योऽपि मृत्सुवर्णादिभ्यो न भिन्नाः । एवञ्चेह तन्तुषु पट इति व्यपदेशोऽपि यथेह

वने तिलका इत्युपपन्नः । नचार्थक्रियाभेदोऽपि भेदमापादयति एकस्यापि नानार्थक्रियादर्शनात् यथैक एव वह्निर्दाहकः प्रकाशकः पाचकश्चेति । नाप्यर्थक्रियाव्यवस्था वस्तुभेदे हेतुः तेषामेव समस्तव्यस्तानामर्थक्रियाव्यवस्थादर्शनात् यथा प्रत्येकं विष्टयो वर्त्मदर्शनलक्षणामर्थक्रियां कुर्व्वन्ति न तु शिविकावहनम् मिलितास्तु शिविकां वहन्ति एवं तन्तवः प्रत्येकं प्रावरणमकुर्व्वाणा अपि मिलिता आविर्भूतपटभावाः प्रावरिष्यन्ति । स्यादेतत् आविर्भावः पटस्य कारणव्यापारात् प्राक् सन्नसन्वा । असंश्चेत् प्राप्तं तर्ह्यसत उत्पादनम् अथ सन् कृतं तर्हि कारणव्यापारेण न हि सति कार्य्ये कारणव्यापारप्रयोजनं पश्यामः आविर्भावे चाविर्भावान्तरकल्पनेऽनवस्थाप्रसङ्गः । तस्मादाविर्भूतपटभावास्तन्तवः क्रियन्त इति रिक्तं वचः । अथासदुत्पद्यत इत्यत्रापि मते केयमसदुत्पत्तिः सती असती वा सती चेत् कृतं तर्हि कारणैः असती चेत्तस्या अप्युत्पत्त्यन्तरमित्यनवस्था । अथोत्पत्तिः पटान्नार्थान्तरम् अपि तु पट एवासौ तथापि यावदुक्तं भवति पट इति तावदुक्तं भवत्युत्पद्यत इति । ततश्च पट इत्युक्ते उत्पद्यत इति न वाच्यं पौनरुक्त्यात् विनश्यतीत्यपि न वाच्यं उत्पत्तिविनाशयोर्युगपदेकत्र विरोधात् । तस्मादियं पटोत्पत्तिः स्वकारणसमवायो वा स्वसत्तासमवायो वा उभयथापि नोत्पद्यते अथ च तदर्थानि कारणानि व्यापार्यन्ते एवं सत एव पटादेराविर्भावाय कारणापेक्षेत्युपपन्नम् । न च पटरूपेण कारणानां सम्बन्धस्तद्रूपस्याक्रियात्वात् क्रियासम्बन्धित्वाच्च कारणानाम् अन्यथा कारणत्वाभावात् तस्मात्सत्कार्य्यमिति मुष्कलम् ॥ ९ ॥

तदेवं प्रधानसाधनानुगुणं सत्कार्य्यमुपपाद्य यादृशं तत् प्रधानं साधनीयं तादृशमादर्शयितुं विवेकज्ञानोपयोगिनी व्यक्ताव्यक्तसारूप्य-

वैरूप्ये तावदाह ।

हेतुमदनित्यमव्यापि सक्रियमनेकमाश्रितं लिङ्गम् ।
सावयवं परतन्त्रं व्यक्तं विपरीतमव्यक्तम् ॥ १० ॥

व्यक्तं हेतुः कारणं तद्वत् । यस्य च यो हेतुस्तस्य तमुपरिष्टाद्वक्ष्यति । अनित्यं विनाशि तिरोभावीति यावत् अव्यापि सर्वं परिणामिनं न व्याप्नोति कारणेन हि कार्य्यमाविष्टं न कार्य्येण कारणं न च बुद्ध्यादयः प्रधानं वेविषतीत्यव्यापकाः । सक्रियं परिस्पन्दवत् तथाहि बुद्ध्यादय उपात्तमुपात्तं देहं त्यजन्ति देहान्तरञ्चोपादत्त इति तेषां परिस्पन्दः शरीरपृथिव्यादीनाञ्च परिस्पन्दः प्रसिद्ध एव अनेकं प्रतिपुरुषं बुद्ध्यादीनां भेदात् पृथिव्याद्यपि शरीरघटादिभेदेनानेकमेव । आश्रितं स्वकारणेन आश्रितं बुद्ध्यादिकार्य्यम् अभेदेऽपि कथञ्चिद्भेदविवक्षया आश्रयाश्रयिभावः यथेह वने तिलका इत्युक्तम् । लिङ्गं प्रधानस्य यथाचैते बुद्ध्यादयः प्रधानस्य लिङ्गं तथोपरिष्टाद्वक्ष्यति, प्रधानं तु न प्रधानस्य लिङ्गं पुरुषस्य लिङ्गंभवेदपीति भावः । सावयवं अवयवनमवयवो मिथःसंश्लेषोमिश्रणं संयोग इति यावत् अवयविपूर्व्विका प्राप्तिः सावयवः तेन सह वर्त्तत इति सावयवं तथाहि पृथिव्यादयः परस्परं संयुज्यन्ते एवमन्येऽपि न तु प्रधानस्य बुद्ध्यादिभिः संयोगस्तादात्म्यात् नापि सत्त्वरजस्तमसां परस्परं संयोगःअप्राप्तेरभावात् परस्परं बुद्ध्यादि बुद्ध्या स्वकार्य्ये ऽहङ्कारे जनयितव्ये प्रकृत्यापरोऽपेक्ष्यते अन्यथा क्षीणा सती नालमहङ्कारं जनयितुमिति स्थितिः । एवमहङ्कारादिभिरपि स्वकार्य्यजनने इति सर्व्वं स्वकार्य्ये प्रकृत्यापरमपेक्षते तेन प्रकृतिपरामपेक्षमाणं कारणमपि स्वकार्य्योपजनने परतन्त्रं व्यक्तम् । विपरीतमव्यक्तं व्यक्तात् अहेतुमन्नित्यं व्यापि निष्क्रियम् । यद्यव्यक्तस्या-

स्ति प[illegible] क्रिया तथापि परिस्पन्दो नास्ति । एकमना-
श्रितमलिङ्गमनवयवं स्वतन्त्रमव्यक्तम् ॥ १० ॥

[illegible] प्रबन्धेन व्यक्ताव्यक्तयोर्वैधर्म्यमुक्तम् । सम्प्रति तयोः साधर्म्यं पुरुषाच्च वैधर्म्यमाह ।

त्रिगुणमविवेकि विषयः सामान्यमचेतनं प्रसवधर्म्मि ।
व्यक्तं तथा प्रधानं तद्विपरीतस्तथा च पुमान् ॥ ११ ॥

[illegible] त्रयो गुणाः सुखदुःखमोहा अस्येति [illegible] तदनेन सुखादीनामात्मगुणत्वं परास्मितमपाकृतम् । [illegible] । यथा प्रधानं न स्वतो विविच्यते एवं महदादयोऽपि न प्रधानाद्विविच्यन्ते तदात्मकत्वात् अथवा [illegible] । न हि किञ्चिदेकं पर्य्याप्तं स्वकार्य्ये अपि तु संभूय तत्र नैकस्मात्कस्य चित्केन चित्सम्भव इति । ये त्वाहुर्विज्ञानमेव हर्षविषादमोहशब्दाद्यात्मकं न पुनरितोऽन्यस्तद्धर्मेति तान् प्रत्याह । [illegible] । विषयो ग्राह्यो विज्ञानाद्बहिरिति यावत् अत एव सामान्यं साधारणं घटादिवत् अनेकपुरुषैर्गृहीतमिति यावत् विज्ञानाकारत्वे त्वसाधारण्याद्विज्ञानानां वृत्तिरूपाणां तेप्यसाधारणाः स्युः विज्ञानं यथा परेण न गृह्यते परबुद्धेरप्रत्यक्षत्वादित्यभिप्रायः । तथाच नर्तक्याभ्रूलताभङ्गे एकस्मिन् बहूनां प्रतिसन्धानं युक्तम् अन्यथा न स्यादिति भावः । [illegible] । सर्व्व एव प्रधानबुद्ध्यादयोऽचेतनाः न वैनाशिकवच्चैतन्यं बुद्धेरित्यर्थः । [illegible] । प्रसवरूपो धर्मो यः सोऽस्यास्तीति प्रसवधर्म्मि प्रसवधर्म्मेति वक्तव्ये मत्वर्थीयः प्रसवधर्म्मस्य नित्ययोगमाख्यातुम् सरूपविरूपपरिणामाभ्यां न कदाचिदपि वियुज्यत इत्यर्थः । व्यक्तवृत्तमव्यक्तेऽतिदिशति । तथा प्रधानम् । [illegible] तथा प्रधानं ताभ्यां वैधर्म्यं पुरुषस्याह । तद्विपरीतः पुमान् । [illegible] अहेतुमत्त्वनित्यत्वादि

[redacted]पुरुषस्यैवमनेकत्वे व्यक्तसाधर्म्यं तत्कथमुच्यते तद्विपरीतः पुमानित्यत आह । तथाचेति । [redacted] यच्चान्यद्धेतुमत्त्वादि साधर्म्यं तथाप्यत्रैगुण्यादि वैपरीत्यमस्येत्यर्थः ॥ ११ ॥

[redacted]त्युक्तं तत्र के ते त्रयो गुणाः किञ्च तदुपलक्षितमित्यत आह ।

प्रीत्यप्रीतिविषादात्मकाः प्रकाशप्रवृत्तिनियमार्थाः ।
अन्योन्याभिभवाश्रयजननमिथुनवृत्तयश्च गुणाः ॥ १२ ।

[redacted]ति परार्थाः सत्त्वं लघु प्रकाशकमित्यत्र च सत्त्वादय क्रमेण निर्देक्ष्यन्ते । तदनागतावेक्षणेन तन्त्रयुक्त्या वा प्रीत्यादीन यथासंख्यं वेदितव्यम् । एतदुक्तं भवति प्रीतिः सुखं प्रीत्यात्मक सत्त्वगुणः अप्रीतिर्दुःखं अप्रीत्यात्मको रजोगुणः विषादो मोहः विष दात्मकस्तमोगुण इति । ये तु मन्यन्ते न प्रीति र्दुःखाभावादतिरि च्यते एवं दुःखमपि न प्रीत्यभावादन्यदिति तान् प्रत्यात्मग्रहणम् नेतरेतराभावाः सुखादयः अपि तु भावाः आत्मशब्दस्य भाववचन त्वात् प्रीतिरात्मा भावो येषां ते प्रीत्यात्मानः । एवमन्यदपि व्याख्येय म् । भावरूपता चैषामनुभवसिद्धा परस्परभावात्मकत्वे तु परस्परा श्रयापत्तेरेकस्याप्यसिद्धेरुभयासिद्धिरिति भावः । स्वरूपमेषामुक्त प्रयोजनमाह । प्रकाशप्रवृत्तिनियमार्थाः । अत्रापि यथासंख्यमेव । रज प्रवर्त्तकत्वात्सर्व्वत्र लघु सत्त्वं प्रवर्त्तयेत् यदि तमसा गुरुणा न नि यम्येत । तमोनियतन्तु क्वचिदेव प्रवर्त्तयतीति भवति तमो नियमार्थ म् । प्रयोजनमुक्त्वा क्रियामाह । अन्योन्याभिभवाश्रयजननमिथुनवृ त्तयश्च । वृत्तिः क्रिया सा च प्रत्येकमभिसम्बध्यते । अ[redacted]वृ त्तयः एषामन्यतमेनार्थवशादुद्भूतेनान्यदभिभूयते । तद्यथाहि सत्त्वं र जस्तमश्चाभिभूय शान्तमात्मनो वृत्तिं प्रतिलभते एवं रजः सत्त्व

तमसी अभिभूय घोराम् एवं तमः सत्त्वरजसी अभिभूय मूढामिति ।

[redacted] यद्व्याधाराधेयभावेन नाश्रयार्थो घटते तथापि यदपेक्षया यस्य क्रिया स तस्याश्रयः [redacted] सत्त्वं प्रवृत्तिनियमावाश्रित्य रजस्तमसोः प्रकाशेनोपकरोति [redacted] प्रकाशनियमावाश्रित्य प्रवृत्येतरयोः तमः प्रकाशप्रवृत्ती आश्रित्य नियमेनेतरयोरिति । [redacted] ः । अन्यतमोऽन्यतमं जनयति जनयञ्च परिणामः स च गुणानां सदृशरूपः अत एव न हेतुमत्त्वं तत्त्वान्तरस्य हेतोरभावात् । नाप्यनित्यत्वं तत्त्वान्तरे लयाभावात् । [redacted] । अन्योन्यसहचराः अविनाभाववृत्तय इति यावत् । चः समुच्चये । भवति चात्रागमः ' अ[redacted] सर्वे सर्वे सर्वत्र गामिनः । रजसो मिथुनं सत्त्वं सत्त्वस्य मिथुनं रजः । तमसश्चापि मिथुनं तेऽन्योन्यरजसी उभे । उभयोः सत्त्वरजसोर्मिथुनं तम उच्यते । नैषामादिः संप्रयोगो विप्रयोगो वोपलभ्यत इति ॥ १२ ॥

प्रकाशप्रवृत्तिनियमार्था इत्युक्तम् । तत्र के ते इत्थम्भूताः कुत श्येत्यत आह ।

सत्त्वं लघु प्रकाशकमिष्टमुपष्टम्भकं चलञ्च रजः । गुरु वरणकमेव तमः प्रदीपवच्चार्थतो वृत्तिः ॥ १३ ॥

सत्त्वमेव लघु प्रकाशकमिष्टं सांख्याचार्यैः तत्र कार्योद्गमने हेतुर्धर्मो लाघवं गौरवप्रतिबन्दि यतोऽग्नेरूर्द्ध्वज्वलनं भवति । तदेव लाघवं कस्यचित्तिर्यग्गमनहेतुर्यथा वायोः । एवं करणानां वृत्तिपटुत्वहेतुर्लाघवं गुरुत्वे हि मन्दानि स्युरिति सत्त्वस्य प्रकाशकत्वमुक्तं सत्त्वतमसी स्वयमक्रियतया स्वकार्य्यप्रवृत्तिं प्रत्यवसीदन्ती रजसोपष्टभ्येते अवसादात् प्रत्याभ्य स्वकार्य्ये उत्साहं प्रयत्नं कार्य्येते । तदिदमुक्तमुपष्टम्भकं रज इति । कस्मादित्यत उक्तं चलमिति । तदनेन र-

[redacted]

जात: पुरुषार्थत्वं दर्शितम् । स्वस्तु [redacted] कृणामृण्यता च समर्था तत्र तत्र प्रकृतिगुणकार्ये कार्येषु वर्त्तन्त इति तत्तत्तो [redacted] तमी नियामकमुक्तं पुरुषार्थ एव हेतुरिति । एवकार: प्रत्येकं भिन्नक्रम: सम्बध्यते सत्त्वमेव रज एव तम एव । ननु चैते परस्परविरोधशीला गुणा: सुन्दोपसुन्दवत्परस्परं ध्वंसन्ते इत्येव युक्तं प्रागेव त्वेषामेककियाकारितेति अत आह । [redacted] । इदमेतत् यथा वर्त्तितैले अनलविरोधिनी अथ च मिलिते स्नेहानलेन रूपप्रकाशलक्षणं कार्यं कुरुत: यथा च वातपित्तश्लेष्माण: परस्परविरोधिन: शरीरधारणलक्षणकार्य्यकारिण: एवं सत्त्वरजस्तमांसि मिथोविरुद्धान्यपि अनुवर्त्स्यन्ति स्वकार्य्यं करिष्यन्ति च । अर्थत: पुरुषार्थत इति यावत् । यथा च वक्ष्यति 'पुरुषार्थ एव हेतु[redacted]ति । अत्र च सुखदु:खमोहा: परस्परविरोधिन: स्वस्वानुरूपाणि सुखदु:खमोहात्मकार्य्येव निमित्तानि कल्पयन्ति । तेषाञ्च परस्पराभिभाव्याभिभावकभावान्नानात्वम् [redacted] एकैव स्त्री रूपयौवनकुलशीलसम्पन्ना स्वामिनं सुखा करोति तत्कस्य हेतो: [redacted] सैव स्त्री सपत्नीर्दु:खाकरोति तत्कस्य हेतो: ता: प्रति तस्या दु:खरूपसमुद्भवात् एवं पुरुषान्तरं तामविन्दमानं सैव मोहयति तत्कस्य हेतो: तत् प्रति तस्या मोहरूपसमुद्भवात् । अनया च स्त्रिया सर्व्वे भावा व्याख्याता: तत्र यत्सुखहेतुस्तत्सुखात्मकं सत्त्वं यद् दु:खहेतुस्तद्दु:खात्मकं रज: यन्मोहहेतुस्तन्मोहात्मकं तम: । सुखप्रकाशलाघवानां चैकस्मिन् पुरुषदृष्टावविरोध: सह वर्त्तनात् । तस्मात्सुखदु:खमोहैरिव विरोधिभिरविरोधिभिरेकैकगुणवृत्तिभि: सुखप्रकाशलाघवैर्न निमित्तभेद। [redacted] एवं दु:खोपष्टम्भकप्रवृत्तकत्वैरेवं मोहगुरुत्वावरणैरिति

द्धं त्रैगुण्यमिति ॥ [illegible] ॥

[illegible] अनुभूयमानेषु पृथिव्यादिषु अनुभवसिद्धा भवन्त्व-
विवेकित्वादय:, ये पुन: सुखादयो नानुभवपथमधिरोहन्ति तेषां कु-
त्यमविवेकित्वं विषयत्वं सामान्यत्वमचेतनत्वं प्रसवधर्म्मित्वं चेत्यत
ाह ।

अविवेक्यादे: सिद्धस्त्रैगुण्यात्तद्विपर्ययाभावात् ।
कारणगुणात्मकत्वात्कार्य्यस्याव्यक्तमपि सिद्धम् ॥ [illegible] ॥

अविवेकित्वमविवेकि यथा द्वयकयोर्द्विवचनैकवचने इत्यत्र द्वित्वै-
त्वयोरिति अन्यथा द्वयेकेष्विति स्यात् । कुत: पुनरविवेकित्वादि-
द्धिरित्यत आह त्रैगुण्यात् यद्यत्सुखदु:खमोहात्मकं तदविवेक्यादि-
ति यथेदमनुभूयमानं व्यक्तमिति स्फुटत्वादन्वयेनोक्तम् । व्यति-
क्रमाह तद्विपर्ययाभावात् अविवेक्यादिविपर्य्यये पुरुषे त्रैगुण्याभावा-
अथवा व्यक्ताव्यक्ते पक्षीकृत्य अन्वयाभावेन त्रैगुण्यादित्यवीतएव
र्वक्तव्य: । स्यादितत् अव्यक्तसिद्धौ सत्यां तस्या विवेक्यादयो
र्मा: सिध्यन्ति अव्यक्तमेवत्वद्यापि न सिद्ध्यति तत्कथमविवेक्यादि-
द्धिरित्यत आह कारणगुणात्मकत्वात्कार्य्यस्याव्यक्तमपि सिद्धम् ।
यमभिसन्धि: । कार्य्यं हि कारणगुणात्मकं दृष्टम् । यथा तन्त्वादि-
गात्मकं पटादि तथा महदादिलक्षणेनापि कार्य्येण सुखदु:खमो-
ष्पेण स्वकारणगतसुखदु:खमोहात्मना भवितव्यं, तथाच तत्कारणं
वदु:खमोहात्मकं प्रधानमव्यक्तं सिद्धं भवति ॥ १५ ॥

स्यादेत् व्यक्तादव्यक्तमुत्पद्यते इति कणभक्षाक्षिचरणास्तनया: प-
ाणवोहि व्यक्तास्तेद्व्यणुकादिक्रमेण पृथिव्यादिलक्षणकार्यं व्यक्त-
रभ्यते पृथिव्यादिषु च कारणगुणक्रमेण रूपाद्युपास्ति: तस्मादव्य-

क्तादव्यक्तस्य तद्गुणस्योत्पत्तेः कुतमव्यक्तेनादृष्टचरेणेत्यत आह ।

भेदानां परिमाणात्समन्वयात्शक्तितः प्रवृत्तेश्च

कारणकार्य्यविभागादविभागाद्वैश्वरूप्यस्य ॥ १५ ॥

कारणमस्त्यव्यक्तम् भेदानां विशेषाणां महदादीनां भूतानां कार्य्याणां कारणं मूलकारणमस्त्यव्यक्तम् । कुतः कारणकार्य्यविभागादविभागाद्वैश्वरूप्यस्य कारणेसत्कार्य्यमिति स्थितम् । यथा कूर्म्म शरीरे सत्येवाङ्गानि निस्सरन्ति विभज्यन्ते इदं कूर्म्मशरीरमेतान्यङ्गानीति, एवं निविशमानानि तस्मिन् व्यक्तीभवन्ति एकं कारणन्मृत्पिण्डादेमपिण्डादा कार्य्याणि घटमुकुटादीनि सन्त्येवाविर्भवन्ति विभज्यन्ते सन्त्येव च पृथिव्यादीनि कारणात्तन्मात्रादाविर्भवन्ति विभज्यन्ते, सन्त्येव च तन्मात्राण्यहङ्कारात्कारणात् सत्येवाहङ्कारः कारणान्महतः सत्येव च महान् परमाव्यक्तादिति । सोऽयं कारणात् परमव्यक्तात्साक्षात्पारम्पर्येणान्वितस्य विश्वस्य कार्य्यस्य विभागः । तत्कार्य्यं तु मृत्पिण्डं हेमपिण्डं वा घटमुकुटादयोविशान्तो ऽव्यक्तिभवन्ति । तत्कारणरूपमेवानभिव्यक्तं कार्य्यमपेक्षया व्यक्तं भवति एवं पृथिव्यादयस्तन्मात्राणि विशान्तः स्वापेक्षया तन्मात्राण्यव्यक्तवन्ति एवं-तन्मात्राण्यहङ्कारं विशन्ति अहङ्कारमव्यक्तयन्ति एवं महङ्कारो महान्तमाविशन्महान्तमव्यक्तयति महान् प्रकृतिं स्वकारणमाविशन् प्रकृतिमव्यक्तयति प्रकृतेस्तु न क्वचिन्निवेशइति सा सर्व्वं कार्य्यजातं यत्सदकरणमेव । सोयमविभागः प्रकृतैश्वरूप्यस्य नानारूपस्य कार्य्यस्य [redacted] । तस्मात्कारणे कार्य्यस्य सतस्तत्र विभागाविभागाभ्यामव्यक्तं कारणमस्तीति

इत्थञ्चास्यक्तमस्तीत्याह, शक्तितः प्रवृत्तेश्च । कारणशक्तितः कार्य्यं प्रवर्त्तते इति सिद्धम् । अशक्तात्कारणात्कार्य्यानुत्पत्तेः शक्तित

कारणगतानेऽर्थस्याव्यवत्वादन्या । नहि सत्कार्य्यपक्षे का-
र्यस्याव्यक्तताया अन्यस्यां शक्तावस्ति प्रमाणम् । अयमेव हि
सिकताभ्यस्तिलानां तैलोपादानानां भेदो यदेतेष्वेव तैलमस्त्यमागा-
मस्यं न सिकतास्विति । स्यादेतत् शक्तितः प्रवृत्तिः कारण-
कार्य्यविभागाविभागौ च महतएव परमाव्यक्तत्वं साधयिष्यतस्किं
कृतं ततः परेणाव्यक्तेनेत्यतआह परिमाणात् परिमितत्वादव्यापित्वा-
देति यावत् । विवादाध्यासिता महदादिभेदा अव्यक्तकारणका न-
परिमितत्वाद्घटादिवत् । घटादयो हि परिमिता मृदाद्यव्यक्तकारणा-
का दृष्टाः । उक्तमेतत्यथा कार्यस्य [illegible] य-
महतः कारणं तत्परमव्यक्तं ततः परतराव्यक्तकल्पनायां प्रमा-
णाभावात् । इतश्चविवादाध्यासिता भेदा अव्यक्तकारणकास्तः स-
मन्वयात् । भिन्नानां समानरूपता समन्वयः । सुखदुःखमोहसम्वि-
दा हि बुद्ध्यादयोऽध्यवसायादिलक्षणाः प्रतीयन्ते । यानि च यद्रू-
पसमनुगतानि तानि तत्स्वभावाव्यक्तकारणकानि यथा मृद्धेमपिण्ड-
समनुगता घटमुकुटादयो मृद्धेमपिण्डाव्यक्तकारणकाइति कारण-
स्यैव्यक्तं भेदानामिति सिद्धम् ॥ १५ ॥

अव्यक्तं साधयित्वा अस्य प्रवृत्तिप्रकारमाह ।

कारणमस्त्यव्यक्तं प्रवर्त्तते त्रिगुणतः समुदयाच्च ।
परिणामतः सलिलवत् प्रतिप्रतिगुणाश्रयविशेषात् ॥ १६ ॥

प्रतिसर्गावस्थायां सत्त्वञ्च रजश्च तमश्च सदृशपरिणामानि भव-
न्ति परिणामस्वभावा हि गुणा नापरिणम्य क्षणमप्यवतिष्ठन्ते । त-
स्मात्सर्वं सत्त्वरूपतया रजोरजोरूपतया तमस्तमोरूपतया प्रतिसर्गा-
वस्थायामपि प्रवर्त्तते तदिदमुक्तं त्रिगुणतश्चेति । प्रवृत्यन्तरमाह
समुदयाच्च समेत्योदयः समुदयः समवायः सच गुणानां न गुण-

धान भावमन्तरेण सम्भवति न गुणप्रधानभावोविषय्यं विना नच वै
षम्यमुपमर्दं विमर्दैक्यभावादते इति महदादिभावेन प्रवृत्तिद्वितीया
स्यादेतत् कथमेकरूपाणां गुणानामनेकरूपा प्रवृत्तिरित्यत आह, प
रिणामतः संश्लिलघत् यथा हि वारिदविमुक्तमुदकमेकरसमपि तत्त
दूमिविकारानासाद्य नारिकेलतालीबिल्वचिरविल्वादि दुकामलकादिपि
ण्यफलरसतया परिणमत्सदुराम्लतिक्तकटुकषायतया विकल्पते एव
मेकैकगुणसमुद्भवात् क्वचित् गुणमात्रैत्याप्रधानगुणाः परिणाम भे
दान् प्रवर्त्तयन्ति तदिदमुक्तं प्रतिप्रतिगुणाश्रयविशेषात् एकैक गु
णाश्रयेण योविशेषस्तस्मादित्यर्थः ॥ १६ ॥

ये तु तौटिका अव्यक्तं वा महान्तं वा बुद्धिं वा अहङ्कारं व
इन्द्रियाणि वा भूतानि वा आत्मानमभिमन्यमानास्तान्येवोपासते ता
न् प्रत्याह ।

सङ्घातपरार्थत्वात्त्रिगुणादिविपर्ययादधिष्ठानात् ।

पुरुषोऽस्ति भोक्तृभावात्कैवल्यार्थं प्रवृत्तेश्च ॥ १७ ॥

पुरुषोऽस्त्यव्यक्तादेर्व्यतिरिक्तः, कुतः, सङ्घातपरार्थत्वात् अव्य
क्तमहदहङ्कारप्रभृतयः परार्थाः सङ्घातत्वात् शयनासनाङ्ग
वत् । सुखदुःखमोहात्मकतया अव्यक्तादयः सर्वे सङ्घाताः
स्यादेतत् नायमा सनादयः सङ्घाताः संहतत्वेऽपरार्था दृष्टा नतु
आत्मानं प्रत्यव्यक्तव्यतिरिक्तं प्रति परार्थाः तस्मात्सङ्घातान्तरमेव
परं गमयेदुमत्सङ्घातमात्मानमित्यतआह, [illegible] ।
अयमभिप्रायः सङ्घातान्तरार्थत्वे हि तस्यापि सङ्घातत्वात् तेनापि
सङ्घातान्तरार्थेन भवितव्यमेवं तेनेत्यनवस्था स्यात् । न च व्य-
वस्थायां सत्यामनवस्थाकल्पना युक्ता, गौरवप्रसङ्गात् । नच प्रमाण-
वत्वेन कल्पना गौरवमपि मृष्यतइति युक्तं संहतत्वस्य परार्थमात्रे-

गान्वयात् । इदानीं दृष्टसर्वधर्मानुसेधेन त्वनुमानमिच्छन् तत्सा-
धनुमानोक्तेन प्रसङ्गेनेत्युपपादितं व्यायवार्त्तिकतात्पर्यटीकायामस्मा-
भिः । तस्मादनवस्थाभिया असंहतत्वमिच्छता अत्रिगुणत्वमवि-
वेकित्वमविषयत्वमसामान्यत्वं चेतनत्वमप्रसवधर्मित्वं चानुपेयम् । त्रि-
गुणत्वादयो हि धर्मा सङ्घातत्वेन व्याप्ताः । असंहतत्वमस्मिन्परे व्या-
वर्त्तमानं त्रिगुणत्वादि व्यावर्तयति । ब्राह्मण्यमिव विवर्त्तमानं कठत्वा-
दिकं तस्मादाचार्येण त्रिगुणादिविपर्ययादिति नक्ता असंहतः
परःपुरुषो विवक्षितः स चास्तीति सिद्धम् । इदञ्च पुरुषो ऽस्ति अभिधा-
नात् त्रिगुणात्मकानामधिष्ठीयमानत्वात् यत्सुखदुःखमोहात्मकं त-
त्सर्वं परेणाधिष्ठीयमानं दृष्टं यथा रथादि मन्त्रादिभिः सुखदुःखमो-
हात्मकञ्चेदं बुद्ध्यादि तस्मादेतदपि परेणाधिष्ठातव्यम् । स च प-
रस्त्रैगुण्यादन्य आत्मेति । इदमपि सुखं मे भोक्तृ भोक्तृ-
भावेन भोग्ये सुखदुःखे उपस्थास्यति । भोग्ये हि सुखदुःखे अनु-
कूलप्रतिकूलवेदनीये प्रत्यात्मनुभवेते । तेनात्मैवानुकूलनीयेन प्रति-
कूलनीयेन च केनचिदन्येन भवितव्यं नत्वनुकूलनीयाः प्रतिकू-
लनीया वा बुद्ध्यादयस्तेषां सुखदुःखात्मकत्वेन स्वात्मनि वृत्तिवि-
रोधात् । तस्मादो ऽनुकूलनीयः प्रतिकूलनीयो वा
स चात्मेति । अन्ये त्वाहुः भोग्या दृश्या बुद्ध्यादयः नच द्रष्टारम-
न्तरेण दृश्यतायुक्ता तेषां । तस्मादस्ति द्रष्टा दृश्यबुद्ध्यादतिरिक्तः
स चात्मेति । भोक्तृभावात् दृष्टृभावात् दृश्येन दृष्टुरनुमानादित्य-
र्थः । दृश्यत्वं च बुद्ध्यादीनां सुखाद्यात्मकतया पृथिव्यादिवदनुमितं
[illegible] । सत्त्वानां महर्षीणांच
दिव्यदेहानां कैवल्यञ्चात्यन्तिकदुःखत्रयप्रशमलक्षणं न बुद्ध्या-
दीनां सम्भवति ते हि दुःखात्मकाः कथं स्वभावतिरोऽपि न

[illegible]

"बुद्ध्यादिव्यतिरिक्तस्य [illegible]

[illegible] तत्र [illegible] तत्तोनियोगः [illegible] तत्

[illegible] महाधिवाश्चास्ति बुद्धेश्चातिरिक्त

[illegible]

[illegible] प्रतिपाद्यते किं सर्वशरीरैक: किमनेक

प्रतिक्षेत्रमिति संशये तस्य प्रतिक्षेत्रमनेकत्वमुपपाद्यति

जननमरणकरणानां प्रतिनियमादयुगपत् प्रवृत्तेश्च ।

पुरुषबहुत्वं सिद्धं त्रैगुण्यविपर्ययाच्चैव ॥ १८ ॥

जननमरणकरणानां प्रतिनियमात् पुरुषबहुत्वं सिद्धं कस्मिंश्चिज्जननमरणकरणानां प्रतिनियमात् नि-

कायविशेषाभिरूपाधिदेहेन्द्रियमनोऽहङ्कारबुद्धिवेदनाभिः पुरुष-

स्योभिस्तत्त्वैर्नानात्वं नतु पुरुषस्य परिणामित्वात्परिणामित्वात् तेषा-

मेव चदेहादीनामुपादानानां परित्यागोमरणं न त्वात्मनोविनाशः तस्य कू-

टस्थनित्यत्वात् करणानि बुद्ध्यादीनि त्रयोदश तेषां जन्ममरणकर-

णानां प्रतिनियमोऽवस्था सा. स्यैवं सत्यशरीरैकस्मिन् पुरुषे

नोपपद्यते तदा ह्येकस्मिन् जायमाने सर्वे जायेरन् म्रियमाणे

च म्रियेरन् अन्धादौ चैकस्मिन् सर्वे एवान्धबधिरा विचित्तु चैकस्मि-

न् सर्वेऽविचित्ता स्युरित्यव्यवस्था स्यात्, प्रतिक्षेत्रं पुरुषभेदे

तुभवति व्यवस्था। नचैकस्यापि पुरुषस्य देहापाधिभेदादुपपत्ति

युक्तापि तनुबुद्ध्यधिभेदेनापि जन्ममरणादिव्यवस्थाप्रसङ्गात्

[illegible] जाते का स्तनादौ महत्यवयवे युवतौ जीर्णे मृत

वा भवतीति। [illegible]

प्रवृत्तिः प्रयत्नलक्षणा यद्यप्यन्तःकरणवर्तिनी तथापि पुरुषे उपच-

र्यतेव सामर्थ्यकृत शरीरे प्रयतमाने स एव सर्वशरीरैक

[illegible] प्रवर्तते ततश्च देहान्येव शरीराणि युगपच्चालयेत्

नाना सुनाभ दर्शनात् [illegible]

[illegible]सिद्धमित्यस्यानन्तरं द्रष्टव्य[illegible]सिद्धम्।
त्रयोगुण्यं तस्य विपर्ययोऽन्यथा भावः कोचित् खलु सत्व-
नेकायाः सत्वबहुलाः यथोर्द्धस्रोतसः कोचिद्रजोबहुलाः यथा मनुष्याः
कोचित्समोबहुलः यथा तिर्य्यग्योनयः सोऽप्रैदशस्त्रैगुण्यविपर्ययो ऽ- य
न्यथाभावि[illegible]षु सत्त्वनिकर्षेषु न भवेत् यद्येकः पुरुषः स्याद्वैद
त्वयमदोषश्चेति ॥ १८ ॥

एवं पुरुषबहुत्वं प्रसाध्य विवेकज्ञानोपयोगितया तस्य धर्म्मा-
नाह ।

तस्माच्च विपर्य्यासात्सिद्धं साक्षित्वमस्य पुरुषस्य ।
कैवल्यं माध्यस्थ्यं द्रष्टृत्वमकर्त्तृ भावश्च ॥ १९ ॥

तस्माच्चे ति च: पुरुषस्य बहुत्वेन सह धर्म्मान्तराणि समुच्चि- ८
नोति विपर्य्यासादस्मादित्युक्तत्रैगुण्यविपर्ययादित्यनन्तरोक्तं सम्बध्येत
अतस्तन्निरासाय तस्मादित्युक्तं [illegible] इति विप्रकृष्टं त्रिगुणभविवेकीत्यादि सम्ब
ध्यते ॥ तस्मात् त्रिगुणादिपर्य्यविपर्य्यासः स पुरुषस्यात्रिगुणत्वं वि-
वेकित्वमविषयत्वमसाधारणत्वं चेतनत्वमप्रसवधर्म्मित्वञ्च । तत्र चे-
तनेवन अविषयत्वेन च साक्षित्वदृष्टे दर्शिते । चेतनोहि द्रष्टा भ-
वति नाचेतनः साक्षी च दर्शितविषयोभवति यस्मैप्रदर्श्यते विषयः
स साक्षी यथाहि लोके अर्थप्रत्यर्थिनो विवाद विषयं साक्षिणे दर्श-
यंतः एवं प्रकृतिरपि [illegible] विषयं पुरुषाय दर्शयतीति पुरुषः
साक्षी । नचाचेतनोविषयी वा शक्योविषयं दर्शयितुमिति चैतन्या-
दविषयत्वाच्च भवति साक्षी अत एव द्रष्टापि भवति अत्रैगुण्यात्चास्य
कैवल्यम् आत्यन्तिकदुःखत्रयाभावः कैवल्यं तच्च तस्य स्वाभाविः
कादत्रैगुण्यात्सुखदुःखमोहरहितत्वात्सिद्धम् । अतएवात्रैगुण्यान्म-

ध्यस्थं सुखी हि सुखेन तृप्यन् दुःखी हि दुःखं द्विषन्न मध्यस्थो-
भवति तदुभयरहितस्तु मध्यस्थ इत्युदासीन इति चाख्यायते वि-
वेकित्वादप्रसवधर्मित्वाच्च [redacted] सिद्धम् ॥ १९ ॥

स्यादेतत् । प्रमा[redacted]र्तव्यमर्थमवगम्य चेतनोऽहं चिकीर्षन्
करोमीति कृतिचैतन्ययोः सामानाधिकरण्यमनुभवसिद्धं तदेतस्मिन्न-
वकल्पते चेतनस्याकर्तृत्वात्कर्तुश्चाचैतन्यादित्यतआह ।

तस्मात्तत्संयोगादचेतनं चेतनावदिव लिङ्गम् ।
गुणकर्तृत्वे च तथा कर्तेव भवत्युदासीनः ॥ २० ॥

यस्माच्चैतन्यकर्तृत्वे भिन्नाधिकरणे युक्तितः सिद्धे तस्माद्भान्ति-
रियमित्यर्थः । लिङ्गं महदादि सूक्ष्मपर्य्यन्तं वक्ष्यति भावितं बीजं
तत्संयोगस्तत्सन्निधानमतिरोहितार्थमन्यत् ॥ २० ॥

तत्संयोगादित्युक्तं नच भिन्नयोः संयोगोऽपेक्षां विना न चेय-
मुपकार्य्योपकारकभावं विनेत्यपेक्षाहेतुमुपकारमाह ।

पुरुषस्य दर्शनार्थं कैवल्यार्थं तथा प्रधानस्य ।
पङ्ग्वन्धवदुभयोरपि संयोगस्तत्कृतः सर्गः ॥ २१ ॥

प्रधानस्येति कर्म्मणि षष्ठी । प्रधानस्य सर्व्वकारणस्य यद्दर्शनं पु-
रुषेण तदनेन भोग्यता प्रधानस्य दर्शिता । ततश्च भोग्यं प्र-
धानं भोक्तारमन्तरेण न सम्भवतीति युक्तास्य भोक्तृपेक्षा पुरुष्या-
पेक्षां दर्शयति पुरुषस्य कैवल्यार्थं तथा भोग्येन हि प्रधानेन सम्भि-
न्नः पुरुषस्तद्दुःखत्रयं स्वात्मन्यभिमन्यमानः कैवल्यं प्रार्थयते तच्च
सत्त्वपुरुषान्यताख्यातिनिबन्धनम् । नच्च सत्त्वपुरुषान्यताख्यातिः प्र-
धानमन्तरेणेति कैवल्यार्थं पुरुषः प्रधानमपेक्षते अनादित्वाच्च सं-
योगपरम्परायाः भोगाय संयुक्तोऽपि कैवल्याय पुनः संयुज्यते इति
युक्तम् । ननु भवत्वनयोः संयोगो महदादिसर्गस्तु कुत इत्यत

आह । तत्कृतः सर्गः संयोगो हि न महदादिसर्गमन्तरेण भोगाय कल्पते संयोगएव भोगापवर्गार्थं सर्गं करोतीत्यर्थः ॥ २१ ॥

सर्गक्रममाह ।

प्रकृतेर्म्महांस्ततोऽहङ्कारस्तस्माद्गणश्च षोडशकः ।
तस्मादपि षोडशकात्पञ्चभ्यः पञ्च भूतानि ॥ २२ ॥

प्रकृतिरव्यक्तं महदहङ्कारौ वक्ष्यमाणलक्षणौ एकादशेन्द्रियाणि वक्ष्यमाणानि पञ्च तन्मात्राणि च सोऽयं षोडशसंख्यापरिमितोगणः षोडशकः तस्मादपि षोडशकादुत्पन्नेभ्यः पञ्चभ्यस्तन्मात्रेभ्यः पञ्च भूतान्याकाशादीनि । तत्र शब्दतन्मात्रादाकाशं शब्दगुणं, शब्दतन्मात्र सहितात् स्पर्शतन्मात्राद्वायुः शब्दस्पर्शगुणः, शब्दस्पर्शतन्मात्रसहिताद्रूपतन्मात्रात्तेजः शब्दस्पर्शरूपगुणं, शब्दस्पर्शरूपतन्मात्रसहिताद्रसतन्मात्रादापः शब्दस्पर्शरूपरसगुणः, शब्दस्पर्शरूपरसतन्मात्रसहिताद्गन्धतन्मात्राच्छब्दस्पर्शरूपरसगन्धगुणा पृथिवी भवति ॥ २२ ॥

अव्यक्तं सामान्यतोलक्षितं तद्विपरीतमित्यनेन विशेषतश्चसत्त्वं लघु प्रकाशकमित्यादिना व्यक्तमपि सामन्यतोलक्षितं हेतु मदित्यादिना सम्प्रति विवेकज्ञानोपयोगितया व्यक्तविशेषं बुद्धिं लक्षयति ।

अध्यवसायोबुद्धिर्द्धर्म्मोज्ञानं विरागऐश्वर्य्यम् ।
सात्त्विकमेतद्रूपं तामसमस्माद्विपर्य्यस्तम् ॥ २३ ॥

अध्यवसायोबुद्धिः क्रियाशक्तिपावतीरभेदाविवक्षया । सर्वोव्यवहर्त्ता आलोच्य मत्वाहमत्राधिकृतइत्याभिमत्य कर्त्तव्यमेतन्मयेत्यअध्यवस्यति ततश्च प्रवर्त्तते इति लोकसिद्धम् । तत्र योऽयं कर्त्तव्यमिति निश्चयः सैवतिसन्निधानादापन्नचैतन्यायाबुद्धेः सोऽध्यवसायो बुद्धेरसा

धारणोव्यापारस्तद्भेदाद्बुद्धेः । स च बुद्धेर्लक्षणं समाना समानजातीयवृत्तिच्छेदकत्वात् । तदेवं बुद्धिं लक्षयित्वा विवेकज्ञानोपयोगिनस्तस्या धर्म्मान् सात्विक तामसानाह, धर्म्मोज्ञानं विराग ऐश्वर्य्यं सात्विकमेतद्रूपं तामसमस्माद्विपर्य्ययस्तम् । धर्म्मो ऽभ्युदयनिःश्रेयसहेतुस्तत्र यागदानाद्यनुष्ठानजनितोधर्म्मोऽभ्युदयहेतुः अष्टाङ्गयोगानुष्ठानजनितश्च निःश्रेयसहेतुः । गुणपुरुषान्यताख्यातिर्ज्ञानम् । वैराग्यं रागाभावः तस्य यतमानसंज्ञा व्यतिरेकसंज्ञा एकेन्द्रियसंज्ञा वशिकारसंज्ञेति चतस्रःसंज्ञा । रागादयः कषायाश्चित्तवर्त्तिन स्तैरिन्द्रियाणि यथास्वं विषयेषु प्रवर्त्तयन्ते तन्मा ऽत्र प्रवर्त्तिषत विषयेष्विन्द्रियाणीति तत्परिपाचनायारम्भः प्रयत्नो यतमानसंज्ञा । परि पाचने चानुष्ठीयमाने केचित्कषायाः पक्वाः पक्ष्यन्ते च केचित्तत्रैवं पूर्व्वापरीभावे सति पक्ष्यमाणेभ्यः कषायेभ्यः पक्वानां व्यतिरेकेणावधारणं व्यतिरेकसंज्ञा । इन्द्रियप्रवृत्त्यसमर्थतया पक्वानामौत्सुक्य मात्रेण मनसि व्यवस्थानमेकेन्द्रियसंज्ञा । औत्सुक्यमात्रस्यापि निवृत्तिरुपस्थितेष्वपि दृष्टानुश्रविकविषयेषु या संज्ञात्रयात्पराचीना सा वशीकारसंज्ञा यामभगवान् पतञ्जलिर्वर्णयाञ्चकार दृष्टानुश्रविकविषयवितृष्णस्य वशीकारसंज्ञा वैराग्यमिति । सोऽयं बुद्धिधर्म्मो विराग इति । ऐश्वर्य्यमपि बुद्धिधर्म्मो यतोऽणिमादिप्रादुर्भावः । अत्राणिमा भवत्यणुः यतः शिलामपि प्रविशति । लघिमा लघुभावः यतः सूर्य्यमरीचीनालम्ब्य सूर्य्यलोकं याति । महिमा महत्तोभावः यतोमहान् भवति । प्राप्तिरङ्गुल्यग्रेण स्पृशति चन्द्रमसम् । प्राकाम्य मिच्छानभिघातो यतोभूमावुन्मज्जति निमज्जति यथोदके । वशित्वं भूतभौतिकं वशीभवत्यवश्यम् । ईशित्वं भूतभौतिकानां प्रभवस्थितिव्ययानामीष्टे । यत्र कामावसायित्वं सा सत्यसङ्कल्पता यथास्य

सङ्कल्पोभवति भूतेषु तथैव भूतानि भवन्ति। अन्येषां निश्चया निश्चेतव्यमनुविधीयन्ते योगिनस्तु निश्चेतव्याः पदार्था निश्चयमितिअनुचक्राम सात्विका बुद्धिधर्म्माः। तामसास्तु तद्विपरीता बुद्धिधर्म्माः अधर्म्माज्ञानावैराग्यानैश्वर्य्याभिधानाश्चत्वारइत्यर्थः ॥ २३ ॥

अहङ्कारस्य लक्षणमाह।

अभिमानोऽहङ्कारस्तस्माद् द्विविधः प्रवर्त्तते सर्गः।
एकादशकश्च गणस्तन्मात्रपञ्चकश्चैव ॥ २४ ॥

अभिमानोऽहङ्कारः यत् खल्वालोचितं मतञ्च तत्राहमधिकृतः शक्तः खल्वहमत्र मदर्था एवामी विषयाः मत्तोनान्योऽत्राधिकृतः काश्चिदस्यतोऽहमस्मीति योऽभिमानः सोऽसाधारणव्यापारत्वादहङ्कारस्तमुपजीव्य हि बुद्धिरध्यवस्यति कर्त्तव्यमेतन्मयेति। तस्य कार्य्य भेदमाह, तस्माद् द्विविधः प्रवर्त्तते सर्गः। प्रकारद्वयमाह। एकादशकश्च गणः इन्द्रियाह्वयः तन्मात्रपञ्चकश्चैव। द्विविधएव सर्गोऽहङ्कारादन्यत्वेनैवकारेणावधारयति ॥ २४ ॥

स्यादेतत् अहङ्कारादेकरूपात्कारणात्कथं जडप्रकाशकौ गुणौ विलक्षणौ भवत इत्यत आह।

सात्विकएकादशकः प्रवर्त्तते वैकृतादहङ्कारात्। सात्विकात्
भूतादेस्तन्मात्रः स तामसस्तैजसादुभयम् ॥ २५ ॥

प्रकाशलघुभ्यामेकादशकइन्द्रियगणः सात्विकोवैकृतात्सात्विकादहङ्कारात् प्रवर्तते। भूतादेस्तामसादहङ्कारात्तन्मात्रोगणः प्रवर्तते कस्माद् यतः स तामसः। एतदुक्तं भवति यद्यप्येकोऽहङ्कार स्तथापि गुणभेदोद्भवाभिभवाभ्यां भिन्नं कार्य्यं करोतीति। ननु यदि सत्वतमोभ्यामेव सर्व्वं कार्य्यं जन्यते तदा कृतमकिञ्चित्करेण रजसेत्यत आह, तैजसादुभयम् तैजसाद्राजसादुभयं गणद्वयं भवति। यद्य-

पि रजसोनं कार्य्यान्तरमस्ति तथापि सत्त्वतमसी स्वयमक्रिये समर्थे अ-
पि न स्वकार्य्यं कुरुतः रजस्तु चलतया ते यदा चालयति तदा
स्वकार्य्यं कुरुतइति तदुभयस्मिन्नपि कार्य्ये सत्त्वतमसोः क्रियोत्पा-
दनद्वारेणास्ति रजसः कारणत्वमिति न व्यर्थं रजइति ॥ २५ ॥

स्वात्विकमेकादशकमाख्यातुं बाह्येन्द्रियदशकं तावदाह ।

बुद्धीन्द्रियाणि चक्षुःश्रोत्रघ्राणरसनत्वगाख्यानि ।
वाक्पाणिपादपायूपस्थानि कर्म्मेन्द्रियाण्याहुः ॥ २६ ॥

सात्विकाहङ्कारोपादानत्वमिन्द्रियत्वं तच्च द्विविधं बुद्धीन्द्रियं कर्म्मे-
न्द्रियञ्च उभयमप्येतदिन्द्रस्यात्मनश्चिन्हत्वादिन्द्रियमुच्यते । तानि
च स्वसंज्ञाभिश्चक्षुरादिभिरुक्तानि तत्र रूपग्रहणलिङ्गं चक्षुः शब्द
ग्रहणलिङ्गं श्रोत्रं गन्धग्रहणलिङ्गं घ्राणं रसग्रहणलिङ्गं रसनं
स्पर्शग्रहणलिङ्गं त्वक् । एवं वागादीनां कार्य्यं वक्ष्यति ॥ २६ ॥

एकादशकमिन्द्रियमाह ।

उभयात्मकमत्र मनः सङ्कल्पकमिन्द्रियञ्च साधर्म्म्यात् ।
गुणपरिणामविशेषान्नानात्वं बाह्यभेदाश्च ॥ २७ ॥

एकादशस्विन्द्रियेषु मध्ये मनउभयात्मकं बुद्धीन्द्रियं कर्म्मेन्द्रियं
च । चक्षुरादीनां मनोऽधिष्ठितानामेव स्वस्वविषयेषु प्रवृत्तेः । तद-
साधारणेन रूपेण लक्षयति, सङ्कल्पकमत्र मनः, सङ्कल्पेन रूपेण
मनो लक्ष्यते आलोचितमिन्द्रियेण वस्त्विदमिति सम्मुग्धमिदमेवं नै-
व मिति सम्यक् कल्पयति विशेषणविशेष्यभावेन विवेचयतीति यावत् ।
[illegible] । तस्मा-
[illegible] । तथाहि, अस्ति ह्यालोचन-
ज्ञानं प्रथमं निर्विकल्पकम् । बालमूकादिविज्ञानसदृशं मुग्धवस्तुज-
मिति । ततः परं पुनर्वस्तुधर्म्मजात्यादिभिर्यया बुद्ध्यावसीयते साहि
व्याप्रियः

प्रत्यक्षत्वेनसम्मता। सोऽयं सङ्कल्पलक्षणो व्यापारो मनसः समानासमानजातीयाभ्यां व्यवच्छिन्दन् मनो लक्षयति। स्यादेतत्। असाधारणव्यापारं योगिनौ यथा महदहङ्कारौ नेन्द्रियमेवं मनोऽप्यसाधारणव्यापारयोगि नेन्द्रियं भवितुमर्हतीत्यत आह। इन्द्रियञ्च कुतः साधर्म्यात् इन्द्रियान्तरैः, सात्विकाहङ्कारोपादानत्वञ्च साधर्म्यं नत्विन्द्रलिङ्गत्वं त्वादीनामप्यात्मलिङ्गत्वेनेन्द्रियत्वप्रसङ्गात्, तस्माद्व्युत्पत्तिमात्रमिन्द्रलिङ्गत्वं नतु प्रवृत्तिनिमित्तम्। अथ कथं सात्विकाहङ्कारादेकस्मादेकादशेन्द्रियाणीत्यतआह, गुणपरिणामविशेषान्नानात्वं वाह्यभेदाश्च। शब्दाद्युपभोगसम्प्रवर्त्तकादृष्टसहकारिभेदात्कार्य्यभेदाः। अदृष्टभेदोऽपि गुणपरिणामएव वाह्यभेदाश्चेति दृष्टान्तार्थं यथा बाह्यभेदास्तथैतदपीत्यर्थः॥ २७॥ एकादशेन्द्रियम्

तदेवमेकादशेन्द्रियाणि स्वरूपत उक्त्वा दशानामसाधारणीर्वृत्तीराह।

शब्दादिषु पञ्चानामालोचनमात्रमिष्यते वृत्तिः।
वचनादानविहरणोत्सर्गानन्दाश्च पञ्चानाम्॥ २८॥

बुद्धीन्द्रियाणां सम्मुग्धवस्तुमात्रदर्शनमालोचनमुक्तं कर्म्मेन्द्रियाणां कण्ठताल्वादिस्थानमिन्द्रियं वाक् तस्या वृत्तिर्वचनं स्पष्टमन्यत्॥ २८॥

अन्तःकरणत्रयस्य वृत्तिमाह।

स्वालक्षण्यं वृत्तिस्त्रयस्य सैषा भवत्यसामान्या।
सामान्यकरणवृत्तिः प्राणाद्या वायवः पञ्च॥ २९॥

स्वालक्षण्यं वृत्तित्रयस्य स्वमसाधारणं लक्षणं येषां तानि स्वलक्षणानि महदहङ्कारमनांसि तेषां भावः स्वालक्षण्यं तच्च स्वानिलक्षणान्येव। तद्यथा। महतोऽध्यवसायोऽहङ्कारस्याभिमानः सङ्क-

त्पो मनसो वृत्तिर्व्यापारः । वृत्तिर्द्वैविध्यं साधारणासाधारणत्वाभ्या
माह । सैषा भवत्यसामान्या असाधारणी । सामान्यकरणवृत्तिः प्रा
णाद्या वायवः पञ्च । सामान्या चासौ करणवृत्तिश्चेति त्रयाणामपि
करणानां पञ्च वायवः जीवनं वृत्तिः तद्भावे भावात् तदभावे चा
भावात् । तत्र प्राणो नासाग्रहृन्नाभिपादाङ्गुष्ठवृत्तिः । अपानः
कृकाटिकापृष्ठगुदोपायूपस्थपार्श्ववृत्तिः । समानोहृन्नाभिसर्व्वसन्धिवृ
त्तिः । उदानो हृत्कण्ठतालुमूर्द्भ्रूमध्यवृत्तिः । व्यानस्त्वग्वृत्तिरिति
पञ्च वायवः ॥ २९ ॥

अस्यासाधारणीषु वृत्तिषु क्रमाक्रमौ सप्रकारावाह ।

त्रयी युगपच्चतुष्टयस्य तु वृत्तिः क्रमशश्च तस्य निर्दिष्टा ।
दृष्टे तथाप्यदृष्टे त्रयस्य तत्पूर्व्विका वृत्तिः ॥ ३० ॥

यदा सत्त्वमसान्धकारे विद्युत्सम्पातमात्राद्व्याघ्रमभिमु
खमतिसन्निहितं पश्यति तदा खल्वस्यालोचनसङ्कल्पाभिमानाध्य
वसाया युगपदेव प्रादुर्भवन्ति । यतस्तत उद्भूय तत्स्थानादेकपदे
ऽपसर्पति क्रमशश्च यदा मन्दालोके प्रथमं तावद्वस्तुमात्रं सम्मुग्धमा
लोचयति अथ प्रणिहितमनाः कर्णान्ताकृष्टसशरशिञ्जिनीमण्डली
कृतकोदण्डः प्रचण्डतरः पाटचरोऽयमिति निश्चिनोति, अथ च मां
प्रत्येतीत्यभिमन्यते अथाध्यवस्यति अपसरामितः स्थानादिति । परो
क्षे तु अन्तःकरणत्रयस्य बाह्येन्द्रियवर्ज्जं वृत्तिरित्याह अदृष्टे त्रयस्य
तत्पूर्व्विका वृत्तिः । अन्तःकरणत्रयस्य युगपत् क्रमेण च वृत्तिर्दृ
ष्टपूर्विकेति । अनुमानागमस्मृतयो हि परोक्षेऽर्थे दर्शनपूर्वाः प्रवर्त्तन्ते
नान्यथा । यथा दृष्टे तथा अदृष्टेऽपीति योजना ॥ ३० ॥

स्यादेतत् चतुर्णां त्रयाणां वा वृत्तयो न तावत्तन्मात्राधीनाः ते
षां सहातनत्वेन वृत्तीनां सदोत्पादप्रसङ्गात् आकस्मिकत्वे तु वृत्ति

सङ्करप्रसङ्गो नियमहेतोरभावादित्यत आह ।

स्वां स्वां प्रतिपद्यन्ते परस्पराकूतहेतुकां वृत्तिम् ।
पुरुषार्थएव हेतुर्न केन चित्कार्य्यते करणम् ॥ ३१ ॥

करणानीति शेषः । यथाहि बहवः पुरुषाः शाक्तीकयाष्टीकधानुष्ककार्षाणिकाः कृतसङ्केताः परावस्कन्दाय प्रवृत्ताः तत्रान्यतमस्याकूतमवगम्यान्यतमः प्रवर्त्तते प्रवर्त्तमानश्च शाक्तीकः शक्तिमेवादत्ते नतु यष्ट्यादिकमेवं याष्टीकोऽपि यष्टिमेव न शस्त्रादिकं तथान्यतमस्य करणस्याकूतात्स्वकार्य्यकरणाभिमुखादन्यतमं करणं प्रवर्त्तते । तत्प्रवृत्तेश्च हेतुमत्त्वान्न वृत्तिसङ्करइत्युक्तं स्वां स्वां प्रतिपद्यन्ते इति । स्यादेतत् याष्टीकादयश्चेतनत्वात् परस्पराकूतमवगम्य प्रवर्त्तन्ते इति युक्तं करणानि त्वचेतनानि तस्मात्तेषां प्रवर्त्तितुमसहन्ते तेनैषामधिष्ठात्रा करणानां स्वरूपसामर्थ्योपयोगाभिज्ञेन भवितव्यमत आह । पुरुषार्थएव हेतुर्न केनचित्कार्य्यते करणम् । भोगापवर्गलक्षणः पुरुषार्थएवानागतावस्थः प्रवर्त्तयति करणानि कृतमत्र तत्स्वरूपाभिज्ञेन कर्त्रा । एतच्च वत्सविवृद्धिनिमित्तमित्यत्रोपपादयिष्यते ॥ ३१ ॥

न केनचित्कार्य्यते करणमित्युक्तं तत्र करणं विभजते ।

करणं त्रयोदशविधं तदाहरणधारणप्रकाशकरम् ।
कार्य्यञ्च तस्य दशधा हार्य्यं धार्य्यं प्रकाश्यञ्च ॥ ३२ ॥

करणं त्रयोदशविधमिन्द्रियाण्येकादश बुद्धिरहङ्कारश्चेति त्रयोदशप्रकारं करणं कारकविशेषः करणम् । नच व्यापारावेशं विना कारकत्वमिति व्यापारमाह, तदिति । यथायथं तत्र कर्म्मेन्द्रियाणि वागादीन्याहरन्ति यथास्वमुपाददते स्वव्यापारेण प्रापुर्वन्तीति यावत् बुद्ध्यहङ्कारमनांसि तु स्ववृत्त्या प्राणादिलक्षणया धारयन्ति बुद्धीन्द्रियाणि प्रकाशयन्ति । आहरणधारणादिक्रियाणां सकर्म्मकतया कि

कर्म्म कतिविधञ्चेत्यत आह । कार्य्यञ्च तस्येति । तस्य त्रयोदशविधस्य करणस्य दशधा आहार्य्यं धार्य्यं प्रकाश्यञ्च । आहार्य्यं व्याप्यं कर्म्मेन्द्रियाणां वचनादानविहरणोत्सर्गानन्दाश्रयं व्याप्याः ते च यथास्वं दिव्यादिव्यतया दश इत्याहार्य्यं दशधा । एवं धार्य्यमप्यन्तःकरणत्रयस्य प्राणादिलक्षणया वृत्त्या शरीरं तच्च पार्थिवादि पाञ्चभौतिकं शब्दादीनां पञ्चानां समुहः पृथिवी । ते च पञ्च दिव्यादिव्यतया दशेति धार्य्यमपि दशधा । एवं बुद्धीन्द्रियाणां शब्दस्पर्शरूपरसगन्धा यथायथं व्याप्याः ते च यथायथं दिव्यादिव्यतया दशेति प्रकाश्यमपि दशधेति ॥ ३२ ॥

त्रयोदशविधकरणेऽवान्तरविभागङ्करोति ।

अन्तःकरणं त्रिविधं दशधा बाह्यं त्रयस्य विषयाख्यम् ।
साम्प्रतकालं बाह्यं त्रिकालमाभ्यन्तरं करणम् ॥ ३३ ॥

अन्तःकरणं त्रिविधं बुद्धिरहङ्कारोमनश्चेति शरीराभ्यन्तरकरणत्वादन्तःकरणम् । दशधा बाह्यमिन्द्रियं त्रयस्यान्तःकरणस्य विषयाख्यं विषयमाख्याति विषयसङ्कल्पाभिमानाध्यवसायेषु कर्त्तव्येषु द्वारीभवति तत्र बुद्धीन्द्रियाण्यालोचनेन कर्म्मेन्द्रियाणि तु यथास्वं व्यापारेण । बाह्यान्तरयोः करणयोर्विशेषान्तरमाह । साम्प्रतकालं बाह्यं त्रिकालमाभ्यन्तरं करणम् । साम्प्रतकालं वर्त्तमानकालं बाह्यमिन्द्रियं वर्त्तमानसमीपमनागतमतीतमपि वर्त्तमानं अतो यागपि वर्त्तमानकालविषया भवति । त्रिकालमाभ्यन्तरंकरणं तद्यथा नदीपूरभेदादभूद्वृष्टिः अस्ति धूमादग्निरिह नाग्निकुञ्जे असत्युपघातके पिपीलिकाण्डसञ्चरणाद्भविष्यति वृष्टिरिति तदनुरूपाश्च सङ्कल्पाभिमानाध्यवसाया भवन्ति । कालश्च वैशेषिकाभिमत एको नानागतादिव्यवहारभेदं प्रवर्त्तयितुमर्हतीति । तस्मादयं यैरूपाधिभेदैरनागतादिभेदं प्रपद्यते स-

न्तु तएवोपाधयोऽनागतादिव्यवहार हेतवः कृतमत्रान्तर्गडुना का-
लेनेति सांख्याचार्य्याः तस्मात्त्र कालरूपतस्वान्तराभ्युपगमइति ॥३३॥

साम्प्रतकालानां बाह्येन्द्रियाणां विषयं विवेचयति ।

बुद्धीन्द्रियाणि तेषां पञ्च विशेषाविशेषविषयाणि ।
वाग्भवति शब्दविषया शेषाणि तु पञ्च विषयाणि ॥२४॥

बुद्धीन्द्रियाणि तेषां दशानामिन्द्रियाणां मध्ये पञ्च विशेषाविशेष-
विषयाणि विशेषाःस्थूलाः शब्दादयः शान्तघोरमूढाःपृथिव्यादिरूपाः।
अविशेषास्तन्मात्राणि सूक्ष्माः शब्दादयः मात्रग्रहणेन भूतभ्रमम-
पाकरोति विशेषाश्चाविशेषाश्च विशेषाविशेषास्तएव विषया येषां
बुद्धीन्द्रियाणां तानि तथोक्तानि । तत्रोर्द्ध स्रोतसां योगिनाञ्च श्रोत्रं
शब्दतन्मात्रविषयं स्थूलशब्दविषयञ्च अस्मदादीनान्तु स्थूल श-
ब्दविषयमेव । एवं तेषां त्वक् स्थूलसूक्ष्मस्पर्शविषया अस्मदादीना-
न्तु स्थूलस्पर्शविषयैव । एवं चक्षुरादयोऽपि तेषामस्मदादीनाञ्च
रूपादिषु स्थूलसूक्ष्मेषु द्रष्टव्याः एवं कर्म्मेन्द्रियेषु मध्ये वाग्भवति
शब्दविषया स्थूलशब्दविषया तद्धेतुत्वात् नतु शब्दतन्मात्रस्य
हेतुः तस्याहङ्कारिकत्वेन वागिन्द्रियेण सहैककारणकत्वात् । शेषा-
णि तु चत्वारि पायूपस्थपाणिपादाख्यानि पञ्चविषयाणि पाण्यादा-
हार्य्याणां घटादीनां पञ्चशब्दाद्यात्मकत्वादिति ॥ ३४ ॥

साम्प्रतं त्रयोदशसु करणेषु केषाञ्चित् गुणभावं केषाञ्चित्
प्रधानभावं सहेतुकमाह ।

सान्तःकरणा बुद्धिः सर्व्वं विषयमवगाहते यस्मात् ।
तस्मात्त्रिविधं करणं द्वारिद्वाराणि शेषाणि ॥ ३५ ॥

द्वारि प्रधानं, शेषाणि करणानि बाह्येन्द्रियाणि द्वाराणि तैरुपनी-
तं सर्व्वं विषयं समनोहङ्कारा बुद्धिर्यस्मादवगाहतेऽध्यवस्यति तस्मा-

द्वात्रिंशत्करणानि द्वाराणि द्वारवती च सान्तःकरणा बुद्धिरिति ॥३५॥

न केवलं बाह्यानीन्द्रियाण्यपेक्ष्य प्रधानं बुद्धिरिति तु ये अध्यहङ्कारमनसी द्वारिणी ते अप्यपेक्ष्य बुद्धिः प्रधानमित्याह ।

एते प्रदीपकल्पा गुणविलक्षणा गुणविशेषाः ।

कृत्स्नं पुरुषस्यार्थं प्रकाश्य बुद्धौ प्रयच्छन्ति ॥ ३६ ॥

यथाहि ग्रामाध्यक्षाः कौटुम्बिकेभ्यः करमादाय विषयाध्यक्षाय प्रयच्छन्ति विषयाध्यक्षश्च सर्वाध्यक्षाय स च भूपतये तथा बाह्येन्द्रियाण्यालोच्य मनसे समर्पयन्ति, मनश्च सङ्कल्प्याहङ्काराय, अहङ्कारश्चाभिमत्य बुद्धौ सर्वाध्यक्षभूतायां तादिदमुक्तं पुरुषस्यार्थं प्रकाश्य बुद्धौ प्रयच्छन्तीति । बाह्येन्द्रियमनोहङ्काराश्च गुणविशेषाः गुणानां सत्त्वरजस्तमसां विकाराः ते तु परस्परविरोधशीला अपि पुरुषार्थेन भोगापवर्गरूपेण एकवाक्यतां नीताः यथा वर्तितैलवह्नयः सन्तमसापनयेन रूपप्रकाशाय मिलिताः प्रदीपः एवमेते गुणविशेषा इति योजना ॥ ३६ ॥

कस्मात्पुनर्बुद्धौ प्रयच्छन्ति नतु बुद्धिरहङ्काराय द्वारिणे मनसे वेत्यतआह ।

सर्वं प्रत्युपभोगं यस्मात्पुरुषस्य साधयति बुद्धिः ।

सैव च विशिनष्टि पुनः प्रधानपुरुषान्तरं सूक्ष्मम् ॥ ३७ ॥

पुरुषार्थस्य प्रयोजकत्वात्तस्य यत्साधनं तत् प्रधानं बुद्धिश्चास्य साक्षात्साधनं तस्मात्सैव प्रधानम् । यथा सर्वाध्यक्षः साक्षाद्राजार्थसाधनतया प्रधानम् इतरे तु ग्रामाध्यक्षादयस्तं प्रति गुणभूताः । बुद्धिर्हि पुरुषसन्निधानात्तच्छायापत्त्या तद्रूपेव सर्वविषयोपभोगं पुरुषस्य साधयति सुखदुःखानुभवो हि भोगः स च बुद्धौ बुद्धिश्च पुरुषरूपेवेति । सा च पुरुषमुपभोजयति । यथार्थालोचनसङ्कल्पाभिमानाश्च

तत्तद्रूपपरिणामेन बुद्धावुपसंक्रान्ताः, तथा इन्द्रियादिव्यापारा अपि बुद्धेरेव स्वव्यापारेण अध्यवसायेन सह व्यापारिभवन्ति यथा स्वसैन्येन सह ग्रामाध्यक्षादिसैन्यं सर्व्वाध्यक्षस्य भवति। सर्व्वं शब्दादिकं प्रति य उपभोगः पुरुषस्य तं साधयति। ननु पुरुषस्य सर्व्वविषयोपभोगसम्पादिका बुद्धिस्तत्रानिर्मोक्षः कथमत आह। कथं प्रधानपुरुषयोरन्तरं विशेषं विशिनष्टि करोति। ननु प्रधानपुरुषयोरन्तरस्य कूटस्थनित्यत्वादनित्यत्वं तत्कृतस्य मोक्षस्य स्यादित्यत आह। विशिनष्टि प्रधानं सविकारमन्यदहमस्य इति विद्यमानमेवान्तरमविवेकेनाविद्यमानमिव बुद्धिं बोधयति येनानित्यत्वमित्यर्थः। यथैदनपाकं पचतीति करणंच प्रतिपादनमनेनापवर्गः पुरुषार्थो दर्शितः। सूक्ष्ममिति दुर्लक्ष्यं तदन्तरम् ॥ ३७ ॥

तदेवं करणानि विभज्य विशेषाविशेषान् विभजते।

तन्मात्राण्यविशेषास्तेभ्यो भूतानि पञ्च पञ्चभ्यः।
एते स्मृता विशेषाः शान्ता घोराश्च मूढाश्च ॥ ३८ ॥

शब्दादितन्मात्राणि सूक्ष्माणि न चैषां शान्तत्वादिरस्ति उपभोगयोग्यो विशेषइति मात्रशब्दार्थः। अविशेषानुक्त्वा विशेषान् वक्तुमुत्पत्तिमेषामाह। तेभ्योभूतानि तेभ्यस्तन्मात्रेभ्यः यथासंख्यमेकाद्वित्रिचतुःपञ्चभ्यो भूतानि आकाशानिलानलसलिलावनिरूपाणि पञ्च पञ्चभ्यस्तन्मात्रेभ्यः अल्पेषां भूतानामुत्पत्तिर्विशेषत्वे किमायातमित्यत्र आह। एते स्मृता विशेषाः, कुतः शान्ताघोराश्च च एको हेतौ द्वितीयः समुच्चये यस्मादाकाशादिषु स्थूलेषु सत्त्वप्रधानतया कैश्चिच्छान्ताः सुखाः प्रसन्ना लघवः कैश्चिद्रजःप्रधानतया घोरा दुःखा अनवस्थिताः कैश्चित्तमः प्रधानतया मूढा विषण्णा गुरवः। ते ऽमी परस्परव्यावृत्ता अनुभूयमाना विशेषाइति स्थूलाइति चोच्यन्ते तन्मात्रा-

णि तु अस्मदादिभिः परस्परव्यावृत्तानि नानुभूयन्त इत्यविशेषाइति सूक्ष्माइति चोच्यन्ते ॥ ३८ ॥

विशेषाणामवान्तरविशेषमाह ।

सूक्ष्मा मातापित्रजाः सहप्रभूतास्त्रिधा विशेषाः स्युः ।
सूक्ष्मास्तेषां नियता मातापित्रजा निवर्त्तन्ते ॥ ३९ ॥

त्रिधा विशेषाः स्युः तान् विशेषानाह, सूक्ष्माः सूक्ष्मदेहाः परिकल्पिताः मातापित्रजाः षाट्कौशिकाः । तत्र मातुरसृङ्मांसस्नायुमेदोऽस्थिमज्जानः इति षट्कोशगताः प्रकृतयः महान्ति भूतानि प्रभूतानि तैः सह सूक्ष्मशरीरमेकोविशेषः मातापित्रजो द्वितीयो महाभूतानि तृतीयो महाभूतसर्गे च घटादीनां निवेश इति । सूक्ष्ममातापितृजयोर्देहयोर्विशेषमाह, सूक्ष्माश्चैषां विशेषाणां मध्ये ये ते नियताः । मातापितृजा निवर्त्तन्ते रसान्ता वा भस्मान्ता वा विड्न्तावेति ॥ ३९ ॥

सूक्ष्मशरीरं विभजते ।

पूर्वोत्पन्नमसक्तं नियतं महदादिसूक्ष्मपर्य्यन्तम् ।
संसरति निरुपभोगं भावैरधिवासितं लिङ्गम् ॥ ४० ॥

प्रधानेनादिसर्गे प्रतिपुरुषमेकैकमुत्पादितम् असक्तमव्याहतं शिलामप्यनुविशति नियतम् आ चादिसर्गादा च महाप्रलयादवतिष्ठते । महदादिसूक्ष्मपर्य्यन्तं महदहङ्कारैकादशेन्द्रियपञ्चतन्मात्रपर्य्यन्तम् एषां समुदायः सूक्ष्मशरीरं शान्तघोरमूढैरिन्द्रियैरन्वितत्वाद्विशेषः । नन्वस्त्येतदेव शरीरं भोगायतनं पुरुषस्य कृतं दृश्यमानेन षाट्कौशिकेन शरीरेणेत्यतआह । संसरतीति । उपात्तमुपात्तं षाट्कौशिकं शरीरं जहाति हायं हायं चोपादत्ते कस्मान्निरुपभोगं यतः षाट्कौशिकं शरीरं विना सूक्ष्म शरीरं निरुपभोगं यस्मात्तस्मात्संसरति । न-

धर्म्मनिमित्तः संसारः न च सूक्ष्मशरीरस्यास्ति तद्योगस्तत्कथं सरतीत्यत आह, भावैरधिवासितं धर्म्माधर्म्मज्ञानाज्ञानवैराग्यावैराग्यैश्वर्यानैश्वर्याणि भावास्तदन्विता बुद्धिः तदन्वितंच सूक्ष्मशरीरमिति दपि भावैरधिवासितं यथा सुरभिचम्पकसम्पर्कादुस्रं तदामोदवासिम्भवति । तस्माद्भावैरधिवासितत्वात्संसरति । कस्मात्पुनः प्रधानमिव हाप्रलये ऽपि तच्छरीरं न तिष्ठतीत्यत आह । [redacted] । लयं गछतीति लिङ्गम् । सहेतुकत्वेन चास्य लिङ्गत्वमितिभावः ॥ ४० ॥

स्यादेतत् । बुद्धिरेव साहङ्कारेन्द्रिया कस्मान्न संसरति कृतं क्ष्मशरीरेणाप्राणिकेनेत्यत आह ।

चित्रं यथाश्रयमृते स्थाण्वादिभ्यो विना यथाच्छाया ।
तद्वद्विना विशेषैर्न तिष्ठति निराश्रयं लिङ्गम् ॥ ४१ ॥

लिङ्गनात् ज्ञापनात् बुद्ध्यादयोलिङ्गं तदनाश्रितं न तिष्ठति । न्मप्रयाणान्तराले बुद्ध्यादयः प्रत्युत्पन्नशरीराश्रिताः, प्रत्युत्पन्नपञ्च न्मात्रत्वे सति बुद्ध्यादित्वात्, दृश्यमानशरीरवृत्तिबुद्ध्यादिवत् । वेना विशेषैरिति, सूक्ष्मैः शरीरैरित्यर्थः । आगमश्चात्र भवति । ततः तयन्तः [redacted] वशं गतम् । अङ्गुष्ठमात्रं पुरुषं निश्चकर्ष यमो बलादिति । अङ्गुष्ठमात्रत्वेन सूक्ष्मतामुपलक्षयति । आत्मनो निष्कर्षासम्भवेन सूक्ष्ममेव शरीरं पुरुषस्तदपि हि पुरि स्थूलशरीरे शेते ॥ ४१ ॥

एवंसूक्ष्मशरीरास्तित्वमुपपाद्य यथा संसरति येन च हेतुना तदुभयमाह ।

पुरुषार्थहेतुकमिदं निमित्तनैमित्तिकप्रसङ्गेन ।
प्रकृतेर्विभुत्वयोगान्नटवद्व्यवतिष्ठते लिङ्गम् ॥ ४२ ॥

पुरुषार्थेन हेतुना प्रयुक्तं तिमित्तं धर्म्माधर्म्मादि नैमित्तिकं तेषु

तेषु निकायेषु यथायथं षाट्कौशिकशरीरग्रहः स हि धर्म्मादिनिमित्तभवः निमित्तंच नैमित्तिकंच तत्र यः प्रसङ्गः प्रसक्तिस्तयानटवद्व्यवतिष्ठते लिङ्गं सूक्ष्मशरीरम् । यथाहि नटस्तां तां भूमिकां विधाय परशुरामोवा अज्ञातशत्रुर्वा वत्सराजो वा भवति, एवं तत्तत्स्थूलशरीरग्रहणात् देवो वा मनुष्यो वा पशुर्वा वनस्पतिर्वा भवति सूक्ष्मं शरीरमित्यर्थः । कुतस्त्यः पुनरस्येदृशोमहिमेत्यत आह । प्रकृतेर्विभुत्वयोगात् तथाच पुराणम् । वैश्वरूप्यात् प्रधानस्य परिणामोऽयमद्भुतइति ॥४२॥

निमित्तनैमित्तिकप्रसङ्गेनेयुक्तं तत्र निमित्तं नैमित्तिकञ्च विभजते ।

सांसिद्धिकाश्च भावाः प्राकृतिकावैकृताश्च धर्म्माद्याः ।
दृष्टाः करणाश्रयिणः कार्याश्रयिणश्च कललाद्याः ॥४३॥

वैकृतिका नैमित्तिकाः प्राकृतिकाः सांसिद्धिका भावाः स्वाभाविका इति यावत् । तथाहि, सर्गादावादिविद्वान् भगवान् कपिलोमहामुनिर्धर्मज्ञानवैराग्यैश्वर्यसंपन्नः प्रादुर्बभूवेति स्मरन्ति । वैकृताश्च भावाः असांसिद्धिकाः उपायानुष्ठानोत्पन्नाः यथा प्राचेतसप्रभृतीनां महर्षीणाम् । एवमधर्म्माज्ञानावैराग्यानैश्वर्याण्यपि । कार्यं शरीरं तदाश्रयिणस्तस्यावस्थाः कललबुद्बुदमांसपेशीकरण्डाङ्गप्रत्यङ्गव्यूहाः गर्भस्थस्य ततोनिर्गतस्य बालस्य बाल्यकौमारयौवनवार्द्धकानीति ॥४३॥

अवगतानि निमित्तनैमित्तिकानि कतमस्य तु निमित्तस्य कतमन्नैमित्तिकमित्यत आह ।

धर्म्मेण गमनमूर्द्धं गमनमधस्ताद्भवत्यधर्म्मेण ।
ज्ञानेन चापवर्गो विपर्ययादिष्यते बन्धः ॥ ४४ ॥

धर्म्मेण गमनमूर्द्धं द्युप्रभृतिषु लोकेषु गमनमधस्ताद्भवत्यधर्म्मेण सुतलादिषु ज्ञानेन चापवर्गः । तावदेव प्रकृतिरारभते न यावद्विवे-

ख्यातिं करोति, अथ विवेकख्यातौ सत्यां कृतकृत्यतया विवेक-ख्यातिमन्तं पुरुषं प्रति निवर्त्तते । यदाहुः । विवेकख्यातिपर्य्यन्तं याति प्रकृतिरेवमिति । विपर्ययादतत्त्वज्ञानादिष्यते बन्धः । तच्च त्रिविधः प्राकृतिको वैकृतिको दाक्षणिक इति तत्र प्रकृतावात्मज्ञानात् प्रकृतिमुपासते तेषां प्राकृतिकोबन्धः । यः पुराणे प्रकृतिलयान् प्रत्युच्यते । पूर्णं शतसहस्रन्तु तिष्ठन्त्यव्यक्तचिन्तकाइति । वैकारिकोबन्धस्तेषां येविकारानेव भूतेन्द्रियाहङ्कारबुद्धीः पुरुषबुद्ध्योपासते तान् प्रतीदमुच्यते । दश मन्वन्तराणीह तिष्ठन्तीन्द्रियचिन्तकाः । भौतिकास्तु शतं पूर्णं सहस्रन्त्वाभिमानिकाः । बौद्धा दशसहस्राणि तिष्ठन्ति विगतज्वराः । ते खल्वमी विदेहा येषां वैकृतिकोबन्धइति । इष्टापूर्त्तेन दाक्षिणः पुरुषतत्त्वानभिज्ञो हि इष्टापूर्त्तकारी कामोपहतमना बध्यतइति ॥ ४४ ॥

वैराग्यात्प्रकृतिलयः संसारो भवति राजसाद्रागात् ।
ऐश्वर्य्यादविघातो विपर्ययात्तद्विपर्य्यासः ॥ ४५ ॥

वैराग्यात्प्रकृतिलयः पुरुषतत्त्वानभिज्ञस्य वैराग्यमात्रात्प्रकृतिलयो प्रकृतिग्रहणात् प्रकृतिमहदहङ्कारभूतेन्द्रियाणि गृह्यन्ते तेष्वात्मबुद्धया उपास्यमानेषु लयः । कालान्तरेण च पुनराविर्भवन्तीति । संसारोभवति राजसाद्रागात्, राजसादित्यनेन रजसोदुःखत्वात्संसारस्य दुःखहेतुता सूचिता । ऐश्वर्य्यादविघातः इच्छायाः इश्वरो हि यदिच्छति तत्करोति । विपर्य्ययादनैश्वर्यात् तद्विपर्यासः सर्वत्रेच्छाविघातइत्यर्थः ॥ ४५ ॥

बुद्धिधर्म्मान् धर्मादीनष्टौ भावान् समासव्यासाभ्यां मुमुक्षूणां हेयोपादेयान् दर्शयितुं प्रथमतस्तावत्समासमाह ।

एष प्रत्ययसर्गो विपर्ययाशक्तितुष्टिसिद्ध्याख्यः ।

गुणवैषम्यविमर्दात्तस्य च भेदास्तु पञ्चाशत् ॥ ४६ ॥

एष इति प्रतीयतेऽनेनेति प्रत्ययोबुद्धिस्तस्य सर्गः तत्र विपर्ययोऽज्ञानमविद्या बुद्धिधर्म्मः अशक्तिरपि करणवैकल्यहेतुका बुद्धिधर्म्म एव तुष्टिसिद्धी अपि वक्ष्यमाणे बुद्धिधर्म्मावेव । तत्र विपर्ययाशक्तितुष्टिषु यथायोगं सप्तानां धर्म्मादीनां ज्ञानवर्जमन्तर्भावः सिद्धौ च ज्ञानस्येति । व्यासस्माह, तस्य च भेदास्तु पञ्चाशत् कस्माद्गुणवैषम्यविमर्दात् । गुणानां वैषम्यमेकैकस्याधिकबलता द्वयोर्द्वयोर्वा । एकैकस्य न्यूनबलता द्वयोर्द्वयोर्वा । तेन न्यूनाधिक्ये मन्दमध्यातिमात्रतया यथाकार्यमुन्नीयेते । तदिदं गुणानां वैषम्यं तेनोपमर्दः एकैकस्य न्यूनबलस्य द्वयोर्वाभिभवः तस्मात्तस्य भेदाः पञ्चाशदिति ॥ ४६ ॥

तानेव पञ्चाशद्भेदान् गणयति ।

पञ्च विपर्ययभेदा भवन्त्यशक्तिश्च करणवैकल्यात् ।
अष्टाविंशतिभेदास्तुष्टिर्नवधाष्टधा सिद्धिः ॥ ४७ ॥

अविद्यास्मितारागद्वेषाभिनिवेशाः यथासंख्यं तमोमोहमहामोहतामिस्रान्धतामिस्रसंज्ञकाः पञ्च विपर्ययविशेषा विपर्ययभवानामस्मितादीनां विपर्ययस्वभावत्वात् । यद्वा यदविद्यया विपर्ययेणावधार्यते वस्तु अस्मिता दयस्तत्स्वभावाः सन्तस्तदभिनिविशन्ते । अतएव पञ्चपर्व्वा अविद्येत्याह, भगवान् वार्षगण्यः ॥ ४७ ॥

सम्प्रति पञ्चानां विपर्ययभेदानामवान्तरभेदमाह ।

भेदस्तमसोऽष्टविधोमोहस्य च दशविधोमहामोहः ।
तामिस्रोऽष्टादशधा तथा भवत्यन्धतामिस्रः ॥ ४८ ॥

भेदस्तमसोऽविद्याया अष्टविधः अष्टस्वव्यक्तमहदहङ्कारपञ्चतन्मात्रेषु अनात्मस्वात्मबुद्धिरविद्या तमः । अष्टविधविषयत्वात्तस्याष्ट-

वधत्वं मोहस्य च। अत्राप्यष्टविधोभेदइति चेनानुषज्यते । देवाह्यष्ट-
विधमैश्वर्य्यमासाद्यामृतत्वाभिमानिनोऽणिमादिकमात्मीयं शाश्वतिकम-
भिमन्यन्ते इति सोयमस्मितामोहोऽष्टविधैश्वर्यविषयत्वादष्टविधः । द-
शविधोमहामोहः शब्दादिषु पञ्चसु दिव्यादिव्यतयादशविधेषु विष-
येषु रञ्जनीयेषु राग आसक्तिर्महामोहः स च दशविधविषयत्वाद-
शविधः । तामिस्त्रोद्वेषोऽष्टादशधा । शब्दादयो दशविषयारञ्जनी
याः स्वरूपतः, ऐश्वर्य्यं त्वणिमादिकं न स्वरूपतोरञ्जनीयं कि-
न्तु रञ्जनीयशब्दाद्युपायाः ते च शब्दादयउपस्थिताः परस्परेणो-
पहन्यमानास्तदुपायाश्चाणिमादयः स्वरूपेणैव कोपनीयाभवन्तीति
शब्दादिभिर्दशभिः सहाणिमाद्यष्टकमष्टादशधेति तद्विषयोद्वेषस्ता-
स्त्रोऽष्टादशविषयत्वादष्टादशधेति । तथा भवत्यन्धतामिस्त्रः अभिनि-
वेशोन्धतामिस्त्रः, तथेत्यनेनाष्टादशधेत्यनुषज्यते । देवाः खल्वणिमा-
दिकमष्टविधमैश्वर्य्यमासाद्य दश शब्दादीन् भुञ्जानाः मास्म शब्दा-
दयेभोग्यास्तदुपायाश्चाणिमादयो ऽस्माकमसुरादिभिरुपघ्नानिषतेति
विभ्यति । तदिदं भयमभिनिवेशोऽन्धतामिस्त्रोऽष्टादशविषयत्वाद-
ष्टादशधेति । सोऽयं पञ्चविधोविपर्ययोऽवान्तरभेदाद् द्वाषष्टिरिति
॥ ४८ ॥

तदेवं पञ्च विपर्ययभेदानुक्ता अष्टाविंशतिभेदामशक्तिमाह ।

एकादशेन्द्रियवधाः सह बुद्धिवधैरशक्तिरुद्दिष्टा ।
सप्तदश बधा बुद्धेर्विपर्ययात्तुष्टिसिद्धीनाम् ॥ ४९ ॥

इन्द्रियवधस्य ग्रहोबुद्धिवधहेतुत्वेन नत्वशक्तिभेदपूर्णत्वेन । एका-
दशेन्द्रियवधाः । बाधिर्यं कुष्ठितान्धत्वं जडता जिघ्रता तथा । मूकता
कौण्यपाङ्गुत्वक्लैब्योदावर्त्तमन्दताः । यथासंख्यं श्रोत्रादीनामिन्द्रिया-

स्मृताः इति

णां बधाः एतावत्येव तु तद्धेतुका बुद्धेरशक्तिः स्वव्यापारे भवति । तथा चैकादशहेतुकत्वादेकादशधा बुद्धेरशक्तिरुच्यते । हेतुहेतुमतोरभेदविवक्षया च सामानाधिकरण्यम् । तदेवमिन्द्रियवधद्वारेण बुद्धेरशक्तिमुक्त्वा स्वरूपतोऽशक्तीराह सह बुद्धिबधैरिति । कति बुद्धेः स्वरूपतो बधाइत्यत आह । सप्तदशबधा बुद्धेः, कुतः विपर्ययात्तुष्टिसिद्धीनां तुष्टयो नवधेति तद्विपर्ययास्तन्निरूपणान्नवधा भवन्ति । एवं सिद्धयोऽष्टाविति तद्विपर्ययास्तन्निरूपणाद् अष्टौभवन्तीति ॥ ४९ ॥

तुष्टिर्नवधेत्युक्तं ताः परिगणयति ।

आध्यात्मिक्यश्चतस्रः प्रकृत्युपादानकालभाग्याख्याः ।
बाह्या विषयोपरमात्पञ्च नव तुष्टयोऽभिमताः ॥ ५० ॥

आध्यात्मिक्यः प्रकृतिव्यतिरिक्तआत्मास्तीति प्रतिपद्य ततोऽस्य श्रवणमननादिना विवेकसाक्षात्काराय त्वसदुपदेशतुष्टो यो न प्रयतते तस्य चतस्त्रआध्यात्मिक्यस्तुष्टयोभवन्ति । प्रकृतिव्यतिरिक्तमात्मानमधिकृत्य यस्मात्तास्तुष्टयस्तस्मादाध्यात्मिक्यः, कास्ता इत्यत आह । प्रकृत्युपादानकालभाग्याख्याः । प्रकृत्यादिराख्या यासां तास्तथोक्ताः । तत्रप्रकृत्याख्या तुष्टिर्यथा, कस्यचिदुपदेशे विवेकसाक्षात्कारो हि प्रकृतिपरिणामभेदः तञ्च प्रकृतिरेव करोतीति कृतं तद्ध्यानाभ्यासेन तस्मादेवमेवास्तु हे वत्सेति । सेयमुपदेष्टव्यस्य (शिष्यस्य) प्रकृतौ तुष्टिः प्रकृत्याख्या अम्भउच्यते । या तु प्राक्त्यपि विवेकख्यातिर्न प्रकृतिमात्राद्भवति, मा भूत्सर्व्वस्य सर्व्वदा तन्मात्रस्य सर्व्वान् प्रत्यविशेषात्प्रव्रज्या यास्तु सा भवति तस्मात्प्रव्रज्यामुपाददीथाः कृतं तेनध्यानाभ्यासेनात्मन्नित्युपदेशे या तुष्टिः सोपादानाख्या सलिलमुच्यते । या तु प्रव्रज्यापि न सद्योनिर्वाणहेति सैव कालपरिपाकमपेक्ष्य सिद्धिं ते विधास्यति अलमुत्तप्तया तवेत्युपदेशे या तुष्टिः सा कालाख्या ओ-

घउच्यते । या तु न कालान्नाप्युपादानाद्विवेकख्यातिरपितु भाग्या-
देव अतएव मन्दालसापत्यान्यतिबालानि मातुरुपदेशमात्रादेव विवे-
कख्यातिमन्तिमुक्तानि बभूवुः तत्र भाग्यमेव हेतुर्नान्यदित्युपदेशो-
या तुष्टिः सा भाग्याख्या वृष्टिरुच्यते । बाह्या दर्शयति । बाह्यास्तुष्ट-
यो विषयोपरमात्पञ्च । याः खल्वनात्मनः प्रकृतिमहदहङ्कारादीना-
मित्यभिन्यमानस्य वैराग्ये सति तुष्टयस्ता बाह्याः । आत्मज्ञानाभावेना-
त्मानमधिकृत्यप्रवृतोरिति ताश्च वैराग्ये सति सम्भवन्ति तुष्टयइति वैरा-
ग्यहेतुपञ्चकत्वाद्वैराग्याण्यापि पञ्च तत्पञ्चत्वात् तुष्टयः पञ्चेति ।
उपरम्यतेऽनेनेत्युपरमो वैराग्यम् । विषयादुपरमो विषयोपरमः । विषया
भोग्याः शब्दादयः पञ्च उपरमा अपि पञ्च । तथाहि अर्ज्जनरक्ष-
णक्षयभोगाहिंसादोषदर्शजन्मान उपरमाः पञ्च भवन्ति । तथाहि । से-
वादयोधनार्जनोपायास्ते च सेवकादीन् दुःखाकुर्वन्ति । दृष्यद्वरीश्वर-
द्वाःस्थदण्डिचण्डार्द्धचन्द्रजाम् । वेदनां भावयन् प्राज्ञः कः सेवासु प्रस-
ज्जते । एवमन्येऽप्यर्ज्जनोपायादुःखमिति विषयोपरमे या तुष्टिः सैषा
पार मुच्यते । तथार्जितं धनं राजैकागारिकाग्निजलौघादिभ्योविनंक्ष्य-
तीति तद्रक्षणे महद्दुःखमिति भावयतो विषयोपरमे या तुष्टिः सा द्वितीया
पारमुपारमुच्यते । तथा महतायासेनार्ज्जितं धनं भुज्यमानं क्षीयते इति
तत्क्षयं भावयतो विषयोपरमे या तुष्टिः सा तृतीया पारापारमुच्यते ।
एवं शब्दादिभोगाभ्यासाद्वर्द्धन्ते कामास्ते च विषयोपरमे या तुष्टिः
सा चतुर्थी अनुत्तमाम्भ उच्यते । एवं नानुपहत्य भूतानि विषयोप-
भोगः सम्भवतीति हिंसादोषदर्शनाद्विषयो परमे या तुष्टिः सा पञ्च-
मी उत्तमाम्भ उच्यते । एवमाध्यात्मिकीभिश्चतसृभिर्बाह्याभिश्च पञ्च-
भिर्नव तुष्टयोऽभिमताः ॥ ५० ॥

गौणमुख्यभेदाभिन्नाः सिद्धीराह ।

ऊहःशब्दोऽध्ययनं दुःखविघातास्त्रयः सुहृत्प्राप्तिः ।
दानञ्च सिद्धयोऽष्टौ सिद्धेः पूर्वोऽङ्कुशस्त्रिविधः ॥५१॥

विहन्यमानस्य दुःखस्य त्रित्वात्तद्विघातास्त्रय इति इमा मुख्याः तिस्रः सिद्धयस्तदुपायतया त्वितरा गौण्यः पञ्च सिद्धयः तास्ता अपि हेतुहेतुमत्तया व्यवस्थिताः, तत्राध्ययनलक्षणा सिद्धिर्हेतुरेव मुख्या स्तु सिद्धयोहेतुमत्यएव मध्यमास्तु हेतुहेतुमत्यः विधिवद्गुरुमुखादध्यात्मविद्यानामक्षरस्वरूपग्रहणमध्ययनं प्रथमा सिद्धिस्तारमुच्यते । तत्कार्य्यम् शब्दः शब्द इति शब्दज्ञानजनितमर्थज्ञानमुपलक्षयति, कार्ये कारणोपचारात् । सा द्वितीया सिद्धिः श्रुतारमुच्यते । तदिदं द्विधा श्रवणं ऊहस्तर्कः आगमाविरोधिन्यायेनागमार्थपरीक्षणम् । परीक्षणञ्च संशयपूर्वपक्षनिरासेनोत्तरपक्षव्यवस्थापनं, तदिदं मननमाचक्षते आगमिनः । सा तृतीया सिद्धिस्तारतारमुच्यते । सुहृत्प्राप्तिर्न्यायेन हि स्वयं परीक्षितमप्यर्थमश्रद्दधते न यावद्गुरुशिष्यसब्रह्मचारिभिः सहसंवादयते अतः सुहृदां गुरुशिष्यसब्रह्मचारिणां संवादकानां प्राप्तिः सा सिद्धिश्चतुर्थी रम्यकमुच्यते । दानंच शुद्धिर्विवेकज्ञानस्य दैप् शोधने इत्यस्माद्धातोर्दानपदव्युत्पत्तेः । यथाह भगवान् पतञ्जलिः, विवेकख्यातिरविप्लवा हानोपाय इति । अविप्लवः शुद्धिः, सा च सवासनसंशयविपर्य्यासानां परिहारेण विवेकसाक्षात्कारस्य स्वच्छप्रवाहेऽवस्थानम् । सा च न विनादरनैरन्तर्य्यदीर्घकालसेविताभ्यासपरिपाकाद्ध्रुव-तीति दानेनविवेकख्यात्या कार्य्येण सोऽपि संगृहीतः । सेयं पञ्चमी सिद्धिः सद्भिर्मुदितमुच्यते । तिस्रश्च मुख्याः सिद्धयः प्रमोदमुदितमोदमाना इत्यष्टौ सिद्धयः । अन्ये व्याचक्षते विनोपदेशादिना प्राग्भवीयाभ्यासवशात्तत्त्वस्य स्वयमूहनं यत्सा सिद्धिरूहः । यस्य सांख्यशास्त्रपाठमधीत्य

माकर्ण्य तावज्ज्ञानमुत्पद्यते सा सिद्धिः शब्दः पाठादनन्तरं भावात् । स्य शिष्याचार्य्यसंवादेन सांख्यशास्त्रं ग्रन्थतोऽर्थतश्चाधीत्य ज्ञान- त्पद्यते साध्ययनहेतुका सिद्धिरध्ययनं सुहृत्प्राप्तिरिति यस्याधिगततत्त्वं हृदं प्राप्य ज्ञानमुत्पद्यते सा ज्ञानलक्षणा सिद्धिस्तस्य सुहृत्प्राप्तिः । ानञ्च सिद्धिहेतुः धनादिदानेनाराधितो ज्ञानी ज्ञानं प्रयच्छति । स्य च युक्तायुक्तत्वे सूरिभिरेवावगन्तव्ये'इति कृतं परदोषोद्भावनेन ः सिद्धान्तमात्रव्याख्यानप्रवृत्तानामिति । सिद्धितुष्टिविपर्य्ययेणाश- क्तेर्बुद्धिबधः सप्तदशधा द्रष्टव्यः । अत्र प्रत्ययसर्गे सिद्धिरुपादेयेति ासिद्ध मेव तन्निवारणहेतवस्तु विपर्य्ययाशक्तितुष्टयो हेया इत्याह, सि- द्धेः पूर्वोऽङ्कुशस्त्रिविधः । पूर्व इति विपर्ययाशक्तितुष्टिः परामृशति ाः सिद्धिकारिणीनामङ्कुशो निवारकत्वात् अतः सिद्धिपरिपन्थित्वा- द्वैपर्यया शक्तितुष्टयो हेया इत्यर्थः ~~अङ्कुश इति~~ ॥ ५१ ॥

स्यादेतत् । पुरुषार्थप्रयुक्ता सृष्टिः स च पुरुषार्थः प्रत्ययसर्गाद्वा न्मात्रसर्गाद्वा सिध्यतीति कृतमुभयसर्गेणेत्यत आह ।

न विना भावैर्लिङ्गं न विना लिङ्गेन भावनिर्वृत्तिः ।
लिङ्गाख्योभावाख्यस्तस्मादुद्विविधः प्रवर्त्तते सर्गः ॥५२॥

लिङ्गमिति तन्मात्रसर्गमुपलक्षयति भावैरिति च प्रत्ययसर्गम् । एतदुक्तं भवति । तन्मात्रसर्गस्य पुरुषार्थसाधनत्वं स्वरूपञ्च न प्रत्य- यसर्गाद्विना भवति एवं प्रत्ययसर्गस्य स्वरूपं पुरुषार्थसाधनत्वञ्च न तन्मात्रसर्गादृते इत्युभयथा सर्गप्रवृत्तिः । भोगः पुरुषार्थो न भोग्या- न् शब्दादीन् भोगायतनञ्च शरीरद्वयमन्तरेण सम्भवतीति उपप- न्नस्तन्मात्रसर्गः । एवं स एव भोगो भोगसाधनानीन्द्रियाणि चान्तः- करणानि चान्तरेण न सम्भवति, न च तानि धर्म्मादीन् भावान् विना सम्भवन्ति, न चापवर्गहेतुर्विवेकख्यातिरुभयसर्गं विनेत्युपपन्न

उभयविधः सर्गः । अनादित्वाच्च बीजाङ्कुरवन्नान्योन्याश्रयदोषमावहति कल्पादावपि प्राचीनकल्पोत्पन्नभावलिङ्गसंस्कारवशाद्भावलिङ्योरुत्पत्तिर्नानुपपन्नेति सर्व्वमवदातम् ॥ ५२ ॥

विभक्तः प्रत्ययसर्गः भूतादिसर्गं विभजते ।

अष्टविकल्पो दैवस्तैर्यग्योनश्च पञ्चधा भवति ।
मानुष्यश्चैकविधः समासतो भौतिकः सर्गः ॥ ५३ ॥

ब्राह्मप्राजापत्यैन्द्रपैत्र्यगान्धर्वयाक्षराक्षसपैशाचा इत्यष्टविधो दैवः सर्गः । तैर्यग्योनश्च पञ्चधा भवति पशुमृगपक्षिसरीसृपस्थावरा इति । मानुष्यश्चैकविधः ब्राह्मणत्वाद्यवान्तरभेदाविवक्षया संस्थानस्य चतुर्व्वप्यविशेषादिति समासतः संक्षेपतो भौतिकः सर्गः । घटादयस्त्वशरीरत्वेऽपि स्थावरा एवेति ॥ ५३ ॥

भौतिकस्यास्य सर्गस्य चैतन्योत्कर्षनिकर्षतारतम्याभ्यामूर्द्धाधोमध्यभावेन त्रैविध्यमाह ।

ऊर्द्ध सत्त्वविशालस्तमोविशालश्च मूलतः सर्गः ।
मध्ये रजोविशालो ब्रह्मादिस्तम्बपर्य्यन्तः ॥ ५४ ॥

ऊर्द्धं सत्वविशालो द्युप्रभृतिः सत्यान्तो लोकः सत्वबहुलः तमोविशालश्च मूलतः सर्गः पश्वादिः स्थावरान्तः सोऽयं मोहमयत्वात्तमोबहुलः । भूर्लोकस्तु सप्तद्वीपसमुद्रसन्निवेशो मध्ये रजोविशालः धर्म्माधर्म्मानुष्ठानपरत्वाद्दुःखबहुलत्वाच्च । तामिमां लोकसंस्थितिं संक्षिपति ब्रह्मादिस्तम्बपर्य्यन्तः स्तम्बग्रहणेन वृक्षादयः सङ्गृहीताः ॥ ५४ ॥

तदेवं सर्गं दर्शयित्वा तस्यापवर्गसाधनवैराग्योपयोगिनीं दुःखहेतुतामाह ।

तत्र जरामरणकृतं दुःखं प्राप्नोति चेतनः पुरुषः ।
लिङ्गस्याविनिवृत्तेस्तस्माद्दुःखं स्वभावेन ॥ ५५ ॥

तत्र शरीरादौ यद्यपि विविधा विचित्रानन्दभोगभागिनः प्राण भृद्भेदास्तथापि सर्व्वेषां जरामरणकृतं दुःखमविशिष्टं सर्व्वस्य खलु कृमेरपि मरणत्रासोमा न भूवम्भूयासमित्येवमात्मको ऽस्ति । दुःखं भयहेतुरिति मरणं दुःखम् । स्यादेतत् । सुखादयः प्राकृता बुद्धिगुणास्तत्कथमेते चेतनसम्बन्धिनोभवन्तीत्यत आह । पुरुषइति । पुरि लिङ्गे शेते पुरुषः लिङ्गञ्च तत्सम्बन्धीति चेतनो ऽपि तत्सम्बन्धी भवतीत्यर्थः । कुतः पुनर्लिङ्गसम्बन्धि दुःखं पुरुषस्येत्यत आह । लिङ्ग स्याविनिवृत्तेः । पुरुषाद्भेदाग्रहाल्लिङ्गधर्म्मानात्मन्यध्यस्यति पुरुषः । अथवा दुःखप्राप्तावबधिः कथ्यते लिङ्गं यावन्न निवर्त्तते तावदिति ॥ ५५ ॥

ऊक्तस्य सर्गस्य कारणविप्रतिपत्तौ निराकरोति ।

इत्येष प्रकृतिकृतो महदादिविशेषभूतपर्य्यन्तः ।
प्रतिपुरुषविमोक्षार्थं स्वार्थ इव परार्थ आरम्भः ॥ ५६ ॥

आरम्भत इत्यारम्भः सर्गः प्रकृत्यैव कृतो नेश्वरेण न ब्रह्मोपादानो नाप्यकारणः अकारणत्वे ह्यत्यन्तभावो ऽत्यन्ताभावो वा भवेत् । न ब्रह्मोपादानश्चितिशक्तेरपरिणामात्, नेश्वराधिष्ठितप्रकृतिकृतो निर्व्यापारस्याधिष्ठातृत्वासम्भवात्, नहि निर्व्यापारस्तक्षा वास्याद्यधि तिष्ठति । ननु प्रकृतिकृतश्चेत्तस्या नित्यायाः प्रवृत्तिशीलाया अनुपरमात्सदैव सर्गः स्यादिति न कश्चिन्मुच्येत इत्यत आह, प्रतिपुरुषविमोक्षार्थं स्वार्थ इव परार्थ आरम्भः यथौदनकाम ओदनाय पाकि प्रवृत्त ओदनसिद्धौ निवर्त्तते एवं प्रत्येकं पुरुषान्मोचयितुं प्रवृत्ता प्रकृतिर्यं पुरुषं मोचयति तं प्रति न पुनः प्रवर्त्तते तदिदमाह, स्वार्थ इव, स्वार्थे यथा तथा परार्थे आरम्भ इत्यर्थः ॥ ५६ ॥

स्यादेतत् । स्वार्थं परार्थं वा चेतनः प्रवर्त्तते न च प्रकृतिरचेतनैवं

भवितुमर्हति तस्मादस्ति प्रकृतेरधिष्ठाता चेतनः नच क्षेत्रज्ञाश्च चेतना अपि प्रकृतिमधिष्ठातुमर्हन्ति तेषां प्रकृतिस्वरूपानभिज्ञत्वात् । तस्मादस्ति सर्वार्थदर्शी प्रकृतेरधिष्ठाता स चेश्वर इत्यत आह ।

वत्सविवृद्धिनिमित्तं क्षीरस्य यथा प्रवृत्तिरज्ञस्य ।
पुरुषविमोक्षनिमित्तं तथा प्रवृत्तिः प्रधानस्य ॥ ५७ ॥

दृष्टमचेतनमपि प्रयोजने प्रवर्त्तमानं यथा वत्सविवृद्ध्यर्थं क्षीरमचेतनं प्रवर्त्तते एवं प्रकृतिरचेतनापि पुरुषविमोक्षणाय प्रवर्त्तिष्यते । नच क्षीरप्रवृत्तेरपीश्वराधिष्ठाननिबन्धनत्वेन साध्यत्वान्न साध्येन व्यभिचार इति साम्प्रतं प्रेक्षावत्प्रवृतेः स्वार्थकारुण्याभ्यां व्याप्तत्वात्, ते च जगत्सर्गाह्यावर्त्तमाने प्रेक्षावत्प्रवृत्तिपूर्व्वकत्वमपि व्यावर्त्तयतः नह्यवाप्तसकलेप्सितस्य भगवतो जगत्सृजतः किमप्यभिलषितं भवति । नापि कारुण्यादस्य सर्गे प्रवृत्तिः, प्राक् सर्गाज्जीवाना मिन्द्रियशरीरविषयानुत्पतौ दुःखाभावेन कस्य प्रहाणेच्छाकारुण्यं सर्गोत्तरकालं दुःखिनोऽवलोक्य कारुण्याभ्युपगमे दुरुत्तरमितरेतराश्रयत्वं कारुण्येन सृष्टिः सृष्ट्या च कारुण्यमिति । अपि च करुणया प्रेरित ईश्वरः सुखिन एव जन्तून् सृजेन्न विचित्रान् । कर्म्मवैचित्र्याद्वैचित्र्यमिति चेत् कृतमस्य प्रेक्षावतःकर्म्माधिष्ठानेन तदनधिष्ठानमात्रादेवाचेतनस्यापि कर्म्मणः प्रवृत्त्यनुपपतेस्तत्कार्यशरीरेन्द्रियविषयानुत्पतौ दुःखानुत्पत्तेरपि सुकरत्वात् । प्रकृतेस्त्वचेतनायाः प्रवृत्तेर्न स्वार्थानुग्रहो न वा कारुण्यं प्रयोजकमिति नोक्त दोषप्रसङ्गावतारः । पारार्थ्यमात्रन्तु प्रयोजनमुत्पद्यते तस्मात्सुष्ठूक्तं वत्सविवृद्धिनिमित्तमिति ॥ ५७ ॥

स्वार्थ इवेति दृष्टान्तितं तद्विभजते ।

औत्सुक्यनिवृत्यर्थं यथा क्रियासु प्रवर्त्तते लोकः ।
पुरुषस्य विमोक्षार्थं प्रवर्त्तते तद्वदव्यक्तम् ॥ ५८ ॥

औत्सुक्यमिच्छा सा खल्विष्यमाणप्राप्तौ निवर्त्तते इष्यमाणश्च इष्टलक्षणत्वात् फलस्य । दार्ष्टान्तिके योजयति पुरुषस्य विमोक्षार्थं प्रवर्तते तद्वदव्यक्तम् ॥ ५८ ॥

ननु भवतु पुरुषार्थः प्रकृतेः प्रवर्तकः निवृत्तिस्तु कुतस्त्या प्रकृतेरित्यतआह ।

रङ्गस्य दर्शयित्वा निवर्त्तते नर्तकी यथा नृत्यात् ।
पुरुषस्य तथात्मानं प्रकाश्य विनिवर्त्तते प्रकृतिः ॥ ५९ ॥

रङ्गस्येति स्थानेन स्थानिनः पारिषदानुपलक्षयति । आत्मानं-शब्दादात्मना पुरुषाद्भेदेन च प्रकाश्येत्यर्थः ॥ ५९ ॥

स्यादेतत् । प्रवर्त्ततां प्रकृतिः पुरुषार्थं पुरुषादुपकृतात् प्रकृतिर्लप्स्यति कञ्चिदुपकारम् आज्ञासम्पादनाराधितादिवाज्ञापयितुर्भुजिष्या तथा च न परार्थोऽस्या आरम्भइत्यत आह ।

नानाविधैरुपायैरुपकारिण्यनुपकारिणः पुंसः ।
गुणवत्यगुणस्य सतस्तस्यार्थमपार्थकञ्चरति ॥ ६० ॥

यथा गुणवानप्युपकार्य्यपि भृत्यो निर्गुणे अत एवानुपकारिणि स्वामिनि निष्फलाराधनः एवमियं प्रकृतिस्तपस्विनी गुणवत्युपकारिण्यप्यनुपकारिणि निर्गुणेऽपि पुरुषे व्यर्थपरिश्रमेति पुरुषार्थमेव यतने न स्वार्थमिति सिद्धम् ॥ ६० ॥

स्यादेतत् । नर्त्तकी नृत्यं परिषद्भ्यो दर्शयित्वा निवृत्तापि पुनस्तद्दृष्टकौतूहलात् प्रवर्तते यथा तथा प्रकृतिरपि पुरुषायात्मानं दर्शयित्वा निवृत्तापि पुनः प्रवर्त्स्यतीत्यतआह ।

प्रकृतेः सुकुमारतरं न किञ्चिदस्तीति मे मतिर्भवति ।
या दृष्टास्मीति पुनर्न दर्शनमुपैति पुरुषस्य ॥ ६१ ॥

सुकुमारतरता अतिपेशलता परपुरुषदर्शनासहिष्णुतेति यावत्

असूर्यंपश्या हि कुलवधू अतिमन्दाक्षमन्थरा प्रमादाद्विगलिताशिरोञ्चला चेदालोक्यते परपुरुषेण तदासौ तथा प्रयतते अप्रमत्तां यथैनां पुरुषान्तराणि न पुनः पश्यन्तीति । एवं प्रकृतिरपि कुलवधूतोऽप्यधिका दृष्टा विवेकेन न पुनर्द्रक्ष्यतइत्यर्थः ॥ ६१ ॥

स्यादेतत् । पुरुषश्चेदगुणोऽपरिणामी कथमस्य मोक्षः मुचेर्बन्धन विश्लेषार्थत्वात् । सवासनक्लेशकर्म्माशयानाञ्च बन्धनसंज्ञितानां पुरुषेऽपरिणामिन्यसम्भवात् । अतएवास्य पुरुषस्य न संसारः प्रेत्यभावापरनामास्ति निष्क्रियत्वात्, तस्मात्पुरुषविमोक्षार्थमिति रिक्तं वच इतीमामाशङ्कामुपसंहारव्याजेनाभ्युपगच्छन्नपाकरोति ।

तस्मान्न बध्यतेऽद्धा न मुच्यते नापि संसरति कश्चित् ।
संसरति बध्यते मुच्यते च नानाश्रया प्रकृतिः ॥ ६२ ॥

अद्धा न कश्चित्पुरुषोबध्यते न कश्चित्संसरति न कश्चिन्मुच्यत इति । प्रकृतिरेव तु नानाश्रया सती बध्यते च संसरति च मुच्यते च बन्धमोक्षसंसाराः पुरुषे उपचर्य्यन्ते । यथा जयपराजयौ भृत्यगतावपि स्वामिन्युपचर्य्येते, तदाश्रयेण भृत्यानां तद्भागित्वात्तत्फलस्य च शोकलाभादेः स्वामिसम्बन्धात् । भोगापवर्गयोश्च प्रकृतिगतयोरपि विवेकाग्रहात् पुरुषसम्बन्ध उपपादित इति सर्व्वं पुष्कलम् ॥ ६२ ॥

नन्ववगतं प्रकृतिगता बन्धसंसारापवर्गाः पुरुष उपचर्य्यन्त इति किंसाधनाः पुनरेते प्रकृतेरित्यत आह ।

रूपैः सप्तभिरेव तु बध्नात्यात्मानमात्मना प्रकृतिः ।
सैव च पुरुषार्थं प्रति विमोचयत्येकरूपेण ॥ ६३ ॥

तत्त्वज्ञानवर्जं बध्नाति धर्म्मादिभिः सप्तभीरूपैर्भावैरिति पुरुषार्थं प्रति भोगापवर्गं प्रति आत्मनात्मानमेकरूपेण तत्त्वज्ञानेन विवेकख्यात्या विमोचयति पुनर्भोगापवर्गौ न करोतीत्यर्थः ॥ ६३ ॥

अवगतमीदृशं तत्त्वं ततः किमित्यतआह ।

एवं तत्त्वाभ्यासान्नास्मि न मे नाहमित्यपरिशेषम् ।
अविपर्य्ययाद्विशुद्धं केवलमुत्पद्यते ज्ञानम् ॥ ६४ ॥

तत्त्वेन विषयेण विषयिज्ञानमुपलक्षयति उक्तरूपप्रकारतत्त्वविषय-ज्ञानाभ्यासादादरनैरन्तर्य्यदीर्घकालसेवितात्सत्त्वपुरुषान्यतासाक्षात्कारि ज्ञानमुत्पद्यते । यद्विषयश्चाभ्यासस्तद्विषयमेव साक्षात्कारमुपजनयति । तत्त्वविषयश्चाभ्यास इति तत्त्वसाक्षात्कारं जनयति अत उक्तं विशुद्धमिति । कुतोविशुद्धमित्यतआह । अविपर्ययादिति । संशयविपर्य्ययौ हि ज्ञानस्याविशुद्धी तद्रहितं विशुद्धम् । तदिदमुक्तं विपर्ययादिति । नियतमनियततया गृह्णन् संशयोऽपि विपर्ययः तेनाविपर्य्ययादिति संशयविपर्य्ययाभावो दर्शितः तत्त्वविषयत्वाच्च संशयविपर्य्ययाभावः । स्यादेतत् । उत्पद्यतामीदृशाभ्यासात्तत्त्वज्ञानं, तथाप्यनादिना मिथ्याज्ञानसंस्कारेण मिथ्याज्ञानं जनयितव्यं, तथाच तन्निबन्धनस्य संसारस्यानुच्छेदप्रसङ्ग इत्यत उक्तं केवलमिति । विपर्य्यासेनासम्मिश्रम् । यद्यप्यनादिर्विपर्ययवासना तथापि तत्त्वज्ञानवासनया तत्त्वविषयसाक्षात्कारमादधत्यादिमत्यापि शक्या समुच्छेत्तुं तत्त्वपक्षपातोहि धियां स्वभावः । यथाहुः बाह्या अपि । निरुपद्रवभूतार्थस्वभावस्य विपर्य्ययैः । न बाधोयत्नवत्त्वेऽपि बुद्धेस्तत्पक्षपाततइति । ज्ञानस्वरूपमुक्तं नास्मि न मे नाहमिति । नास्मीत्यात्मनि क्रियामात्रं निषेधति । यथाहुः । कुम्बस्तयः क्रियासामान्यवचना इति । तथाचाध्यवसायाभिमानसङ्कल्पालोचनानि चान्तराणि बाह्याश्च सर्व्वे व्यापारा आत्मनि प्रतिषिद्धानि बोद्धव्यानि यतश्चात्मनि व्यापारावेशोनास्त्यतो नाहम् , अहमिति कर्तृपदम् अहं जानाम्यहं जुहोम्यहं ददेऽहं भुञ्जे इति सर्व्वत्र कर्तुः परामर्शात् । निष्क्रियत्वे च सर्व्वत्रकर्तृत्वाभावः ततः सुष्ठूक्तं नाहमिति । अतएव न

मे कर्त्ता हि स्वामितां लभते तदभावात्तु कुतोभाविकी स्वामितेत्यर्थः । अथवा नास्मीति पुरुषोऽस्मि न प्रसवधर्म्मा अप्रसवधर्म्मत्वाच्चाकर्तृत्वमाह । नाहमिति, अकर्तृत्वाच्च न स्वामितेत्याह, न मे इति । नन्वेतावत्सु ज्ञातेष्वपि कश्चित्कदाचिदज्ञातोविषयोऽस्ति तदज्ञानञ्च जन्तून् बन्धयिष्यतीत्यत आह, अपरिशेषमिति । नास्ति किञ्चिदस्मिन्पारिशिष्टं ज्ञातव्यं यदज्ञानं बन्धयिष्यतीत्यर्थः ॥ ६४ ॥

किं पुनरीदृशेन तत्त्वसाक्षात्कारेण सिध्यतीत्यत आह ।

तेन निवृत्तप्रसवामर्थवशात्सप्तरूपाविनिवृत्ताम् ।
प्रकृतिं पश्यति पुरुषः प्रेक्षकवदवस्थितः स्वच्छः ॥ ६५ ॥

भोगविवेकसाक्षात्कारो हि प्रकृतेः प्रसोतव्यौ तौ च प्रसूता विति नास्याः प्रसोतव्यमवशिष्यते यत् प्रसोष्यतइति निवृत्तप्रसवा प्रकृतिः । विवेकज्ञानरूपोयोऽर्थस्तस्य वशः सामर्थ्यं तस्मात् । अतत्त्वज्ञानपूर्व्वकाणि खलु धर्म्माधर्म्माज्ञानवैराग्यावैराग्यैश्वर्य्यानैश्वर्याणि वैराग्यमपि केवलतौष्टिकानामतत्त्वज्ञानपूर्व्वकमेव तत्र तत्त्वज्ञानं विरोधित्वेनातत्त्वज्ञानमुच्छिनत्ति कारणनिवृत्त्या च सप्तरूपाणि निवर्त्तन्ते इति सप्तरूपाविनिवृत्ता प्रकृतिः । अवस्थित इति, निष्क्रियः, स्वच्छ इति, रजस्तमोवृत्तिकलुषया बुद्धया असम्भिन्नः, सात्विक्या तु बुद्धया तदाप्यस्य मनाक् सम्भेदोऽस्त्येव, अन्यथैवम्भूतप्रकृतिदर्शनानुपपत्तेरिति ॥ ६५ ॥

स्यादेतत् । निवृत्तप्रसवामिति न मृष्यामहे संयोगकृतो हि सर्ग इत्युक्तं योग्यता च संयोगः भोक्तृत्वयोग्यता च पुरुषस्य चैतन्यं भोग्यत्वयोग्यता च प्रकृतेर्जडत्वं विषयत्वञ्च नचैतयोरस्ति निवृत्तिः न च करणीयाभावान्निवृत्तिः तज्जातीयस्याग्यस्य करणीयत्वात् पुनः पुनः शब्दादुपभोगवादित्यतआह ।

दृष्टोमयेत्युपेक्षक एको दृष्टाहमित्युपरमत्यन्या ।

सति संयोगेऽपि तयोः प्रयोजनं नास्ति सर्गस्य ॥ ६६ ॥

करोतु नाम पौनःपुन्येन शब्दाद्युपभोगं प्रकृतिरनया विवेक-
यातिर्न कृतेति, कृतविवेकख्यातिस्तु शब्दाद्युपभोगं न जनयति ।
विवेकख्यातिनिबन्धनो हि तदुपभोगो निबन्धनाभावेन न तद्भवितु-
र्हति अङ्कुरइव बीजाभावेन । प्राकृतान् हि सुखदुःखमोहात्मनः
ब्दादींस्तदविवेकान्ममैतदित्यभिमन्यमान आत्मा भुञ्जीत । एवं
विवेकख्यातिमपि प्राकृतीमविवेकादेवात्मा मदर्थैयमिति मन्यते, उत्पन्न-
विवेकख्यातिस्तु तदसंसर्गान्न शब्दादीन् भोक्तुमर्हति नापि विवेक-
यातिं प्राकृतीं ततो विविक्त आत्मा स्वार्थामभिमन्तुमर्हति पुरुषार्थौ
भोगविवेकौ प्रकृत्यारम्भप्रयोजकाविति पुरुषार्थौ सन्तौ न प्रकृतिं
योजयतः तदिदमुक्तं प्रयोजनं नास्ति सर्गस्येति । अत्र प्रयुज्यते
र्गं प्रकृतिरनेनेति प्रयोजनं तदपुरुषार्थत्वे नास्तीत्यर्थः ॥ ६६ ॥

स्यादेतत् । उत्पन्नतत्त्वसाक्षात्कारमुक्तश्चेदनन्तरमेव मुक्तस्य तस्य
रीरपातः स्यादिति कथमदेहः प्रकृतिं पश्येत् अथ तत्त्वज्ञानेऽपि न
यते कर्म्मणामप्रक्षीणत्वात् तेषां कुतः प्रक्षयः भोगादिति चेत्
न भोस्तत्त्वज्ञानं न मोक्षसाधनमिति व्यक्ताव्यक्तज्ञविज्ञानजन्मना
ज्ञानेनापवर्ग इति रिक्तं वचः । भोगेन चापरिसङ्ख्येयः कर्म्मा-
प्रचयोऽनियतविपाकसमयः क्षेतव्यः ततश्चापवर्गप्राप्तिरसत्यपि
रिथमात्रमित्यत आह ।

सम्यग्ज्ञानाधिगमाद्धर्म्मादीनामकारणप्राप्तौ ।
तिष्ठति संस्कारवशाच्चक्रभ्रमिवद्धृतशरीरः ॥ ६७ ॥

तत्त्वसाक्षात्कारोदयादेवानादिरप्यनियतविपाककालोऽपि कर्म्मा-
प्रचयो दग्धबीजभावतया न जात्याद्युपभोगलक्षणाय फलाय कल्पते
सलिलावसिक्तायां हि बुद्धिभूमौ कर्म्मबीजान्यङ्कुरं प्रसुवते, तत्त्व-

ज्ञाननिदाघनिपीतसकलक्लेशसलिलायामूषरायां कुत : कर्म्मबीजानाम-
ङ्कुरप्रसवः । तदिदमुक्तं धर्म्मादीनामकारणप्राप्ताविति, अकारणत्व
प्राप्ताविव स्थायमर्थः । उत्पन्नतत्त्वज्ञानोऽपि च संस्कार वशात्तिष्ठति
यथोपरतेऽपि कुलालव्यापारे चक्रं वेगाख्यसंस्कारवशाद्भ्रमंस्तिष्ठति
कालपरिपाकवशात्तूपरते संस्कारे निष्क्रियं भवति, शरीरस्थितौ च प्रा
रब्धपरिपाकौ धर्म्माधर्म्मौ संस्कारः । यथाचानुश्रूयते भोगेन त्वितरे
क्षपयित्वाथ सम्पद्यत इति तावदेवास्य चिरं यावन्न विमोक्ष्येऽथ
सम्पत्स्ये इति । प्रक्षीणनाणादिविद्यासंस्कारविशेषश्च संस्कारस्तदुपात्त-
सामर्थ्यादुपात्तशरीरस्तिष्ठति ॥ ६७ ॥

स्यादेतत्, यदि संस्कारविशेषादुपात्तशरीरस्तथापि कदाचिन्मोक्षो
भविष्यतीत्यत आह ।

प्राप्ते शरीरभेदे चरितार्थत्वात्प्रधानविनिवृत्तौ ।
ऐकान्तिकमात्यन्तिकमुभयं कैवल्यमाप्नोति ॥ ६८ ॥

अनारब्धविपाकानां नावकर्म्माशयानां तत्त्वज्ञानाग्निना बीजभा
वोद्रेकः प्रारब्धविपाकानां तूपभोगेन क्षये सति प्राप्ते शरीरभेदे वि-
नाशे चरितार्थत्वात्कृतप्रयोजनत्वात्प्रधानस्य तं पुरुषं प्रति निवृत्तौ वि-
कान्तिकमवश्यंभावि आत्यन्तिकमविनाशि उभयं कैवल्यं दुःख
त्रयविगमं प्राप्नोति पुरुषः ॥ ६८ ॥

प्रमाणेनोपपादितेऽप्यर्थे तच्छ्रद्धोत्पादनाय परमर्षिपूर्वकत्वमाह ।

पुरुषार्थज्ञानमिदं गुह्यं परमर्षिणा समाख्यातम् ।
स्थित्युत्पत्तिप्रलयाश्चिन्त्यन्ते यत्र भूतानाम् ॥ ६९ ॥

गुह्यं गुहानिवासि स्थूलधियां दुर्बोधमिति यावत् परमर्षिणा कपि-
लेन । तामेव श्रद्धामागमिकत्वेन द्रढयति स्थित्युत्पत्तिप्रलयाश्चिन्त्य-
न्ते यत्र भूतानां यत्रेति सदर्थे यथा चर्म्मणि द्वीपिनं हन्तीति

तानां प्राणिनां स्थित्युत्पत्तिप्रलया आगमैश्चिन्त्यन्ते ॥ ६९ ॥

स्यादेतत्, यत्परमर्षिणा साक्षात्कथितं तच्छ्रद्धीमहि यत्पुनरीश्वरकृष्णेन कथितं तत्र कुतः श्रद्धेयत्व आह ।

एतत्पवित्रमग्र्यं मुनिरासुर्येऽनुकम्पया प्रददौ ।
आसुरिरपि पञ्चशिखाय तेन च बहुधा कृतन्तन्त्रम् ॥ ७० ॥
शिष्यपरम्परयागतमीश्वरकृष्णेन चैतदार्य्याभिः ।
सङ्क्षिप्तमार्य्यमतिना सम्यग्विज्ञाय सिद्धान्तम् ॥ ७१ ॥

एतत्पवित्रं पावनं दुःखत्रयहेतोः पाप्मनः पुनातीति अग्र्यं सर्वेभ्यः पवित्रेभ्योमुख्यं मुनिः कापिलः आसुरये ऽनुकम्पया प्रददौ आसुरिरपि पञ्चशिखाय तेन च बहुधा कृतं तन्त्रम् ॥ ७० ॥

आरात् याता तत्त्वेभ्य इत्यार्य्या आर्य्या मतिर्यस्य सोऽयमार्यमतेरिति ॥ ७१ ॥

एतच्च शास्त्रं सकलशास्त्रार्थसूचकत्वात् न तु प्रकरणमित्याह ।

सप्तत्यां किल येऽर्थास्तेऽर्थाः कृत्स्नस्य षष्टितन्त्रस्य ।
आख्यायिकाविरहिताः परवादविवर्जिताश्चापि ॥ ७२ ॥

तथा च राजवार्तिकम् । प्रधानास्तित्वमेकत्वमर्थवत्त्वमथान्यता । पारार्थ्यञ्च तथानैकं नियोगो योग एव च । शेषवृत्तिरकर्तृत्वं मौलिकार्थाः स्मृता दश । विपर्ययः पञ्चविधस्तथोक्ता नव तुष्टयः । करणानामसामर्थ्यमष्टाविंशतिधा मतम् । इति षष्टिः पदार्थानामष्टाभिः सह सिद्धिभिरिति । सेयं षष्टिपदार्थी कथितेति सकलशास्त्रार्थकथनान्नेदं प्रकरणमपितु शास्त्रमेवेदमिति सिद्धम् । एकत्वमर्थवत्त्वं पारार्थ्यञ्च प्रधानमधिकृत्योक्तम् । अन्यत्वमकर्तृकत्वं बहुत्वञ्चेति पुरुषमधिकृत्य । अस्तित्वं नियोगो योगश्चेत्युभयमधिकृत्य । स्थितिरिति स्थूलसूक्ष्ममधिकृत्योक्तम् ॥ ७२ ॥

मनांसि कुमुदानीव बोधयन्ती सतां सदा ।
श्रीवाचस्पतिमिश्राणां कृतिः स्यात्तत्त्वकौमुदी ॥

॥ सांख्यतत्त्वकौमुद्याः शुद्धिपत्रम् ॥

अशुद्धम्	शुद्धम्	पृष्ठे	पंक्तौ	अशुद्धम्	शुद्धम्	पृष्ठे	पंक्तौ
मंगल	मङ्गल	३	१३	वीज	बीज	१६	१
वीजादि	बीजादि	४	११	वीजा	बीजा	१६	१
करिष्य	करिष्य	५	३	द्रर्द्ध	दुर्द्ध	१६	२
५	२	६	८	ष्टू	ष्टू	१७	२
विम्बित	बिम्बित	९	२	शिविका	शिबिका	१९	५
चेनो	चेतनो	९	३	वहन्ति	वहन्ति	१९	६
नर्थो--	नर्थान्त--	९	७	सारू	सारू	१९	२
नानुमा	नानुमा	९	१३	यिव्ये	यितव्ये	२०	२
अन	अन्त	१२	९	चेतनं।	चेतनम्।	२१	१
व्याकः	व्यापकः	१२	१४	बुद्धयाददयो	बुद्धयादयो	२१	१
णान्	णाद	१३	९	ताभ्यां	ताभ्यां	२१	२
विन्दून्	विन्दून्	१४	२३	कत्वा	कत्वा	२२	१
नात्	नाद्	१३	२०	मावेन	भावेन	२३	३
नात्य	नाद्य	१४	१८	माव	भाव	२३	६
त्य	द्य	१४	२०	मिथुनः	मिथुनाः	२३	१
,,	,,	१४	२१	प्रबन्ध	प्रतिबन्ध	२४	३
,,	,,	१४	२२	व्य	ध्य	२४	१
,,	,,	१४	२३	समुद्र	समुद्र	२४	१
ति प्र	तिप्र	१५	२	दृष्टंम्	दृष्टम्	२५	१
योयुक्तः	योऽयुक्तः	१५	५	रूपा	रूपा	२५	२
लब्धा	लब्धा	१५	७	काणं	कारणं	२६	१
णादीनां	णतनयादीनां	१६	६	व्यक्त	मव्यक्त	२६	१

॥ सांख्यतत्त्वकौमुद्याः शुद्धिपत्रम् ॥

अशुद्धम्	शुद्धम्	पृष्ठे	पंक्तौ
प्यस्य रूप्यस्य- नानारूप नानारूप		२६	२१
र्यस्य	कार्यस्य	२७	१
पता	रूपता	२७	१२
णामाणि	णामानि	२७	२०
त्वभागा	स्वभाविका	२७	२१
मेयस्य	मियत	२८	२०
मोहात्मकं	मोहात्मकं	२९	९
दनिये	वेदनीये	२९	१४
पुरूषस्य	पुरुषस्य	३०	१०
पाधान	पादान	३०	१७
तिर्यग्योन	तिर्यग्योन	३१	४
ोडमी	सोऽयमी	३१	४
स्थस्य	मध्यस्थ'	३२	२
सयोग	त्संयोग	३२	११
पेक्षां	गोऽपेक्षां	३२	१२
क्तुपेक्षा	मोक्त्रपेक्षा	३२	१८
रुषः	पुरुषः	३२	२२
ाहि	गोहि	३३	१
र्गं	सर्गं	३३	२
णः	गुणाः	३३	१३
ा	ज्ञां--	३३	१४

अशुद्धम्	शुद्धम्	पृष्ठे	पंक्तौ
वशि	वशी	३४	७
संज्ञा	संज्ञाः	३४	८
कारादू	कारादु	३५	१४
दुभयंम्	दुभयम्	३५	२४
बाह्ये	बाह्ये	३६	५
पादान्व	पादानन्व	३६	८
वागदीनां	वागादीनां	३६	१२
रूपेण	रूपेण	३६	१८
रूपेण	रूपेण	३६	१८
त्यालोचन	त्यालोचनं	३६	२२
र योगि	रयोगि	३७	३
नत्वि	न त्वि	३७	५
महत्वा-	महत्त्वा-	३७	६
भेदाः ।	भेदः ।	३७	१०
बाह्य	बाह्य	३७	९
,,	,,	३७	१०
सन्न	सन्त	३८	१२
नोहन्ना	नोहन्ना	३८	६
पाञ्च भौ	पाञ्चभौ	४०	६
समुहः	समूहः	४०	६
अतः	अन्तः	४०	११
वाह्यं	बाह्यं	४०	१४

॥ सांख्यतत्त्वकौमुद्याः शुद्धिपत्रम् ॥

अशुद्धम्	शुद्धम्	पृष्ठे	पंक्तौ
भिन्न मा	भिमाना	४०	१५
विषयस	विषयःस	४०	१५
साम्प्रत कालं	साम्प्रत- कालं	४०	१७
तथोक्तनि	तथोक्तानि	४१	१०
द्रष्टव्याः	द्रष्टव्याः ।	४१	१८
षयाणि	षयाणि	४१	१७
भावं	भावं	४१	१९
सूक्षम्	सूक्षाम्	४२	१९
धान्यं	धनं	४२	१९
गुण भूताः	गुणभूताः	४२	२१
सच	स च	४२	२३
पुरुषरूपै	पुरुषरूपै	४२	२३
करोति		४३	६
रूपाणि	रूपाणि	४३	१८
भुवना	भूवना	४३	१९
राश्च	राश्चमूढाश्च ।	४३	२०
स्थलेषु	स्थूलेषु	४३	२१
तमः प्रधान	तमःप्रधान	४३	२३
विषणा	विषण्णा	४३	२३
व्यात्ता	व्यावृत्ता	४३	२४
नानुभवन्त	नानुभूयन्ते	४४	१

अशुद्धम्	शुद्धम्	पृष्ठे	पंक्तौ
कौशिकाः	कौशिकः	४४	७
सभु	समु	४४	२०
लिङ्गम्	लिङ्गगम्	४५	११
तिष्ठिति	तिष्ठति	४५	१२
धर्मनिमित्तः	धर्मानिमित्तः	४५	१
प्राणि	प्रामाणि	४५	९
सूक्ष्म	सूक्ष्मं	४४	२१
स्तित्वं मुप	स्तित्वमुप	४५	२
तिमित्तं	निमित्तं	४५	२
णात् हेवो	णाद्देवो	४६	
परिणामो	परिणामो	४६	
तिकावैकृ	तिका वैकृ	४६	१
वैराग्यैश्वर्य	वैराग्यैश्वर्य	४६	१
दाक्षणि	दाक्षिण	४७	
सहस्त्राणि	सहस्राणि	४७	
इश्वरो	ईश्वरो	४७	१
धर्मदीनां	धर्मादीनां	४८	
तेन	तेच	४८	
दास्तुष्टि	दा तुष्टि	४८	१
तामिस्त्रा	तामिस्रा	४८	१
अस्मिता द	अस्मितादं	४९	१
रूपतः	रूपतः	४९	

॥ सांख्यतत्त्वकौमुद्याः शुद्धिपत्रम् ॥

अशुद्धम्	शुद्धम्	पृष्ठ	पंक्तौ	अशुद्धम्	शुद्धम्	पृष्ठ	पंक्तौ
ःपतो	रूपतो	४९	७	मे	मि	५१	२२
ःपेणै	रूपेणै	४९	९	ध्यनं	ध्ययनं	५२	१
ुक्ता	नुक्ता	४९	१८	दानञ्च	दानं च	,,	२
ःधा	वधा	४९	२०	तत्रद्या	तत्राद्या	,,	५
ःय	वय	४९	२१	स्वरुप	स्वरूप	,,	७
ेद	भेद	४९	२१	तुर्धि	तुर्थी	,,	१५
ःधाः	वधाः	४९	२२	ज्व	ज्ज	,,	१७
ीय	कीर्य	४९	२३	द्रव तीति	द्रवतीति	,,	२०
ःधाः	वधाः	५०	१	दा मु	दामु	,,	२१
ी	वधै	५०	४	ताव	तावज्	५३	१
ुक	हङ्का	५१	५	तुष्टिः	तुष्टीः	५३	१०
न्य	भिमन्य	,,	६	बीजा	बीजा	५४	१
र्शन	दर्शनज	,,	११	ङ्यो	ङ्गयो	,,	१६
त्यो	त्वादयों	,,	१२	न्यो	न्थो	,,	१६
ति	तीति	,,	१६	गाह्या	गाह्या	५६	१०
ति	द्विती	,,	१६	पते	पते	,,	१८
सु	या सुषा	,,	१७	पत्विनी	पत्विनी	५७	१६
	न	,,	१८	तानां	तानां	५८	६
	सा	,,	१९	पुरषो	पुरुषो	५८	१२
ः	भोगः	,,	२०	साज्ञा	साक्षा	५९	५
यो	द्विषयो	,,	२०	केवल्मिति	केवलमिति	५९	१४
	मी	,,	२१	....	....	....	....

SANKHYA PHILOSOPHY

BY

ISHWRKRISHNA

BAGHATY

~~MDCCCDCCCLXXXI~~

MDCCCLXXXI

1881

लक्ष्यवृत्तित्वं अव्याप्तत्वम् ॥

लक्ष्यवृत्तित्वे सति अलक्ष्यवृत्तित्वं अतिव्याप्तित्वम् ॥

लक्ष्यमात्रावृत्तित्वम् = असंभवत्वम् ॥

प्रागभावप्रध्वंसाभावप्रतियोगित्वं नित्यत्वम् ॥

कार्यानन्वये सति व्यावर्तकत्वम् उपाधित्वम् ॥

प्रमाण = व्याप्यज्ञानाद्व्यापकसिद्धिः ॥

ध्यानात्परतरं नहि ॥

धर्मार्थकाममोक्षाणामारोग्यं मूलमुत्तमम् ॥

॥ श्रीः ॥

तर्कसंग्रहः ।

तत्कृतदीपिकया सहितः ।

THE TARKASANGRAHA

OF

ANNAM BHATTA

WITH HIS OWN GLOSS (THE DÎPIKÂ)

AND

AN ENGLISH TRANSLATION.

SECOND REVISED EDITION.

EDITED BY

KÂS'ÎNÂTHA PÂNDURANGA PARAÑBA

PRINTED AND PUBLISHED
BY THE PROPRIETOR
OF
THE NIRNAYA-SÂGARA PRESS.
BOMBAY.

1883.

Price 6 Annas.

THE TARKASANGRAHA

OF

ANNAM BHATTA

WITH HIS OWN GLOSS (THE DÎPIKÂ)

AND

AN ENGLISH TRANSLATION.

SECOND REVISED EDITION.

EDITED BY

KÂS'ÎNÂTHA PÂṆDURANGA PARABA

PRINTED AND PUBLISHED

BY THE PROPRIETOR

OF

THE NIRNAYA-SÂGARA PRESS.

BOMBAY.

1883.

Price 6 *Annas.*

महामहोपाध्यायभंभट्टविरचितः

तर्कसंग्रहः ।

तत्कृतदीपिकया सहितः ।

काशीनाथ पाण्डुरङ्ग परब

इत्यनेन संस्कृतः ।

द्वितीयं संस्करणम् ।

स च

शाके १८०५ वत्सरे

मुम्बय्यां

निर्णयसागरयन्त्रालयाधिपतिना मुद्रितः ।

मूल्यं सार्धैं रूप्यकचतुष्पादः ।

PREFACE.

In publishing this work, the chief object the Editor has in ew is to supply a want which has long been felt by the stu- nts of Sanskrit connected with Bombay University—of an ition of the TARKASANGRAHA, embodying not only a correct t with the Dîpikâ or gloss usually accompanying it, but also close, faithful, and faultless, translation of the original. That is want is most peculiarly felt in these days when the Nyâya ilosophy is introduced among the subjects prescribed for gher University Examinations, is most clearly shown by the t, that College students are one and all dissatisfied with the ly edition of the Tarkasangraha which is at present procura- e. This edition is printed at Calcutta and appears to have en based on one published at Allahabad in 1849 for the use the students of Benares College. Both these editions, in- ed, contain a correct text; but the versions which they give the text are so carelessly executed, that they are for the most rt inaccurate and faulty, and, what is more, even misleading. hey throw little or no light on such portions of the book as e obscure, whilst they attempt at illustration, where illustra- on is not required. They are, therefore, useless and unsafe uides to follow. Hence arises the necessity for a better edi- ion of the Tarkasangraha, free from the blemishes which blot he editions of Calcutta and Allahabad.

Under these circumstances, the Editor has ventured to publish his work, with the view of rendering some service to the stu- ents of the Tarkasangraha. The translation which accompa- nies the text in the present edition is for the most part copied, with such alterations as seemed necessary, from the translation which appeared in an edition of the Tarkasangraha published n 1851 at Allahabad, which is now out of print. Both the ext and the gloss are copied from an edition which was pub- ished some years ago in Bombay. This publication is further ecommended by a very carefully prepared Index of the most

important and technical terms used in the text,—which will b found to add greatly to the utility of the present undertaking Nothing remains now to be said except that no pains are spare to make the work as useful as possible. It is, therefore, to b hoped that the efforts of the Editor in making this attempt a facilitating the study of Sanskrit Literature will meet wit favour and approval from the students of the Sanskrit Language

BOMBAY. May, 1876.

ADVERTISEMENT.

A SERIES OF SANSKRIT CLASSICS.

Designed to meet the wants of students of Sanskrit Literature.

The Proprietor of the Nirṇayasâgara Press, having undertaken the publication of a Series af Sanskrit Classics, has published, or has in preparation, the following:—

Already published.

1. The *Tarkasangraha* of Annambhatta with his own gloss (the Dîpikâ) and an English Translation. Second revised Edition. Edited by K. P. Paraba. 1883. Price Ans. 6.

2. The *Meghadûta* of Kâlidâsa with the commentary (the Sanjîvinî) of Mallinâtha and various readings. Second revised Edition. Edited by K. P. Paraba. 1883. Price Ans. 8.

3. The *Kumârasambhava* of Kâlidâsa with the commentary (the Sanjîvinî, 1–8 Sargas) of Mallinâtha and various readings. Edited by K. P. Paraba. 1879. Price Re. 1 Ans. 8.

4. The *Raghuvams'a* of Kâlidâsa with the commentary (the Sanjîvinî) of Mallinâtha and various readings. Second Edition. Edited by K. P. Paraba. 1882. Price Rs. 2.

5. The *Subhâshitaratnabhâṇdâgâra* or the gems of Sanskrit Poetry, being a collection (of about 12,000 s'lokas) of Witty, Epigrammatic, Instructive and Descriptive verses picked up from about 500 different authors. Selected and arranged by K. P. Paraba. 1881. Price Rs. 3 Ans. 8.

6. The *Hitopades'a* of Vishṇus'arman. Edited by K. P. Paraba. 1881. Price Ans. 9.

7. The *Ratnâvalî* of S'rîharshadeva with explanatory English Notes. Edited by N. B. Godabole and K. P. Paraba. 1882. Price Ans. 8.

8. The *Das'akumâracharita* of Dandin with its Pûrvapîthikâ and Uttarapîthikâ and an Uttarapîthikâ by Padmanâbha; also with the commentaries (the Padachandrikâ) of Kavîndra Sarasvatî and (the Bhûshanâ) of S'ivarâma on the Das'akumâracharita and Padadîpikâ on the Pûrvapîthikâ and various readings. Edited by N. B. Godabole and K. P. Paraba. 1883. Price Rs. 2.

9. The *Abhijnânas'âkuntala* of Kâlidâsa with the commentary (the Arthadyotanikâ) of Râghavabhatta and explanatory English Notes. Edited by N. B. Godabole and K. P. Paraba. 1883. Price Rs. 2.

In the Press.

10. The *Kirâtârjunîya* of Bhâravi with the commentary (the Ghaṇtâpatha) of Mallinâtha and various readings.

11. The *Sis'upâlavadha* of Mâgha with the commentary (the Sarvankashâ) of Mallinâtha and various readings.

In Preparation.

12. The *Naishadhacharita* of S'riharshadeva with the commentary (the Jîvâtu) of Mallinâtha and various readings.

13. The *Bhattikâvya* of Bhatti with the commentary (the Jayamangalâ) of Jayamangala and various readings,

---

Besides these the Proprietor has in contemplation the publication of the following books, provided he gets sufficient help and materials.

14. The *Vikramorvas'î* of Kâlidâsa with the commentary (the Prakâs'ikâ) of Ranganâtha.

15. The *Mâlavikâgnimitra* of Kâlidâsa with a commentary.

16. The *Uttararâmacharita* of Bhavabhûti with the commentary Bhâvârthadîpikâ or of Nârâyaṇa son of Ranganâtha or of Râghavâchârya.

17. The *Mâlatîmâdhava* of Bhavabhûti with the commentary of Tripurâri or of Nârâyaṇabhatta.

18. The *Mahâvîracharita* of Bhavabhûti with a commentary.

19. The *Mrichchhakatika* of S'udraka with the commentary of Prithvîdhara or of Gaṇapati.

20. The *Mudrârâkshasa* of Vis'âkhadatta with the commentary of Vates'vara.

21. The *Veṇîsamhâra* of Nârâyaṇabhatta with the commentary of Jagaddhara.

22. The *Viddhas'âlabhanjikâ* of Râjas'ekhara with the commentary of Nârâyaṇa.

23. The *Anargharâghava* of Murârimis'ra with the commentary of Ruchidattopâdhyâya or of the Zamorin of Calicut (Vyâkhyânavikramîya or of Vishṇupaṇdita (Vyâkhyâpanjikâ.)

24. The *Vâsavadattâ* of Subandhu with the commentary of Nârâyaṇa or of Prabhâkara (the Chûrṇikâ) or of S'ivarâma (the Darpaṇa) or of Jagaddhara.

25. The *Kâdambarî* of Bâṇabhatta with the commentary of Bâlakrishṇa or of Sûrachandra or of Jagaddhara.

The Proprietor requests the co-operation of all the Sanskrit Scholars to enable him to complete this useful undertaking.

अथ

तर्कसंग्रहः ।

दीपिकया सहितः ।

विश्वेश्वरं साम्बमूर्तिं प्रणिपत्य गिरं गुरुम् ।
टीकां शिशुहितां कुर्वे तर्कसंग्रहदीपिकाम् ॥

चिकीर्षितस्य ग्रन्थस्य निर्विघ्नपरिसमाप्त्यर्थं शिष्टाचारानुमित-
ुतिबोधितकर्तव्यताकमिष्टदेवतानमस्कारलक्षणं मङ्गलं शिष्यशिक्षा-
निबध्नंश्चिकीर्षितं ग्रन्थादौ प्रतिजानीते— निधायेति ।

निधाय हृदि विश्वेशं विधाय गुरुवन्दनम् ।
बालानां सुखबोधाय क्रियते तर्कसंग्रहः ॥

ननु मङ्गलस्य समाप्तिसाधनत्वं नास्ति । मङ्गले कृतेऽपि किरणा-
ल्यादौ निर्विघ्नपरिसमाप्त्यदर्शनात् । मङ्गलाभावेऽपि कादम्बर्यादौ
माप्तिदर्शनात् ॥ अन्वयव्यतिरेकव्यभिचारादिति चेन्न । किरणाव-
यादौ विघ्नबाहुल्यात्समाप्त्यभावः । कादम्बर्यादौ तु ग्रन्थाद्बहिरेव
ङ्गलं कृतमतो न व्यभिचारः ॥ ननु मङ्गलस्य कर्तव्यत्वे किं प्रमा-
ामिति चेन्न । शिष्टाचारानुमितश्रुतेरेव प्रमाणत्वात् । "समाप्तिकामो
ङ्गलमाचरेत्" इति श्रुतेः । तथाहि । मङ्गलं वेदबोधितकर्तव्यताकम-
ौकिकाविगीतशिष्टाचारविषयत्वाद्दर्शादिवत् । भोजनादौ व्यभिचार-
ारणायालौकिकेति । रात्रिश्राद्धादौ व्यभिचारवारणायाविगीतेति ।
शिष्टपदं स्पष्टार्थम् । "न कुर्यान्निष्फलं कर्म" इति जलताडनादेरपि
नोषिद्धत्वादिति ॥ तर्क्यन्ते प्रतिपाद्यन्त इति तर्का द्रव्यादिसप्तपदा-
ार्थास्तेषां संग्रहः संक्षेपेण स्वरूपकथनं क्रियत इत्यर्थः ॥ कस्मै प्रयो-
नायेत्यत आह— सुखबोधायेति । सुखेनानायासेन बोधः पदार्थज्ञानं
ास्मा इत्यर्थः ॥ ननु बहुषु तर्कग्रन्थेषु सत्सु किमर्थमपूर्वग्रन्थः क्रियत
त्यत आह— बालानामिति । तेषामतिविस्तृतत्वाद्बालानां बोधो न

भवतीत्यर्थः । ग्रहणधारणपटुर्बालः । न तु स्तनंधयः ॥ किं कृत्वा क्रियत इत्यत आह— निधायेति । विश्वेशं जगन्नियन्तारं शिवं हृदि निधाय नितरां स्थापयित्वा । सर्वदा तद्ध्यानपरो भूत्वेत्यर्थः ॥ गुरूणां विद्यागुरूणां वन्दनं नमस्कारं विधाय कृत्वेत्यर्थः ॥

द्रव्यगुणकर्मसामान्यविशेषसमवायाभावाः सप्तपदार्थाः ॥१॥

पदार्थान्विभजते— द्रव्येति । पदस्यार्थः पदार्थ इति व्युत्पत्त्याभिधेयत्वं पदार्थसामान्यलक्षणं लभ्यते ॥ नन्वत्र विभागादेव सप्तत्वे सिद्धे सप्तग्रहणं व्यर्थमिति चेन्न । न्यूनाधिकसंख्याव्यवच्छेदार्थत्वात् ॥ नन्वतिरिक्तः पदार्थः प्रमितो न वा । नाद्यः प्रमितस्य निषेधायोगात् । नान्त्यः प्रतियोगिप्रमितिं विना निषेधानुपपत्तेरिति चेन्न । पदार्थत्वं द्रव्यादिसप्तान्यतमत्वव्याप्यमिति व्यवच्छेदार्थत्वात् ॥ ननु सप्तान्यतमत्वं सप्तभिन्नाभिन्नत्वमिति वक्तव्यम् । एवं च सप्तभिन्नस्याप्रसिद्धत्वात्सप्तान्यतमत्वं कथमिति चेन्न । द्रव्यादि सप्तान्यतमत्वं द्रव्यादिभेदसप्तकाभाववत्त्वमित्युक्तत्वात् ॥ एवमग्रेऽपि द्रष्टव्यम् ॥

तत्र द्रव्याणि पृथिव्यप्तेजोवाय्वाकाशकालदिगात्ममनांसि नवैव ॥ २ ॥

द्रव्यं विभजते— तत्रेति । तत्र द्रव्यादिमध्ये द्रव्याणि नवैवेत्यन्वयः ॥ कानि तानीत्यत आह— पृथिवीत्यादीनि ॥ ननु तमसो दशमद्रव्यस्य विद्यमानत्वात्कथं नवैव द्रव्याणि ॥ तथाहि । " तमः खलु चलं नीलं परापरविभागवत् । प्रसिद्धद्रव्यवैधर्म्यान्नवेभ्यो भेत्तुमर्हति" ॥ नीलं तमश्चलतीत्यबाधितप्रतीतिबलान्नीलरूपाधारतया क्रियाधारतया च द्रव्यत्वं तावत्सिद्धम् । तत्र तमसो नाकाशादिपञ्चकेऽन्तर्भावो रूपवत्त्वात् । अत एव न वायौ सदागतिमत्त्वाभावाच्च । नापि तेजसि भास्वररूपाभावादुष्णस्पर्शाभावाच्च । नापि जले शीतस्पर्शाभावान्नीलरूपाश्रयत्वाच्च । नापि पृथिव्यां गन्धवत्त्वाभावात्स्पर्शरहितत्वाच्च । तस्मात्तमो दशमद्रव्यमिति चेन्न । तमसस्तेजोभावरूपवत्त्वात् ॥ तथाहि । तमो हि न रूपिद्रव्यमालोकासहकृतचक्षुर्ग्राह्यत्वात् । आलोकाभाववत् । रूपिचाक्षुषप्रमायामालोकस्य कारणत्वात् । तस्मात्प्रौढप्रकाशकतेजःसामान्याभावस्तमः । तत्र

लं तमश्चलतीति प्रत्ययो भ्रमः । अतो नव द्रव्याणीति सिद्धम् ॥ व्यत्वजातिमत्त्वं गुणवत्त्वं वा द्रव्यसामान्यलक्षणम् ॥ लक्ष्यैकदेशा-त्तित्वमव्याप्तिः । यथा गोः कपिलत्वम् ॥ अलक्ष्यवृत्तित्वमतिव्या-ः । यथा गोः शृङ्गित्वम् ॥ लक्ष्यमात्रावर्तनमसंभवः । यथा गोरे-शफत्वम् ॥ एतद्दूषणत्रयरहितो धर्मो लक्षणम् । यथा गोः त्वादिमत्त्वम् । स एवासाधारणधर्म इत्युच्यते ॥ लक्ष्यतावच्छेदक-नियतत्वमसाधारणत्वम् । व्यावर्तकस्यैव लक्षणत्वे व्यावृत्तावभि-यत्वादौ चातिव्याप्तिवारणाय तद्भिन्नत्वं धर्मविशेषणं देयम् । वहारस्यापि लक्षणप्रयोजनत्वे तु न देयम् । व्यावृत्तेरपि व्यवहार-धनत्वात् ॥ ननु गुणवत्त्वं न द्रव्यसामान्यलक्षणम् ॥ आद्यक्षणे त्पन्नविनष्टद्रव्ये चाव्याप्तेरिति चेन्न । गुणसमानाधिकरणसत्ताभि-जातिमत्त्वस्य विवक्षितत्वात् ॥ नन्वेवमप्येकं रूपं रसात्पृथगिति वहाराद्रूपादावतिव्याप्तिरिति चेन्न । एकार्थसमवायादेव तादृश-वहारोपपत्तौ गुणे गुणानङ्गीकरणात् ॥

रूपरसगन्धस्पर्शसंख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वा-रत्वगुरुत्वद्रवत्वस्नेहशब्दबुद्धिसुखदुःखेच्छाद्वेषप्रयत्नधर्माधर्मसं-कारश्चतुर्विंशतिगुणाः ॥ २ ॥

गुणं विभजते— रूपेति । द्रव्यकर्मभिन्नत्वे सति सामान्यवान्गु-ः । गुणत्वजातिमान्वा ॥ ननु लघुत्वमृदुत्वकठिनत्वादीनां विद्यमा-त्वात्कथं चतुर्विंशतिगुणा इति चेन्न । लघुत्वस्य गुरुत्वाभावरूपत्वा-। मृदुत्वकठिनत्वयोरवयवसंयोगविशेषरूपत्वात् ॥

उत्क्षेपणापक्षेपणाकुञ्चनप्रसारणगमनानि पञ्चैव कर्माणि ॥४॥

कर्म विभजते— उत्क्षेपणेति । संयोगभिन्नत्वे सति संयोगासम-ायिकारणं कर्म । कर्मत्वजातिमद्वा । भ्रमणादीनामपि गमनेऽन्त-र्वात् । न पञ्चविधत्वविरोधः ॥

परमपरं चेति द्विविधं सामान्यम् ॥ ५ ॥

सामान्यं विभजते— परेति । परमधिकवृत्ति । अपरं न्यूनवृत्ति । ामान्यादिचतुष्टये जातिर्नास्ति ॥

• नित्यद्रव्यवृत्तयो विशेषास्त्वनन्ता एव ॥ ६ ॥

विशेषं विभजते— नित्येति । पृथिव्यादिचतुष्टयस्य परमाणव आकाशादिपञ्चकं च नित्यद्रव्याणि ॥

समवायस्त्वेक एव ॥ ७ ॥

समवायस्य भेदो नास्तीत्याह— समवायेति ॥

अभावश्चतुर्विधः । प्रागभावः प्रध्वंसाभावोऽत्यन्ताभावोऽन्यो-न्याभावश्चेति ॥ ८ ॥

अभावं विभजते— अभावेति ॥

तत्र गन्धवती पृथिवी । सा द्विविधा नित्यानित्या चेति । नित्या परमाणुरूपा । अनित्या कार्यरूपा । सा पुनस्त्रिविधा शरीरेन्द्रियविषयभेदात् । शरीरमस्मदादीनाम् । इन्द्रियं गन्ध-ग्राहकं घ्राणं नासाग्रवर्ति । विषयो मृत्पाषाणादिः ॥ ९ ॥

तत्रोद्देशादिक्रमानुसारात्पृथिव्या लक्षणमाह— तत्रेति ॥ नाम्ना पदार्थसंकीर्तनमुद्देशः । उद्देशक्रमे च सर्वत्रेच्छैव नियामिका ॥ ननु सुरभ्यसुरभ्यवयवारब्धे द्रव्ये परस्परविरोधेन गन्धानुत्पादादव्या-प्तिः । न च तत्र गन्धप्रतीत्यनुपपत्तिरिति वाच्यम् । अवयवगन्धस्यैव तत्र प्रतीतिसंभवेन चित्रगन्धानङ्गीकारात् ॥ किं चोत्पन्नविनष्ट-घटादावव्याप्तिरिति चेन्न । गन्धसमानाधिकरणद्रव्यत्वापरजातिमत्त्व-स्यैव विवक्षितत्वात् ॥ ननु जलादावपि गन्धप्रतीतेरतिव्याप्तिरिति चेन्न । अन्वयव्यतिरेकाभ्यां पृथिवीगन्धस्यैव तत्र संयुक्तसमवायेन भानाङ्गीकारात् ॥ ननु तथाहि कालस्य सर्वाधारतया सर्वेषां लक्ष-णानां कालेऽतिव्याप्तिरिति चेन्न । सर्वाधारताप्रयोजकसंबन्धभिन्नसं-बन्धेन लक्षणत्वस्याभिमतत्वात् ॥ पृथिवीं विभजते— सा द्विविधेति । नित्यत्वं ध्वंसाप्रतियोगित्वम् । ध्वंसप्रतियोगित्वमनित्यत्वम् ॥ प्रका-रान्तरेण विभजते— सा पुनरिति । आत्मनो भोगायतनं शरीरम् । यदवच्छिन्नात्मनि भोगो जायते तद्भोगायतनम् । तदेव शरीरम् । सुखदुःखसाक्षात्कारो भोगः । शब्देतरोद्भूतविशेषगुणानाश्रयत्वे सति ज्ञानकारणमनःसंयोगाश्रयत्वमिन्द्रियत्वम् । शरीरेन्द्रियभिन्नो विषयः ।

एवं च गन्धवच्छरीरं पार्थिवशरीरम् । गन्धवदिन्द्रियं पार्थिवेन्द्रियम्। गन्धवान्विषयः पार्थिवविषय इति तत्तल्लक्षणं बोध्यम् ॥ पार्थिव-शरीरं दर्शयति— शरीरमिति ॥ इन्द्रियं दर्शयति—इन्द्रियमिति ॥ गन्धग्राहकमिति प्रयोजनकथनम् । घ्राणमिति संज्ञा । नासाग्रेत्याश्रयो-क्तिः । एवमुत्तरत्रापि ज्ञेयम् ॥ पार्थिवविषयं दर्शयति— विषयेति ॥

शीतस्पर्शवत्य आपः । ताश्च द्विविधा नित्या अनित्याश्चेति। नित्याः परमाणुरूपाः । अनित्याः कार्यरूपाः । ताः पुनस्त्रिविधाः शरीरेन्द्रियविषयभेदात् । शरीरं वरुणलोके । इन्द्रियं रसग्राहकं रसनं जिव्हाग्रवर्ति । विषयः सरित्समुद्रादिः ॥ १० ॥

अपां लक्षणमाह— शीतेति । उत्पन्नविनष्टजलेऽव्याप्तिवारणाय शीतस्पर्शसमानाधिकरणद्रव्यत्वापरजातिमत्त्वे तात्पर्यम् ॥ शीतं शिलातलमित्यादौ जलसंबन्धादेव शीतस्पर्शभानमिति नातिव्याप्तिः । अन्यत्सर्वं पूर्वरीत्या व्याख्येयम् ॥

उष्णस्पर्शवत्तेजः । तद्द्विविधं नित्यमनित्यं च । नित्यं परमाणुरूपम् । अनित्यं कार्यरूपम् । पुनस्त्रिविधं शरीरेन्द्रियविषयभेदात् । शरीरमादित्यलोके प्रसिद्धम् । इन्द्रियं रूपग्राहकं चक्षुः कृष्णताराग्रवर्ति । विषयश्चतुर्विधः । भौमदिव्यौदर्याकरजभेदात् । भौमं वन्ह्यादिकम् । अबिन्धनं दिव्यं विद्युदादि । भुक्तस्य परिणामहेतुरौदर्यम् । आकरजं सुवर्णादि ॥ ११ ॥

तेजसो लक्षणमाह— उष्णेति । उष्णं जलमिति प्रतीतेस्तेजःसंबन्धानुविधायित्वान्नातिव्याप्तिः ॥ विषयं विभजते—भौमेति । ननु सुवर्णं पार्थिवं पीतत्वाद्गुरुत्वाद्धरिद्रादिवदिति चेन्न ॥ अत्यन्तानलसंयोगे सति घृतादौ द्रवत्वनाशदर्शनेन जलमध्यस्थघृते द्रवत्वनाशादर्शनेनासति प्रतिबन्धके पार्थिवद्रव्यद्रवत्वनाशाग्निसंयोगयोः कार्यकारणभावावधारणात्सुवर्णस्यात्यन्तानलसंयोगे सत्यनुच्छिद्यमानद्रवत्वाधिकरणत्वेन घृतवत्पार्थिवत्वानुपपत्तेः । तस्मात्पीतद्रव्यद्रवत्वनाशप्रतिबन्धकतया द्रवद्रव्यान्तरासिद्धौ नैमित्तिकद्रवत्वाधिकरणतया जलत्वानुपपत्तेः । रूपवत्तया वाय्वादिष्वनन्तर्भावात्तैजसत्वसिद्धिः ।

तत्रोष्णस्पर्शाभास्वररूपयोरुपष्टम्भकपार्थिवरूपस्पर्शाभ्यां प्रतिबन्धादनुपलब्धिः । तस्मात्सुवर्णं तैजसामिति सिद्धम् ॥

रूपरहितस्पर्शवान्वायुः । स द्विविधो नित्योऽनित्यश्च । नित्यः परमाणुरूपः । अनित्यः कार्यरूपः । पुनस्त्रिविधः शरीरेन्द्रियविषयभेदात् । शरीरं वायुलोके । इन्द्रियं स्पर्शग्राहकं त्वक्सर्वशरीरवर्ति । विषयो वृक्षादिकम्पनहेतुः ॥ १२ ॥

वायुं लक्षयति— रूपेति । आकाशादावतिव्याप्तिवारणाय स्पर्शवानिति । पृथिव्यादावतिव्याप्तिवारणाय रूपरहित इति ॥

शरीरान्तःसंचारी वायुः प्राणः । स चैकोऽप्युपाधिभेदात्प्राणापानादिसंज्ञां लभते ॥ १३ ॥

ननु प्राणस्य कुत्रान्तर्भाव इत्यत आह— शरीरेति । एक एव प्राणः स्थानभेदात्प्राणापानादिशब्दैर्व्यवह्रियत इत्यर्थः । स्पर्शानुमेयो वायुः । तथाहि । योऽयं वायौ वाति सत्यनुष्णाशीतस्पर्शो भासते स स्पर्शः । क्वचिदाश्रितो गुणत्वाद्रूपवत् । न चास्य पृथिव्याश्रयः । उद्भूतस्पर्शवत्पार्थिवस्योद्भूतरूपवत्त्वनियमात् । न जलतेजस्यनुष्णाशीतत्वात् । न विभुचतुष्टयं सर्वत्रोपलब्धिप्रसङ्गात् । न मनः परमाणुस्पर्शस्यातीन्द्रियत्वात् । तस्माद्यः प्रतीयमानस्पर्शाश्रयः स वायुः ॥ ननु वायुः प्रत्यक्षः । प्रत्यक्षस्पर्शाश्रयत्वाद्घटवदिति चेन्न । उद्भूतरूपवत्त्वस्योपाधित्वात् । यत्र द्रव्यत्वे सति बहिरिन्द्रियप्रत्यक्षत्वं तत्रोद्भूतरूपवत्त्वमिति घटादौ साध्यव्यापकत्वम् । पक्षे साधनाव्यापकत्वम् । न चैवं तप्तवारिस्थतेजसोऽप्यप्रत्यक्षत्वापत्तिरिष्टत्वात् । तस्माद्रूपरहितत्वाद्वायुरप्रत्यक्षः ॥ इदानीं कार्यरूपपृथिव्यादिचतुष्टयस्योत्पत्तिविनाशक्रमः कथ्यते । ईश्वरस्य चिकीर्षावशात्परमाणुक्रिया जायते । ततः परमाणुद्वयसंयोगे सति द्व्यणुकमुत्पद्यते त्रिभिर्द्व्यणुकैस्त्र्यणुकम् । एवं चतुरणुकादिक्रमेण महती पृथिवी महत्य आपो महत्तेजो महान्वायुरुत्पद्यते । एवमुत्पन्नस्य कार्यद्रव्यस्य संजिहीर्षावशात्क्रियया परमाणुद्वयविभागे सति द्व्यणुकनाशः, समवायिकारणनाशात्त्र्यणुकनाशः । ततश्चतुरणुकस्येत्येवं पृथिव्यादिनाशः । असमवायिकारणनाशाद्द्व्यणुकनाशः । समवायिकारण

नाशाद्व्यणुकनाश इति संप्रदायः । सर्वत्रासमवायिकारणनाशात्कार्यद्रव्यनाश इति नवीनाः ॥ किं पुनः परमाणुसद्भावे प्रमाणम् । उच्यते । जालसूर्यमरीचिस्थं सूक्ष्मतमं यद्रज उपलभ्यते तत्सावयवम् । चाक्षुषद्रव्यत्वात्पटवत् । द्व्यणुकावयवोऽपि सावयवो महदारम्भकत्वात्तन्तुवत् । यो द्व्यणुकावयवः स परमाणुः । स च नित्यः । कार्यत्वेऽनवस्थाप्रसङ्गात् । तथा च मेरुसर्षपयोरपि समानपरिमाणत्वापत्तिः । सृष्टिप्रलयसद्भावे किं मानम् । "धाता यथा पूर्वमकल्पयत्" इत्यादिश्रुतिः प्रमाणम् । सर्वकार्यद्रव्यध्वंसोऽवान्तरप्रलयः । सर्वभावकार्यध्वंसो महाप्रलय इति विवेकात् ॥

शब्दगुणमाकाशम् । तच्चैकं विभु नित्यं च ॥ १४ ॥

आकाशं लक्षयति— शब्देति ॥ नन्वाकाशमपि किं पृथिव्यादिवन्नाना । नेत्याह— तच्चैकमिति । भेदे प्रमाणाभावादित्यर्थः ॥ एकत्वादेव सर्वत्रोपलब्धेर्विभुत्वमङ्गीकर्तव्यमित्याह— विभ्विति । सर्वमूर्तद्रव्यसंयोगित्वं विभुत्वम् । मूर्तत्वं परिच्छिन्नपरिमाणवत्त्वं क्रियावत्त्वं वा ॥ विभुत्वादेवात्मवन्नित्यमित्याह— नित्यं चेति ॥

अतीतादिव्यवहारहेतुः कालः । स चैको विभुर्नित्यश्च ॥१५॥

कालं लक्षयति— अतीतेति । सर्वाधारः कालः सर्वकार्यनिमित्तकारणं च ॥

प्राच्यादिव्यवहारहेतुर्दिक् । सा चैका नित्या विभ्वी च॥१६॥

दिशो लक्षणमाह—प्राचीति । दिगपि कार्यमात्रे निमित्तकारणम् ॥

ज्ञानाधिकरणमात्मा । स द्विविधो जीवात्मा परमात्मा च । तत्रेश्वरः सर्वज्ञः परमात्मैक एव सुखदुःखादिरहितः । जीवात्मा प्रतिशरीरं भिन्नो विभुर्नित्यश्च ॥ १७ ॥

आत्मनो लक्षणमाह—ज्ञानेति ॥ आत्मानं विभजते— स द्विविध इति ॥ परमात्मनो लक्षणमाह— तत्रेति । नित्यज्ञानाधिकरणत्वमीश्वरत्वम् ॥ नन्वीश्वरस्य सद्भावे किं प्रमाणम् । न तावत्प्रत्यक्षम् । तद्धि बाह्यमान्तरमिन्द्रियं वा । नाद्योऽरूपिद्रव्यत्वात् । नान्त्य आत्मसुखादिव्यतिरिक्तत्वात् । नाप्यनुमानं लिङ्गाभावात् । ना-

प्यागमस्तथाविधागमाभावादिति चेन्न । अङ्कुरादिकं कर्तृजन्यं कार्यत्वाद्घटवादित्यनुमानस्य प्रमाणत्वात् । उपादानगोचरापरोक्षज्ञानचिकीर्षाकृतिमत्त्वं कर्तृत्वम् । उपादानं समवायिकारणम् । सकलपरमाण्वादिसूक्ष्मदर्शित्वात्सर्वज्ञत्वम् । " यः सर्वज्ञः स सर्वविद् " इत्याद्यागमोऽपि तत्र प्रमाणम् ॥ जीवस्य लक्षणमाह—जीव इति । सुखादिकं जीवलक्षणम् ॥ ननु " मनुष्योऽहं ब्राह्मणोऽहम् " इत्यादौ सर्वत्राहंप्रत्यये शरीरस्यैव विषयत्वाच्छरीरमेवात्मेति चेन्न । शरीरस्य करपादादिनाशे सति शरीरनाशादात्मनोऽपि नाशप्रसङ्गात् । नापीन्द्रियाणामात्मत्वम् । तथात्वे " योऽहं घटमद्राक्षं सोऽहमिदानीं त्वचा स्पृशामि " इत्यनुसंधानाभावप्रसङ्गात् । अन्यानुभूतेऽन्यस्यानुसंधानायोगात् । तस्माद्देहेन्द्रियव्यतिरिक्तो जीवः । सुखदुःखवैचित्र्यात्प्रतिशरीरं भिन्नः । स च न परमाणुः । शरीरव्यापिसुखाद्यनुपलब्धिप्रसङ्गात् । न मध्यपरिमाणः । तथा सत्यनित्यत्वप्रसङ्गेन कृतनाशाकृताभ्यागमप्रसङ्गात् । तस्मान्नित्यो विभुर्जीवः ॥

सुखदुःखाद्युपलब्धिसाधनमिन्द्रियं मनः । तच्च प्रत्यात्मनियतत्वादनन्तं परमाणुरूपं नित्यं च ॥ १८ ॥

मनसो लक्षणमाह— सुखेति । स्पर्शरहितत्वे सति क्रियावत्त्वं मनसो लक्षणम् ॥ मनो विभजते— तच्चेति । एकैकस्यात्मन एकैकं मन इत्यात्मनामनेकत्वान्मनसोऽप्यनेकत्वमित्यर्थः ॥ परमाणुरूपमिति । मध्यमपरिमाणत्वेऽनित्यत्वप्रसङ्गादित्यर्थः ॥ ननु मनो विभु स्पर्शरहितत्वादाकाशवादिति चेन्न । मनसो विभुत्व आत्ममनःसंयोगस्यासमवायिकारणस्याभावाज्ज्ञानानुत्पत्तिप्रसङ्गात् । न च विभुद्वयसंयोगोऽस्तीति वाच्यम् । तत्संयोगस्य नित्यत्वेन सुषुप्त्यभावप्रसङ्गात् । पुरिततिव्यतिरिक्तप्रदेश आत्ममनःसंयोगस्य सर्वदा विद्यमानत्वात् । अणुत्वे तु यदा मनः पुरितातं प्रविशति तदा सुषुप्तिः । यदा निःसरति तदा ज्ञानोत्पत्तिरित्यणुत्वसिद्धिः ॥

चक्षुर्मात्रग्राह्यो गुणो रूपम् । तच्च शुक्लनीलपीतरक्तहरितकपिशचित्रभेदात्सप्तविधं पृथिवीजलतेजोवृत्ति । तत्र पृथि-

यां सप्तविधम् । अभास्वरं शुक्लं जले । भास्वरं शुक्लं च जसि ॥ १९ ॥

रूपं लक्षयति— चक्षुरिति । संख्यादावतिव्याप्तिवारणाय मात्रपदम् । रूपत्वेऽतिव्याप्तिवारणाय गुणपदम् । प्रभाभित्तिसंयोगेऽतिव्याप्तिवारणाय चक्षुर्मात्रग्राह्यजातिमत्त्वं वाच्यम् ॥ नन्वव्याप्यवृत्तिनीलादिसमुदाय एव चित्ररूपमिति चेन्न । रूपस्य व्याप्यवृत्तित्वनेयमात् ॥ ननु चित्रपटेऽवयवरूपस्य प्रतीतिरस्त्विति चेन्न । रूपहितत्वेन पटस्याप्रत्यक्षत्वप्रसङ्गात् । न च रूपवत्समवेतत्वं प्रत्यक्षयोजकं गौरवात् । तस्मात्पटस्य प्रत्यक्षत्वानुपपत्त्या चित्ररूपसिद्धिः ॥ रूपस्याश्रयमाह— पृथिवीति ॥ आश्रयं विभज्य दर्शयति—तत्रेति ॥

रसनग्राह्यो गुणो रसः । स च मधुराम्ललवणकटुकषायतिक्तभेदात्षड्विधः पृथिवीजलवृत्तिः । पृथिव्यां षड्विधः । जले मधुर एव ॥ २० ॥

रसं लक्षयति— रसनेति । रसत्वेऽतिव्याप्तिपरिहाराय गुणपदम् ॥ रसस्याश्रयमाह— पृथिवीति ॥ आश्रयं विभज्य दर्शयति— पृथिव्यामिति ॥

घ्राणग्राह्यो गुणो गन्धः । स च द्विविधः सुरभिरसुरभिश्च पृथिवीमात्रवृत्तिः ॥ २१ ॥

गन्धं लक्षयति—घ्राणेति । गन्धत्वेऽतिव्याप्तिवारंणाय गुणपदम् ॥

त्वगिन्द्रियमात्रग्राह्यो गुणः स्पर्शः । स च त्रिविधः शीतोष्णानुष्णाशीतभेदात्पृथिव्यग्नेजोवायुवृत्तिः । तत्र शीतो जले । उष्णस्तेजसि । अनुष्णाशीतः पृथिवीवाय्वोः ॥ २२ ॥

स्पर्शं लक्षयति— त्वगिति । स्पर्शत्वेऽतिव्याप्तिवारणाय गुणपदम् । संयोगादावतिव्याप्तिवारणाय मात्रपदम् ॥

रूपादिचतुष्टयं पृथिव्यां पाकजमनित्यं च । अन्यत्रापाकजं नित्यमनित्यं च । नित्यगतं नित्यम् । अनित्यगतमनित्यम् ॥ २३ ॥

रूपादीति । पाकस्तेजःसंयोगः । तेन पूर्वरूपं नश्यति । रूपान्तर-

मुत्पद्यत इत्यर्थः ॥ अत्र परमाणुष्वेव पाकः । न द्व्यणुकादौ । तत-श्श्यामपाकनिक्षिप्ते घटे परमाणुषु रूपान्तरोत्पत्तौ श्यामघटनाशे पुन-र्द्व्यणुकादिक्रमेण रक्तघटोत्पत्तिः । तत्र परमाणवः समवायिकार-णम् । तेजःसंयोगोऽसमवायिकारणम् । अदृष्टादिकं निमित्तकारणम् । द्व्यणुकादिरूपे कारणरूपमसमवायिकारणमिति पीलुपाकवादिनो वैशेषिकाः । पूर्वघटस्य नाशं विनैवावयविन्यवयवेषु परमाणुपर्य-न्तेषु युगपद्रूपान्तरोत्पत्तिरिति पिठरपाकवादिनो नैयायिकाः । अत एव पार्थिवपरमाणुरूपादिकमनित्यमित्यर्थः ॥ अन्यत्रेति । जलादा-वित्यर्थः ॥ नित्यगतमिति । परमाणुगतमित्यर्थः ॥ अनित्यगतमिति । द्व्यणुकादिनिष्ठमित्यर्थः ॥ रूपादिचतुष्टयमुद्भूतं प्रत्यक्षम् । अनुद्भूत-मप्रत्यक्षम् । उद्भूतत्वं प्रत्यक्षप्रयोजको धर्मः । तदभावोऽनुद्भूतत्वम् ॥

एकत्वादिव्यवहारासाधारणहेतुः संख्या । सा नवद्रव्यवृत्तिः । एकत्वादिपरार्धपर्यन्ता । एकत्वं नित्यमनित्यं च । नित्यगतं नित्यम् । अनित्यगतमनित्यम् । द्वित्वादिकं तु सर्वत्रानित्य-मेव ॥ २४ ॥

संख्यां लक्षयति— एकत्वेति ॥

मानव्यवहारासाधारणं कारणं परिमाणं नवद्रव्यवृत्ति । तच्च चतुर्विधम् । अणु महद्दीर्घं ह्रस्वं चेति ॥ २५ ॥

परिमाणं लक्षयति—मानेति ॥ परिमाणं विभजते— तच्चेति भावप्रधानो निर्देशः । अणुत्वं महत्त्वं दीर्घत्वं ह्रस्वत्वं चेत्यर्थः ।

पृथग्व्यवहारासाधारणं कारणं पृथक्त्वं सर्वद्रव्यवृत्ति ॥२६॥

पृथक्त्वं लक्षयति—पृथगिति । इदमस्मात्पृथगिति व्यवहारका-रणमित्यर्थः ॥

संयुक्तव्यवहारासाधारणो हेतुः संयोगः सर्वद्रव्यवृत्तिः॥२७॥

संयोगं लक्षयति—संयुक्तेति । इमौ संयुक्ताविति व्यवहारहेतु-रित्यर्थः । संख्यादिलक्षणेषु सर्वत्र दिक्कालादावतिव्याप्तिवारणाया-साधारणेति ॥ संयोगो द्विविधः । कर्मजः संयोगजश्च । आद्यो ह-स्तक्रियया पुस्तकसंयोगः । द्वितीयो हस्तपुस्तकसंयोगात्कायपु-

तकसंयोगः । स चाव्याप्यवृत्तिः संयोगः । स्वात्यन्ताभावसमानाधि-
करणत्वमव्याप्यवृत्तित्वम् ॥

संयोगनाशको गुणो विभागः सर्वद्रव्यवृत्तिः॥ २८ ॥

विभागं लक्षयति— संयोगेति । कालादावतिव्याप्तिवारणाय गुण इति । रूपादावतिव्याप्तिवारणाय संयोगनाशक इति ॥ विभागोऽपि द्विविधः कर्मजो विभागजश्च । आद्यो हस्तक्रियया पुस्तकविभागः । द्वितीयो हस्तपुस्तकविभागात्कायपुस्तकविभागः ॥

**परापरव्यवहारासाधारणकारणे परत्वापरत्वे पृथिव्यादि-
चतुष्टयमनोवृत्तिनी । ते द्विविधे दिक्कृते कालकृते च । दूर-
स्थे दिक्कृतं परत्वम् । समीपस्थे दिक्कृतमपरत्वम् । ज्येष्ठे काल-
कृतं परत्वम् । कनिष्ठे कालकृतमपरत्वम् ॥ २९ ॥**

परत्वापरत्वयोर्लक्षणमाह— परेति । परव्यवहारकारणं परत्वम् । अपरव्यवहारकारणमपरत्वंमित्यर्थः ॥ परापरत्वे विभजते— ते द्विविधे इति ॥ दिक्कृतयोरुदाहरणमाह— दूरस्थ इति ॥ कालकृत उदाहरति—ज्येष्ठ इति ॥

आद्यपतनासमवायिकारणं गुरुत्वं पृथिवीजलवृत्ति ॥ ३० ॥

गुरुत्वं लक्षयति—आद्येति । द्वितीयादिपतनस्य वेगासमवायिकारणत्वाद्वेगेऽतिव्याप्तिवारणायाद्येति ॥

**आद्यस्यन्दनासमवायिकारणं द्रवत्वं पृथिव्यग्नेजोवृत्ति । त-
द्द्विविधं सांसिद्धिकं नैमित्तिकं च । सांसिद्धिकं जले ।
नैमित्तिकं पृथिवीतेजसोः । पृथिव्यां घृतादावग्निसंयोगजन्यं
द्रवत्वम् । तेजसि सुवर्णादौ ॥ ३१ ॥**

द्रवत्वं लक्षयति— आद्यस्यन्दनेति । स्यन्दनं स्रवणम् । तेजःसंयोगजन्यं नैमित्तिकद्रवत्वम् । तद्भिन्नं सांसिद्धिकद्रवत्वम् ॥ पृथिव्यां नैमित्तिकद्रवत्वमुदाहरति—घृतादाविति ॥ तेजसि तदाह— सुवर्णादाविति ॥

चूर्णादिपिण्डीभावहेतुर्गुणः स्नेहो जलमात्रवृत्तिः ॥ ३२ ॥

. स्नेहं लक्षयति—चूर्णेति । कालादावतिव्याप्तिवारणाय गुण इति । गुणादावतिव्याप्तिवारणाय पिण्डीभावेति ॥

श्रोत्रग्राह्यो गुणः शब्द आकाशमात्रवृत्तिः । स द्विविधो ध्वन्यात्मको वर्णात्मकश्चेति । ध्वन्यात्मको भेर्यादौ । वर्णात्मकः संस्कृतभाषादिरूपः ॥ २३ ॥

शब्दं लक्षयति—श्रोत्रेति । शब्दत्वेऽतिव्याप्तिवारणाय गुण इति । रूपादावतिव्याप्तिवारणाय श्रोत्रेति ॥ शब्दस्त्रिविधः संयोगजो विभागजः शब्दजश्चेति । तत्राद्यो भेरीदण्डसंयोगजन्यः । द्वितीयो वंश उत्पाट्यमाने दलद्वयविभागजन्यश्चटचटाशब्दः । भेर्याकाशमारभ्य श्रोत्रपर्यन्तं द्वितीयादिशब्दाः शब्दजाः ॥

सर्वव्यवहारहेतुर्ज्ञानं बुद्धिः । सा द्विविधा स्मृतिरनुभवश्च । संस्कारमात्रजन्यं ज्ञानं स्मृतिः । तद्भिन्नं ज्ञानमनुभवः । स द्विविधो यथार्थोऽयथार्थश्च । तद्वति तत्प्रकारकोऽनुभवो यथार्थः । यथा रजत इदं रजतमिति ज्ञानम् । सैव प्रमेत्युच्यते । तदभाववति तत्प्रकारकोऽनुभवोऽयथार्थः । यथा शुक्ताविदं रजतमिति ज्ञानम् । सैवाप्रमेत्युच्यते ॥ २४ ॥

बुद्धेर्लक्षणमाह— सर्वेति । जानामित्यनुव्यवसायगम्यज्ञानत्वमेव लक्षणमित्यर्थः ॥ बुद्धिं विभजते—सेति ॥ स्मृतेर्लक्षणमाह—संस्कारेति । भावनाख्यः संस्कारः । संस्कारध्वंसेऽतिव्याप्तिवारणाय ज्ञानमिति । घटादिप्रत्यक्षेऽतिव्याप्तिवारणाय संस्कारजन्यमिति ॥ अनुभवं लक्षयति— तद्भिन्नामिति । स्मृतिभिन्नं ज्ञानमनुभव इत्यर्थः ॥ अनुभवं विभजते—स द्विविध इति ॥ यथार्थानुभवस्य लक्षणमाह—तद्वतीति ॥ ननु घटे घटत्वमिति प्रमाणमव्याप्तिः । घटत्वे घटाभावादिति चेन्न । यत्र यत्संबन्धोऽस्ति तत्र तत्संबन्धानुभव इत्यर्थात् । घटत्वेऽपि घटसंबन्धोऽस्तीति नाव्याप्तिः ॥ सेति । यथार्थानुभव एव शास्त्रे प्रमेत्युच्यत इत्यर्थः ॥ अयथार्थं लक्षयति— तदभाववतीति ॥ नन्विदं संयोगीति प्रमायामतिव्याप्तिरिति चेन्न । यदवच्छेदेन यत्संबन्धाभावस्तदवच्छेदेन तत्संबधज्ञानस्य विवक्षितत्वात् । संयोगाभावावच्छेदेन

ायोगज्ञानस्य भ्रमत्वात् । संयोगावच्छेदेन संयोगज्ञानस्य प्रमात्व-
ातिव्याप्तिः ॥

**यथार्थानुभवश्चतुर्विधः प्रत्यक्षानुमित्युपमितिशाब्दभेदात् ।
ात्करणमपि चतुर्विधं प्रत्यक्षानुमानोपमानशब्दभेदात् ॥ २५ ॥**

यथार्थानुभवं विभजते— यथार्थेति ॥ प्रसङ्गात्प्रमाकरणं विभ-
जते— तत्करणमिति । प्रमाकरणमित्यर्थः । प्रमाकरणं प्रमाणमिति
प्रमाणसामान्यलक्षणम् ॥

**व्यापारवदसाधारणं कारणं करणम् । अनन्यथासिद्धकार्य-
नियतपूर्ववृत्ति कारणम् । कार्यं प्रागभावप्रतियोगि ॥ २६ ॥**

करणलक्षणमाह— असाधारणेति । साधारणकारणे दिक्कालादा-
वतिव्याप्तिवारणायासाधारणेति ॥ कारणलक्षणमाह— कार्येति ।
पूर्ववृत्ति कारणमित्युक्ते रासभादावतिव्याप्तिः स्यादतो नियतेति । ता-
वन्मात्रे कृते कार्येऽतिव्याप्तिः । अतः पूर्ववृत्तीति ॥ ननु तन्तुरूप-
मपि पटं प्रति कारणं स्यादिति चेन्न । अनन्यथासिद्धत्वे सतीति
विशेषणात् । अनन्यथासिद्धत्वमन्यथासिद्धिविरहः । अन्यथासिद्धिश्च
त्रिविधा । येन सहैव यस्य यं प्रति पूर्ववृत्तित्वमवगम्यते तं प्रति
तदन्यथासिद्धम् ॥ यथा तन्तुना तन्तुरूपम् । तन्तुत्वं च पटं प्रति ।
अन्यं प्रति पूर्ववृत्तित्वे ज्ञात एव यस्य यं प्रति पूर्ववृत्तित्वमवगम्यते
तं प्रति तदन्यथासिद्धम् । यथा शब्दं प्रति पूर्ववृत्तित्वे ज्ञात एव
घटं प्रत्याकाशस्य । अन्यत्र कृत्स्ननियतपूर्ववर्तिनैव कार्यसंभवे तत्स-
हभूतमन्यथासिद्धम् । यथा पाकजस्थले गन्धं प्रति रूपप्रागभाव-
स्य । एवं चान्यथासिद्धानियतपूर्ववृत्तित्वं कारणत्वम् ॥ कार्यलक्षण-
माह— कार्येति ॥

**कारणं त्रिविधं समवाय्यसमवायिनिमित्तभेदात् । यत्सम-
वेतं कार्यमुत्पद्यते तत्समवायिकारणम् । यथा तन्तवः पटस्य ।
पटश्च स्वगतरूपादेः । कार्येण कारणेन वा सहैकस्मिन्नर्थे सम-
वेतत्वे सति कारणमसमवायिकारणम् । यथा तन्तुसंयोगः पट-
स्य । तन्तुरूपं पटरूपस्य । तदुभयभिन्नं कारणं निमित्तकारण-**

म् । यथा तुरीवेमादिकं पटस्य । तदेतत्त्रिविधकारणमध्ये यदसाधारणं कारणं तदेव करणम् ॥ ३७ ॥

कारणं विभजते—कारणमिति ॥ समवायिकारणलक्षणमाह—यत्समवेतेति । यस्मिन्समवेतमित्यर्थः ॥ असमवायिकारणं लक्षयति—कार्येणेति । कार्येणेत्येतदुदाहरति— तन्तुसंयोग इति । कार्येण पटेनैकस्मिंस्तन्तौ समवेतत्वात्तन्तुसंयोगः पटस्यासमवायिकारणमित्यर्थः ॥ कारणेन सहेत्येतदुदाहरति— तन्तुरूपमिति । कारणेन पटेन सहैकस्मिंस्तन्तौ समवेतत्वात्तन्तुरूपं पटरूपस्यासमवायिकारणमित्यर्थः ॥ निमित्तकारणं लक्षयति— तदुभयेति । समवाय्यसमवायिभिन्नं कारणं निमित्तकारणमित्यर्थः ॥ करणलक्षणमुपसंहरति— तदेतादिति ॥

तत्र प्रत्यक्षज्ञानकरणं प्रत्यक्षम् । इन्द्रियार्थसंनिकर्षजन्यं ज्ञानं प्रत्यक्षम् । तद्द्विविधं निर्विकल्पकं सविकल्पकं च । तत्र निष्प्रकारकं ज्ञानं निर्विकल्पकम् । यथेदं किंचित् । सप्रकारकं ज्ञानं सविकल्पकम् । यथा डित्थोऽयं ब्राह्मणोऽयं श्यामोऽयमिति ॥ ३८ ॥

प्रत्यक्षलक्षणमाह—तत्रेति । प्रमाणचतुष्टयमध्य इत्यर्थः ॥ प्रत्यक्षज्ञानस्य लक्षणमाह—इन्द्रियेति । इन्द्रियं चक्षुरादिकम् । अर्थो घटादिः । तयोः संनिकर्षः संयोगादिः । तज्जन्यं ज्ञानमित्यर्थः ॥ निर्विकल्पकस्य लक्षणमाह— निष्प्रकारकमिति । विशेषणविशेष्यसंबन्धानवगाहि ज्ञानमित्यर्थः ॥ ननु निर्विकल्पके किं प्रमाणमिति चेन्न । गौरिति विशिष्टज्ञानं विशेषणज्ञानजन्यं विशिष्टज्ञानत्वात् । दण्डीति ज्ञानवदित्यनुमानस्य प्रमाणत्वात् । विशेषणज्ञानस्य सविकल्पकत्वेऽनवस्थाप्रसङ्गान्निर्विकल्पासिद्धिः ॥ सविकल्पकं लक्षयति—सप्रकारकमिति । नामजात्यादिविशेषणविशेष्यसंबन्धावगाहि ज्ञानमित्यर्थः ॥ संविकल्पकमुदाहरति— यथेति ॥

प्रत्यक्षज्ञानहेतुरिन्द्रियार्थसंनिकर्षः षड्विधः । संयोग-संयुक्तसमवाय-संयुक्तसमवेतसमवाय-समवाय-समवेतसमवाय-विशेषण-विशेष्यभावा इति । चक्षुषा घटप्रत्यक्षजनने संयोगः संनिकर्षः ।

टरूपप्रत्यक्षजनने संयुक्तसमवायः संनिकर्षः । चक्षुःसंयुक्ते घटे
पस्य समवायात् । रूपत्वसामान्यप्रत्यक्षे संयुक्तसमवेतसमवायः
निकर्षः । चक्षुःसंयुक्ते घटे रूपं समवेतं तत्र रूपत्वस्य समवा-
त् । श्रोत्रेण शब्दसाक्षात्कारे समवायः संनिकर्षः । कर्णविव-
वृत्त्याकाशस्य श्रोत्रत्वाच्छब्दस्याकाशगुणत्वाद्गुणगुणिनोश्च स-
वायात् । शब्दत्वसाक्षात्कारे समवेतसमवायः संनिकर्षः । श्रो-
समवेते शब्दे शब्दत्वस्य समवायात् । अभावप्रत्यक्षे विशेषण-
वेशेष्यभावः संनिकर्षः । घटाभाववद्भूतलमित्यत्र चक्षुःसंयुक्ते
ूतले घटाभावस्य विशेषणत्वात् । एवं संनिकर्षषट्कजन्यं ज्ञानं
त्यक्षम् । तत्करणमिन्द्रियम् । तस्मादिन्द्रियं प्रत्यक्षप्रमाणमि-
ते सिद्धम् ॥ ३९ ॥

इन्द्रियार्थसंनिकर्षं विभजते—प्रत्यक्षेति ॥ संयोगसंनिकर्षमुदाहर-
ते—चक्षुषेति । द्रव्यप्रत्यक्षे सर्वत्र संयोगसंनिकर्ष इत्यर्थः । आत्मा मनसा
संयुज्यते । मन इन्द्रियेण । इन्द्रियमर्थेन । ततः प्रत्यक्षज्ञानमुत्पद्यते ॥
संयुक्तसमवायमुदाहरति—घटरूपेति ॥ तत्र युक्तिमाह—चक्षुःसंयुक्त
ति ॥ संयुक्तसमवेतसमवायमुदाहरति— रूपत्वेति ॥ समवायमुदाह-
रति— श्रोत्रेणेति ॥ तदुपपादयति— कर्णेति ॥ ननु दूरस्थशब्दस्य
कथं श्रोत्रसंबन्ध इति चेन्न । वीचितरङ्गन्यायेन कदम्बमुकुलन्यायेन
वा शब्दाच्छब्दान्तरोत्पत्तिक्रमेण श्रोत्रदेशे जातस्य श्रोत्रसंबन्धात्प्र-
त्यक्षत्वसंभवात् ॥ समवेतसमवायमुदाहरति— शब्दत्वेति ॥ विशेषण-
वेशेष्यभावमुदाहरति—अभावेति । अभावप्रत्यक्षे विशेषणविशेष्यभावः
संनिकर्षः ॥ तदुपपादयति—घटाभाववदिति । भूतलं विशेष्यं घटाभा-
वो विशेषणम् । भूतले घटो नास्तीत्यत्र घटाभावस्य विशेष्यत्वं द्रष्ट-
व्यम् । एतेनानुपलब्धेः प्रमाणान्तरत्वं निरस्तम् ॥ यद्यत्र घटोऽभवि-
ष्यत्तर्हि भूतलमिवाद्रक्ष्यत् । दर्शनाभावान्नास्तीति तार्किकप्रतियोगि-
ग्राह्यत्वविरोध्यनुपलब्धिसहकृतेन्द्रियेणैवाभावज्ञानोपपत्तावनुपलब्धेः प्रमा-
णान्तरत्वासंभवात् । अधिकरणज्ञानार्थमपेक्षणीयेन्द्रियस्यैव करणत्वो-
पपत्तावनुपलब्धेः करणत्वस्यायुक्तत्वात् ॥ विशेषणविशेष्यभावो वि-

शेषणविशेष्यस्वरूपमेव नातिरिक्तः संबन्धः ॥ प्रत्यक्षज्ञानमुपसंहरंस्तस्य करणमाह—एवमिति। असाधारणकारणत्वादिन्द्रियं प्रत्यक्षज्ञानकरणमित्यर्थः ॥ प्रत्यक्षमुपसंहरति—तस्मादिति ॥

अनुमितिकरणमनुमानम् । परामर्शजन्यं ज्ञानमनुमितिः। व्याप्तिविशिष्टपक्षधर्मता ज्ञानं परामर्शः। यथा वह्निव्याप्यधूमवानयं पर्वत इति ज्ञानं परामर्शः। तज्जन्यं पर्वतो वह्निमानिति ज्ञानमनुमितिः । यत्र यत्र धूमस्तत्राग्निरिति साहचर्यनियमो व्याप्तिः। व्याप्यस्य पर्वतादिवृत्तित्वं पक्षधर्मता ॥ ४० ॥

अनुमानं लक्षयति—अनुमितिकरणमिति ॥ अनुमितेर्लक्षणमाह—परामर्शेति ॥ ननु संशयोत्तरप्रत्यक्षेऽतिव्याप्तिः । स्थाणुपुरुषसंशयानन्तरं पुरुषत्वव्याप्यकरादिमानयमिति परामर्शे सति पुरुष एवेति प्रत्यक्षजननात् । न च तत्रानुमितिरेवेति वाच्यम्। "पुरुषं साक्षात्करोमि" इत्यनुव्यवसायविरोधादिति चेन्न। पक्षतासहकृतपरामर्शजन्यत्वस्य विवक्षितत्वात् । सिषाधयिषाविरहसहकृतसिद्ध्यभावः पक्षता। साध्यसिद्धिरनुमितिप्रतिबन्धिका। सिद्धिसत्त्वेऽप्यनुमिनोमीतीच्छायामनुमितिदर्शनात् । सिषाधयिषोत्तेजिका । ततश्चोत्तेजिकाभावविशिष्टमण्यभावस्य दाहकरणत्ववत् । सिषाधयिषाविरहसहकृतसिद्ध्यभावस्याप्यनुमितिकरणत्वम् ॥ परामर्शं लक्षयति— व्याप्तीति । व्याप्तिविषयकं यत्पक्षधर्मताज्ञानं स परामर्श इत्यर्थः ॥ परामर्शमभिनीय दर्शयति—यथेति ॥ अनुमितिमभिनीय दर्शयति—तज्जन्यमिति । परामर्शजन्यमित्यर्थः ॥ व्याप्तेर्लक्षणमाह—यत्रेति । यत्र धूमस्तत्राग्निरित्यभिनयः साहचर्यनियम इति लक्षणम् । साहचर्यं सामानाधिकरण्यं तस्य नियमः । हेतुसमानाधिकरणात्यन्ताभावाप्रतियोगिसाध्यसामानाधिकरण्यव्याप्तिरित्यर्थः ॥ पक्षधर्मतास्वरूपमाह— व्याप्यस्येति ॥

अनुमानं द्विविधं स्वार्थं परार्थं च। स्वार्थं स्वानुमितिहेतुः। तथाहि स्वयमेव भूयो भूयो दर्शनेन यत्र यत्र धूमस्तत्राग्निरिति महानसादौ व्याप्तिं गृहीत्वा पर्वतसमीपं गत्वा तद्देशे चाग्नौ संदिहानः पर्वते धूमं पश्यन्व्याप्तिं स्मरति यत्र धूमस्तत्रा

ग्नरिति । तदनन्तरं वह्निव्याप्यधूमवानयं पर्वत इति ज्ञानमुत्प-
ाते । अयमेव लिङ्गपरामर्श इत्युच्यते । तस्मात्पर्वतो वह्निमा-
नति ज्ञानमनुमितिरुत्पद्यते । तदेतत्स्वार्थानुमानम् । यत्तु स्वयं
'मादग्निमनुमाय परं प्रति बोधयितुं पञ्चावयववाक्यं प्रयुङ्क्ते त-
रार्थानुमानम् । यथा पर्वतो वह्निमान्धूमवत्त्वात् । यो यो
मवान्स स वह्निमान् । यथा महानसः । तथा चायम् । तस्मात्त-
ति । अनेन प्रतिपादितालिङ्गात्परोऽप्यग्निं प्रतिपद्यते ॥ ४१ ॥

अनुमानविभागमाह—अनुमानमिति ॥ स्वार्थानुमानं विविच्य दर्श-
ति—तथाहीति ॥ स्वार्थानुमानं दर्शयति—स्वयमेवेति ॥ ननु पार्थि-
त्वलोहलेख्यत्वादौ शतशः सहचारदर्शनेऽपि वज्रादौ व्यभिचारोप-
ब्धेर्भूयो दर्शनेन कथं व्याप्तिग्रह इति चेन्न । व्यभिचारज्ञानविरह-
हकृतसहचारज्ञानस्य व्याप्तिग्राहकत्वात् ॥ व्यभिचारज्ञानं निश्चयः
ङ्का च ॥ तद्विरहः क्वचित्तर्कात्क्वचित्स्वतःसिद्ध एव धूमाग्निव्याप्ति-
हे कार्यकारणभावभङ्गप्रसङ्गलक्षणस्तर्को व्यभिचारशङ्कानिवर्तकः ॥
नु सकलवह्निधूमयोरसंनिकर्षात्कथं व्याप्तिग्रह इति चेन्न । धूमत्व-
ह्नित्वरूपसामान्यप्रत्यासत्त्या सकलधूमवह्निज्ञानसंभवात् ॥ तस्मा-
देति । लिङ्गपरामर्शादित्यर्थः ॥ परार्थानुमानमाह—यत्त्विति । य-
च्छब्दस्य तत्परार्थानुमानमिति तच्छब्देनान्वयः ॥ पञ्चावयववाक्यमु-
दाहरति—यथेति ॥

प्रतिज्ञाहेतूदाहरणोपनयनिगमनानि पञ्चावयवाः । पर्वतो
ाह्निमानिति प्रतिज्ञा । धूमवत्त्वादिति हेतुः । यो यो धूमवा-
नित्युदाहरणम् । तथा चायमित्युपनयः । तस्मात्तथेति निगम-
नम् ॥ ४२ ॥

अवयवस्वरूपमाह—प्रतिज्ञेति ॥ उदाहृतवाक्ये प्रतिज्ञाविशेषमा-
ह—पर्वतो वह्निमानिति ॥ साध्यवत्तया पक्षवचनं प्रतिज्ञा । पञ्चम्य-
न्तं लिङ्गप्रतिपादकं वचनं हेतुः । व्याप्तिप्रतिपादकमुदाहरणम् । प-
क्षधर्मताज्ञानमुपनयः । अबाधितत्वादिकं निगमनप्रयोजनम् ॥

· स्वार्थानुमितिपरार्थानुमित्योर्लिङ्गपरामर्श एव कारणम् । त-
त्परामर्शोऽनुमानम् ॥ ४३ ॥

अनुमितिकरणमाह—स्वार्थेति ॥ ननु व्याप्तिस्मृतिपक्षधर्मताज्ञाना-भ्यामेवानुमितिसंभवे विशिष्टपरामर्शः किमर्थमङ्गीकर्तव्य इति चेन्न । वह्निव्याप्यधूमवानयमिति शाब्दपरामर्शस्थले परामर्शस्यावश्यकतया लाघवेन सर्वत्र परामर्शस्यैव कारणत्वात् । लिङ्गं न करणम् । अतीतादौ व्यभिचारात् । व्यापारवत्कारणं करणमिति मते परामर्शद्वारा व्याप्तिज्ञानं पक्षज्ञानं साध्यज्ञानं लिङ्गज्ञानं यत्किंचिज्जन्यज्ञानमात्रं वा परामर्शव्यापारकं करणम् । तज्जन्यत्वे सति तज्जन्यजनको व्यापारः ॥ अनुमानमुपसंहरति—तस्मादिति ॥

लिङ्गं त्रिविधम् । अन्वयव्यतिरेकि केवलान्वयि केवलव्यतिरेकि चेति । अन्वयेन व्यतिरेकेण च व्याप्तिमदन्वयव्यतिरेकि । यथा वह्नौ साध्ये धूमवत्त्वम् । यत्र धूमस्तत्राग्निर्यथा महानस इत्यन्वयव्याप्तिः । यत्र वह्निर्नास्ति तत्र धूमोऽपि नास्ति यथा महाह्रद इति व्यतिरेकव्याप्तिः । अन्वयमात्रव्याप्तिकं केवलान्वयि । यथा घटोऽभिधेयः प्रमेयत्वात्पटवत् । अत्र प्रमेयत्वाभिधेयत्वयोर्व्यतिरेकव्याप्तिर्नास्ति । सर्वस्य प्रमेयत्वादभिधेयत्वाच्च । व्यतिरेकमात्रव्याप्तिकं केवलव्यतिरेकि । यथा पृथिव्नीतरेभ्यो भिद्यते गन्धवत्त्वात् । यदितरेभ्यो न भिद्यते न तद्गन्धवत् । यथा जलम् । न चेयं तथा । तस्मान्न तथेति । अत्र यद्गन्धवत्तदितरभिन्नमित्यन्वयदृष्टान्तो नास्ति । पृथिवीमात्रस्य पक्षत्वात् ॥ ४४ ॥

लिङ्गं विभजते—लिङ्गमिति ॥ अन्वयव्यतिरेकि लक्षयति—अन्वयेति । हेतुसाध्ययोर्व्याप्तिरन्वयः । तदभावयोर्व्याप्तिर्व्यतिरेकव्याप्तिः ॥ केवलान्वयिनो लक्षणमाह—अन्वयेति । केवलान्वयिसाध्यकं केवलान्वयि । अत्यन्ताभावाप्रतियोगित्वं केवलान्वयित्वम् । ईश्वरप्रमाविषयत्वं सर्वपदाभिधेयत्वं च सर्वत्रास्तीति व्यतिरेकाभावः ॥ व्यतिरेकमुदाहरति— पृथिवीति ॥ नन्वितरभेदः प्रसिद्धो वा, न वा । आद्ये यत्र प्रसिद्धस्तत्र हेतुसत्त्वेऽन्वयित्वम् । असत्त्वेऽसाधारण्यम् ।

द्वितीये साध्यज्ञानाभावात्कथं तद्विशिष्टानुमितिः । विशेषणज्ञानाभावे विशिष्टज्ञानानुदयात् । प्रतियोगिज्ञानाभावाद्व्यतिरेकव्याप्तिज्ञानमपि स्यादिति चेन्न । जलादित्रयोदशान्योन्याभावानां त्रयोदशसु त्येकं प्रसिद्धानां मेलनं पृथिव्यां साध्यते । त्रयोदशत्वावच्छिन्नसाध्यस्यैकाधिकरणवृत्तित्वाभावात् । नान्वयित्वासाधारण्ये प्रत्येकाधिकरणप्रसिद्ध्या साध्यविशिष्टानुमितिर्व्यतिरेकव्याप्तिनिरूपणं चेति॥

संदिग्धसाध्यवान्पक्षः । यथा धूमवत्त्वे हेतौ पर्वतः । निश्चितसाध्यवान्सपक्षः । यथा तत्रैव महानसः । निश्चितसाध्याभाववान्विपक्षः । यथा तत्रैव महाह्रदः ॥ ४५ ॥

पक्षलक्षणमाह— संदिग्धेति ॥ ननु श्रवणानन्तरभाविमननस्थले व्याप्तिः । तत्र वेदवाक्यैरात्मनो निश्चितत्वे न संदेहाभावात् । किं प्रत्यक्षेऽपि वह्नौ यत्रेच्छयानुमितिस्तत्राप्यव्याप्तिरिति चेन्न । उपक्षताश्रयत्वस्य पक्षलक्षणत्वात् ॥ सपक्षलक्षणमाह— निश्चितेति ॥ विपक्षलक्षणमाह—निश्चितेति ॥

सव्यभिचारविरुद्धसत्प्रतिपक्षासिद्धबाधिताः पञ्चहेत्वाभासाः । सव्यभिचारोऽनैकान्तिकः । स त्रिविधः । साधारणासाधारणानुपसंहारिभेदात् । तत्र साध्याभाववद्वृत्तिः साधारणोऽनैकान्तिकः । यथा पर्वतो वह्निमान्प्रमेयत्वादिति । प्रमेयत्वस्य वह्न्यभाववति ह्रदे विद्यमानत्वात् । सर्वसपक्षविपक्षव्यावृत्तोऽसाधारणः । यथा शब्दो नित्यः शब्दत्वादिति । शब्दत्वं सर्वेभ्यो नित्येभ्योऽनित्येभ्यश्च व्यावृत्तं शब्दमात्रवृत्ति । अन्वयव्यतिरेकदृष्टान्तरहितोऽनुपसंहारी । यथा सर्वमनित्यं प्रमेयत्वादिति । अत्र सर्वस्यापि पक्षत्वाद्दृष्टान्तो नास्ति । साध्याभावव्याप्यो हेतुर्विरुद्धः । यथा शब्दो नित्यः कृतकत्वादिति । कृतकत्वं हि नित्यत्वाभावेनानित्यत्वेन व्याप्तम् । साध्याभावसाधकं हेत्वन्तरं यस्य विद्यते स सत्प्रतिपक्षः । यथा शब्दो नित्यः श्रावणत्वाच्छब्दत्वादिति । शब्दोऽनित्यः कार्यत्वाद्घटवदिति । असिद्धस्त्रिविधः ।

आश्रयासिद्धः स्वरूपासिद्धो व्याप्यत्वासिद्धश्चेति । आश्रयासिद्धो यथा गगनारविन्दं सुरभ्यरविन्दत्वात् । सरोजारविन्दवत् । अत्र गगनारविन्दमाश्रयः । स च नास्त्येव । स्वरूपासिद्धो यथा शब्दो गुणश्चाक्षुषत्वात् । अत्र चाक्षुषत्वं शब्दे नास्ति शब्दस्य श्रावणत्वात् । सोपाधिको हेतुर्व्याप्यत्वासिद्धः । साध्यव्यापकत्वे सति साधनाव्यापक उपाधिः । साध्यसमानाधिकरणात्यन्ताभावप्रतियोगित्वं साध्यव्यापकत्वम् । साधनवन्निष्ठात्यन्ताभावाप्रतियोगित्वं साधनाव्यापकत्वम् । पर्वतो धूमवान्वह्निमत्त्वादिति । अत्रार्द्रेन्धनसंयोग उपाधिः । तथाहि । यत्र धूमस्तत्रार्द्रेन्धनसंयोग इति साध्यव्यापकता । यत्र वह्निस्तत्रार्द्रेन्धनसंयोगो नास्ति । अयोगोलक आर्द्रेन्धनसंयोगाभावादिति साधनाव्यापकता । एवं साध्यव्यापकत्वे सति साधनाव्यापकत्वादार्द्रेन्धनसंयोग उपाधिः । सोपाधिकत्वाद्वह्निमत्त्वं व्याप्यत्वासिद्धम् ॥ यस्य साध्याभावः प्रमाणान्तरेण निश्चितः स बाधितः । यथा वह्निरनुष्णो द्रव्यत्वादिति । अत्रानुष्णत्वं साध्यं तदभाव उष्णत्वं स्पार्शनप्रत्यक्षेण गृह्यत इति बाधितत्वम् ॥ ४६ ॥

एवं सद्धेतुं निरूप्यासद्धेतुं निरूपयति— सव्यभिचारेति । अनुमितिप्रतिबन्धकयथार्थज्ञानविषयत्वं हेत्वाभासत्वम् ॥ सव्यभिचारं विभजते— स त्रिविध इति ॥ साधारणं लक्षयति— तत्रेति ॥ उदाहरति— यथेति ॥ असाधारणं लक्षयति— सर्वेति ॥ अनुपसंहारिणो लक्षणमाह— अन्वयेति ॥ विरुद्धं लक्षयति— साध्येति । सत्प्रतिपक्षं लक्षयति— यस्येति ॥ असिद्धं विभजते— असिद्ध इति ॥ आश्रयासिद्धमुदाहरति— गगनेति ॥ स्वरूपासिद्धमुदाहरति— शब्देति ॥ व्याप्यत्वासिद्धस्य लक्षणमाह— सोपाधिक इति । उपाधिलक्षणमाह— साध्येति । उपाधिश्चतुर्विधः । केवलसाध्यव्यापकः पक्षधर्मावच्छिन्नसाध्यव्यापकः साधनावच्छिन्नसाध्यव्यापक उदासीनधर्मावच्छिन्नसाध्यव्यापकश्चेति । आद्य आर्द्रेन्धनसंयोगः

तीयो यथा । वायुः प्रत्यक्षः प्रत्यक्षस्पर्शाश्रयत्वादिति । अत्र बहिर्द्र-
यत्वावच्छिन्नप्रत्यक्षत्वव्यापकमुद्भूतरूपवत्त्वम् । तृतीयो यथा । प्रध्वंसो
विनाशी जन्यत्वादिति । अत्र जन्यत्वावच्छिन्नानित्यत्वव्यापकं भावत्वम्।
तुर्थो यथा। प्रागभावो विनाशी प्रमेयत्वादिति। अत्र जन्यत्वावच्छिन्ना-
नित्यत्वव्यापकं भावत्वम् ॥ बाधितस्य लक्षणमाह— यस्येति । अत्र
बाधस्य ग्राह्याभावनिश्चयत्वेन सप्रतिपक्षस्य विरोधिज्ञानसामग्रीत्वेन
प्रत्यक्षादनुमितिप्रतिबन्धकत्वम् । इतरेषां तु परामर्शप्रतिबन्धकत्वम् ।
त्रापि साधारणस्याव्यभिचाराभाववत्तया विरुद्धस्य सामानाधिक-
ण्याभाववत्तया व्यापकत्वासिद्धस्य विशिष्टव्याप्त्यभाववत्तयासा-
धारणानुपसंहारिणोर्व्याप्तिसंशयाधायकत्वेन न च व्याप्तिज्ञानप्रतिब-
न्धकत्वम् । आश्रयासिद्धिस्वरूपासिद्धयोः पक्षधर्मताज्ञानप्रतिबन्धक-
त्वम् । उपाधिस्तु व्यभिचारज्ञानद्वारा व्याप्तिज्ञानप्रतिबन्धकः ।
सिद्धसाधनं तु पक्षताविघटकतयाश्रयासिद्धेऽन्तर्भूतमिति न निग्रह-
स्थानान्तरमिति नवीनाः ॥

उपमितिकरणमुपमानम् । संज्ञासंज्ञिसंबन्धज्ञानमुपमितिः ।
सादृश्यज्ञानं करणं सादृश्यज्ञानम् । अतिदेशवाक्यार्थस्मरणमवान्तरव्या-
पारः । तथाहि । गवयशब्दवाच्यमजानन्कुतश्चिदारण्यकपुरु-
षाद्गोसदृशो गवय इति श्रुत्वा वनं गतो वाक्यार्थं स्मरन्गो-
सदृशपिण्डं पश्यति । तदनन्तरमसौ गवयशब्दवाच्य इत्युपमि-
तिरुत्पद्यते ॥ ४७ ॥

उपमानं लक्षयति— उपमितीति ॥

आप्तवाक्यं शब्दः । आप्तस्तु यथार्थवक्ता । वाक्यं पदसमू-
हः । यथा गामानयेति । शक्तं पदम् । अस्मात्पदादयमर्थो
बोद्धव्य इतीश्वरेच्छासंकेतः शक्तिः ॥ ४८ ॥

शब्दं लक्षयति— आप्तेति ॥ पदलक्षणमाह— शक्तमिति ।
पदमर्थस्मृत्यनुकूलः पदपदार्थसंबन्धः शक्तिः । सा च पदार्थान्तरमिति
मीमांसकाः ॥ तन्निरासार्थमाह— अस्मादिति । डित्थादीनामिव
घटादीनामपि संकेत एव शक्तिः । न तु पदार्थान्तरमित्यर्थः । गवा-

दिशब्दानां जातावेव शक्तिः । विशेषणतया जातेः प्रथममुपस्थितत्वात् । व्यक्तिलाभस्त्वाक्षेपादिनेति केचित् । तन्न । गामानयेत्यादौ वृद्धव्यवहारात्सर्वत्रानयनादेर्व्यक्तावेव संभवे जातिविशिष्टव्यक्तावेव शक्तिकल्पनात् । शक्तिग्रहस्तु वृद्धव्यवहारेण । व्युत्पित्सुर्बालो गामानयेत्युत्तमवृद्धवाक्यश्रवणानन्तरं मध्यमवृद्धस्य प्रवृत्तिमुपलभ्य गवानयनं दृष्ट्वा मध्यमवृद्धप्रवृत्तिजनकज्ञानस्यान्वयव्यतिरेकाभ्यां वाक्यजन्यत्वं निश्चित्याश्वमानय गां बधानेति वाक्यान्तर आवापोद्वापाभ्यां गोपदस्य गोत्वविशिष्टे शक्तिः । अश्वशब्दस्याश्वत्वविशिष्टे शक्तिरिति व्युत्पद्यते ॥ ननु सर्वत्र कार्यपरत्वाद्व्यवहारस्य कार्यवाक्य एव व्युत्पत्तिर्न सिद्धपर इति चेन्न । काश्यां त्रिभुवनातिलको भूपतिरित्यादौ सिद्धेऽपि व्यवहाराद्विकसितपद्मे मधुकर इत्यादौ सिद्धपदसमभिव्यवहारात्सिद्धेऽपि मधुकरादिपदे व्युत्पत्तिदर्शनाच्च ॥ लक्षणापि शब्दवृत्तिः । । शक्यसंबन्धो लक्षणा । गङ्गायां घोष इत्यत्र गङ्गापदवाच्यप्रवाहसंबन्धादेव तीरोपस्थितौ तीरेऽपि शक्तिर्न कल्प्यते । सैन्धवादौ लवणाश्वयोः परस्परसंबन्धाभावान्नानाशक्तिकल्पनम् ॥ लक्षणा त्रिविधा । जहल्लक्षणा-जहदजहल्लक्षणा चेति । यत्र वाच्यार्थस्यान्वयाभावस्तत्र जहदिति । यथा मञ्चाः क्रोशन्तीति । यत्र वाच्यार्थस्याप्यन्वयस्तत्राजहदिति । यथा छत्रिणो गच्छन्तीति । यत्र वाच्यैकदेशत्यागेनैकदेशान्वयस्तत्र जहदजहदिति । यथा तत्त्वमसीति ॥ गौण्यपि लक्षणैव । लक्ष्यमाणगुणसंबन्धरूपा । अग्निर्माणवक इति ॥ व्यञ्जनापि लक्षणान्तर्भूतार्थशक्तिमूला च । अनुमानादिनान्यथासिद्धा । तात्पर्यानुपपत्तिर्लक्षणाबीजम् । तत्प्रतीतीच्छयोच्चरितत्वं तात्पर्यम् । तात्पर्यज्ञानं च वाक्यार्थज्ञाने हेतुः । नानार्थानुरोधात्तु प्रकरणादिकं तात्पर्यग्राहकम् । द्वारमित्यादौ पिधेहीति शब्दाध्याहारः ॥ नन्वर्थज्ञानार्थत्वाच्छब्दस्यार्थमविज्ञाय शब्दाध्याहारासंभवादर्थाध्याहार एव युक्त इति चेन्न । पदविशेष्यजन्यपदार्थोपस्थितौ शाब्दज्ञानहेतुत्वात् । अन्यथा घटः कर्मत्वमानयनं कृतिरित्यत्रापि शाब्दज्ञानप्रसङ्गात् । पङ्कजादिपदेषु योगरूढिः । अवयवशक्तिर्योगः । समुदायशक्तौ रूढिः । नियतपद्मत्वज्ञानार्थं समुदायशक्तिः । अन्यथा

मुदेऽपि प्रयोगप्रसङ्गः । इतरान्विते शक्तिरिति प्राभाकराः ॥ न्वयस्य वाक्यार्थतया भानसंभवादन्वयांशेऽपि शक्तिर्न कल्पनीयेति तमीयाः ॥

आकाङ्क्षा योग्यता संनिधिश्च वाक्यार्थज्ञानहेतुः । पदस्य दान्तरव्यतिरेकप्रयुक्तान्वयानुभावकत्वमाकाङ्क्षा । अर्थाबाधो ोग्यता । पदानामविलम्बेनोच्चारणं संनिधिः ॥ ४९ ॥

आकाङ्क्षेति । आकाङ्क्षादिज्ञानमित्यर्थः । अन्यथाकाङ्क्षादिभ्रमा-च्छाब्दभ्रमो न स्यात् ॥ आकाङ्क्षां लक्षयति— पदस्येति ॥ योग्य-ालक्षणमाह— अर्थेति ॥ संनिधिलक्षणमाह— पदानामिति । अ-वेलम्बेन पदार्थोपस्थितिः संनिधिः । उच्चारणं तु तदुपयोगितया युक्तम् ॥

आकाङ्क्षादिरहितं वाक्यमप्रमाणम् । यथा गौरश्वः पुरुषो स्तीति न प्रमाणमाकाङ्क्षाविरहात् । अग्निना सिञ्चेदिति न प्र-माणं योग्यताविरहात् । प्रहरे प्रहरेऽसहोच्चारितानि गामानये-त्यादिपदानि न प्रमाणं सांनिध्याभावात् ॥ ५० ॥

गौरश्व इति । घटः कर्मत्वमित्यनाकाङ्क्षोदाहरणं द्रष्टव्यम् ॥

वाक्यं द्विविधम् । वैदिकं लौकिकं च । वैदिकमीश्वरोक्त-त्वात्सर्वमेव प्रमाणम् । लौकिकं त्वाप्तोक्तं प्रमाणम् । अन्यदप्र-माणम् ॥ ५१ ॥

वैदिकस्य विशेषमाह— वैदिकमीश्वरोक्तत्वादिति ॥ ननु वेदस्या-नादित्वात्कथमीश्वरोक्तत्वमिति चेन्न । वेदः पौरुषेयो वाक्यसमुदाय-त्वाद्भारतादिवत् । न च स्मर्यमाणकर्तृत्वमुपाधिः ॥ गौतमादिभिः शिष्यपरंपरया वेदेऽपि कर्तुः स्मर्यमाणत्वेन साधनव्यापकत्वात् । "तस्मात्तेऽपानात्त्रयो वेदा अजायन्त" इति श्रुतेश्च ॥ ननु वर्णा नित्याः । स एवायं गकार इति प्रत्यभिज्ञाबलात् । तथा च कथं वे-दस्यानित्यत्वमिति चेन्न । उत्पन्नो गकारो नष्टो गकार इति प्रतीत्या वर्णानामनित्यत्वात् । सोऽयं गकार इति प्रत्यभिज्ञायाः सोऽयं दीप इति प्रत्यभिज्ञानवज्जात्यालम्बनत्वात् । वर्णानां नित्यत्वेऽप्यानुपूर्वि-

विशिष्टवाक्यस्यानित्यत्वाच्च । तस्मादीश्वरोक्तो वेदः ॥ मन्वादिस्मृतीनामाचाराणां च वेदमूलकतया प्रामाण्यम् । स्मृतिमूलवाक्यानामिदानीमनध्ययनात्तन्मूलभूता काचिच्छाखोत्पन्नेति कल्प्यते ॥ ननु पठ्यमानवेदवाक्योत्सादस्य कल्पयितुमशक्यतया विप्रकीर्णवादस्यायुक्तत्वान्नित्यानुमेयो वेदो मूलमिति चेन्न । तथा सति वर्णानुपूर्विज्ञानाभावेन बोधकत्वासंभवात् । नन्वेतानि पदानि स्वस्मारितार्थसंसर्गवन्त्याकाङ्क्षादिमत्पदकदम्बकत्वात्सद्वाक्यवदित्यनुमानादेव संसर्गज्ञानसंभवाच्छब्दो न प्रमाणान्तरमिति चेन्न । अनुमित्यपेक्षया शाब्दज्ञानस्य विलक्षणस्य शब्दात्प्रत्येमीत्यनुव्यवसायसाक्षिकस्य सर्वसंमतत्वात् ॥ नन्वर्थापत्तिरपि प्रमाणान्तरमस्ति । पीनो देवदत्तो दिवा न भुङ्क्ते इति दृष्टे श्रुते वा पीनत्वान्यथानुपपत्त्या रात्रिभोजनमर्थापत्त्या कल्प्यत इति चेन्न । देवदत्तो रात्रौ भुङ्क्ते दिवाभुंजानत्वे सति पीनत्वादित्यनुमानेनैव रात्रिभोजनस्य सिद्धत्वात् । अनुपलब्धिर्न मानम् । परिशेषोऽप्यनुमाय्यैव । शते पञ्चाशदिति संभवोऽप्यनुमानमेव । इह वटे यक्षस्तिष्ठतीत्यैतिह्यमज्ञातमूलवक्तृकः शब्द एव ॥ चेष्टापि शब्दानुमानद्वारा व्यवहारहेतुरिति न मानान्तरम् । तस्मात्प्रत्यक्षानुमानोपमानशब्दाश्चत्वार्येव प्रमाणानि । सर्वेषां ज्ञानानां तद्वति तत्प्रकारकत्वं स्वतो ग्राह्यं परतो वेति विचार्यते ॥ अत्र विप्रतिपत्तिः । 'ज्ञानप्रामाण्यं तदप्रामाण्याग्राहकयावज्ज्ञानग्राहकसामग्रीग्राह्यं वा । अत्र विधिकोटिः स्वतस्त्वम् । निषेधकोटिः परतस्त्वम् । अनुमानग्राह्यत्वेन सिद्धसाधनतावारणाय यावदिति । इदं ज्ञानमप्रमेति ज्ञाने प्रामाण्यग्राहकत्वाद्भावावारणायाप्रामाण्याग्राहकेति । इदं ज्ञानमप्रमेत्यनुव्यवसायनिष्ठप्रामाण्यग्राहकस्याप्रामाण्याग्राहकत्वाभावात्स्वतस्त्वं न स्यादतस्तादिति । तस्मिन्प्रामाण्याश्रयेऽप्रामाण्याग्राहक इत्यर्थः । उदाहृतस्थले व्यवसायेऽप्रामाण्यग्राहकस्याप्यनुव्यवसाये तदग्राहकत्वात्स्वतस्त्वसिद्धिः '॥ ननु स्वत एव प्रामाण्यं गृह्यते । घटमहं जानामीत्यनुव्यवसायेन घटत्वयोरिव नियतसंबन्धस्यापि विषयीकरणात् । व्यवसायरूपप्रत्यासत्तेस्तुल्यत्वात् । पुरोवर्तिनि प्रकारसंबन्धस्यैव प्रमात्वपदार्थत्वादिति चेन्न । स्वतः प्रामाण्यग्रहे जलज्ञानं प्रमाणं न वेत्यनभ्यासदशायां प्रमात्वसंशयो न स्यात् । अनुव्यवसायेन प्रामाण्यस्य निश्चितत्वात् ।

तस्मात्स्वतोऽग्राह्यत्वाभावात्परतो ग्राह्यत्वम् । तथाहि प्रथमं जलज्ञानानन्तरं प्रवृत्तौ सत्यां जललाभे सति पूर्वोत्पन्नं जलज्ञानं प्रमा । समर्थप्रवृत्तिजनकत्वाद्यन्नैवं तन्नैवम् । यथाप्रमेति व्यतिरेकिणा प्रमात्वं निश्चीयते । द्वितीयादिज्ञानेषु पूर्वज्ञानदृष्टान्तेन तत्सजातीयत्वलिङ्गेन चान्वयव्यतिरेकिणा गृह्यते । प्रमायां गुणजन्यत्वमुत्पत्तौ परतस्त्वम् । प्रमासाधारणकारणं गुणः । अप्रमासाधारणकारणं दोषः । तत्र प्रत्यक्षेऽपि विशेषणवद्विशेष्यसंनिकर्षो गुणः । अनुमितौ व्यापके सति व्याप्यज्ञानम् । उपमितौ यथार्थसादृश्यज्ञानम् । शाब्दज्ञाने यथार्थयोग्यताज्ञानमित्यादि बोध्यम् ॥ पुरोवर्तिनि प्रकाराभावस्य व्यवसायेनानुपस्थितत्वादप्रमात्वं परत एव गृह्यते । पित्तादिदोषजन्यत्वादुत्पत्तौ परतस्त्वम् ॥ ननु सर्वज्ञानानां यथार्थत्वादयथार्थज्ञानमेव नास्ति न च शुक्ताविदं रजतमिति ज्ञानात्प्रवृत्तिदर्शनादन्यथाख्यातिसिद्धिरिति वाच्यम् । रजतस्मृतिपुरोवृत्तिज्ञानाभ्यामेव प्रवृत्तिसंभवादुपस्थिते भेदाग्रहस्यैव सर्वत्र प्रवर्तकत्वेनेदं रजतमित्यादावतिप्रसङ्गाभावादिति चेन्न । सत्यरजतस्थले पुरोवर्तिविशेष्यरजतत्वप्रकारकज्ञानस्य लाघवेन प्रवृत्तिजनकतया शुक्तावपि रजतार्थिप्रवृत्तिजनकत्वेन विशिष्टज्ञानस्यैव कल्पनात् ॥

वाक्यार्थज्ञानं शाब्दज्ञानम् । तत्करणं शब्दः ॥ ५२ ॥

अयथार्थानुभवस्त्रिविधः । संशयविपर्ययतर्कभेदात् । एकस्मिन्धर्मिणि विरुद्धनानाधर्मवैशिष्ट्यावगाहि ज्ञानं संशयः । यथा स्थाणुर्वा पुरुषो वेति । मिथ्याज्ञानं विपर्ययः । यथा शुक्ताविदं रजतमिति । व्याप्यारोपेण व्यापकारोपस्तर्कः । यथा यदि वह्निर्न स्यात्तर्हि धूमोऽपि न स्यादिति ॥ ५३ ॥

अयथार्थानुभवं विभजते— अयथार्थेति । स्वप्नस्य मानसविपर्ययरूपत्वान्न त्रैविध्यविरोधः ॥ संशयलक्षणमाह— एकेति । घटपटाविति समूहलम्बनेऽतिव्याप्तिवारणायैकेति । घटो द्रव्यमित्यादावतिव्याप्तिवारणाय विरुद्धेति । पटत्वविरुद्धघटत्ववानित्यत्रातिव्याप्तिवारणाय नानेति ॥ विपर्ययलक्षणमाह— मिथ्येति । तदभाववति तत्प्रकारकनिश्चय इत्यर्थः ॥ तर्कं लक्षयति— व्याप्येति । यद्यपि

तर्को विपर्ययेऽन्तर्भवति तथापि प्रमाणानुग्राहकत्वाद्भेदेन कीर्तितः ॥

स्मृतिरपि द्विविधा । यथार्थायथार्था च । प्रमाजन्या यथार्था । अप्रमाजन्यायथार्था ॥ ५४ ॥

स्मृतिं विभजते— स्मृतिरिति ॥

सर्वेषामनुकूलवेदनीयं सुखम् ॥ ५५ ॥

सुखं लक्षयति— सर्वेषामिति । सुख्यहमित्याद्यनुव्यवसायगम्यं सुखत्वादिकमेव लक्षणम् । यथा श्रुतं स्वरूपकथनमिति द्रष्टव्यम् ॥

प्रतिकूलवेदनीयं दुःखम् ॥ ५६ ॥

इच्छा कामः ॥ ५७ ॥

क्रोधो द्वेषः ॥ ५८ ॥

कृतिः प्रयत्नः ॥ ५९ ॥

विहितकर्मजन्यो धर्मः ॥ ६० ॥

निषिद्धकर्मजन्यस्त्वधर्मः ॥ ६१ ॥

बुद्ध्यादयोऽष्टावात्ममात्रविशेषगुणाः ॥ ६२ ॥

बुद्धीच्छाप्रयत्ना द्विविधाः । नित्या अनित्याश्च । नित्येश्वरस्य । अनित्या जीवस्य ॥ ६३ ॥

संस्कारस्त्रिविधः । वेगो भावना स्थितिस्थापकश्चेति । वेगः पृथिव्यादिचतुष्टयमनोवृत्तिः । अनुभवजन्या स्मृतिहेतुर्भावनात्ममात्रवृत्तिः । अन्यथाकृतस्य पुनस्तदवस्थापादकः स्थितिस्थापकः । कटादिपृथिवीवृत्तिः ॥ ६४ ॥

संस्कारं विभजते— संस्कार इति । संस्कारत्वजातिमान्संस्कारः ॥ वेगस्याश्रयमाह— वेग इति । वेगत्वजातिमान्वेगः ॥ भावनां लक्षयति— अनुभवेति । स्मृतेरपि संस्कारजनकत्वं नवीनैरुक्तम् ॥ आत्मादावतिव्याप्तिवारणायानुभवेति । अनुभवविध्वंसेऽतिव्याप्तिवारणाय स्मृतीति ॥ स्थितिस्थापकं लक्षयति— अन्यथेति । संख्यादयोऽष्टौ नैमित्तिकद्रवत्ववेगस्थितिस्थापकाः सामान्यगुणाः । अन्ये रूपादयो

विशेषगुणाः । द्रव्यविभाजकोपाधिद्वयसमानाधिकरणावृत्ति द्रव्यकर्मावृत्ति जातिमत्त्वं विशेषगुणत्वम् ॥

चलनात्मकं कर्म । ऊर्ध्वदेशसंयोगहेतुरुत्क्षेपणम् । अधोदेशसंयोगहेतुरपक्षेपणम् । शरीरस्य संनिकृष्टसंयोगहेतुराकुञ्चनम् । विप्रकृष्टसंयोगहेतुः प्रसारणम् । अन्यत्सर्वं गमनम् । पृथिव्यादिचतुष्टयमनोमात्रवृत्ति ॥ ६५ ॥

कर्मलक्षणमाह— चलनेति ॥ उत्क्षेपणादीनां कार्यभेदमाह— ऊर्ध्वेति ॥ वक्रत्वसंपादकमाकुञ्चनम् । ऋजुतासंपादकं प्रसारणमित्यर्थः ॥

नित्यमेकमनेकानुगतं सामान्यं द्रव्यगुणकर्मवृत्ति । तद्द्विविधं परापरभेदात् । परं सत्ता । अपरं जातिर्द्रव्यत्वादिः ॥ ६६ ॥

सामान्यं लक्षयति— नित्यमिति । संयोगादावतिव्याप्तिवारणाय नित्यमिति । परमाणुपरिमाणादावतिव्याप्तिवारणायानेकेति । अनुगतत्वं समवेतत्वं तेन नाभावादावतिव्याप्तिः ॥

नित्यद्रव्यवृत्तयो व्यावर्तका विशेषाः ॥ ६७ ॥

विशेषं लक्षयति— नित्येति ॥

नित्यसंबन्धः समवायोऽयुतसिद्धवृत्तिः । ययोर्द्वयोर्मध्य एकमपराश्रितमेवावतिष्ठते तावायुतसिद्धौ । अवयवावयविनौ गुणगुणिनौ क्रियाक्रियावन्तौ जातिव्यक्ती विशेषनित्यद्रव्ये चेति ॥ ६८ ॥

समवायं लक्षयति— नित्येति । संयोगादावतिव्याप्तिवारणाय नित्येति । आकाशादावतिव्याप्तिवारणाय संबन्ध इति ॥ अयुतसिद्धलक्षणमाह— ययोरिति । नीलो घट इति विशिष्टप्रतीतिर्विशेषणविशेष्यसंबन्धविषयाविशिष्टप्रत्ययत्वाद्दण्डीति प्रत्ययवदिति समवायसिद्धिः ॥, अवयवावयविनाविति द्रव्यसमवायिकारणमवयवः । तज्जन्यद्रव्यमवयवि ॥

अनादिः सान्तः प्रागभावः । उत्पत्तेः पूर्वं कार्यस्य । सादिर-

नन्तः प्रध्वंसः। उत्पत्त्यनन्तरं कार्यस्य। त्रैकालिकसंसर्गावच्छि-न्नप्रतियोगिकोऽत्यन्ताभावः। यथा भूतले घटो नास्तीति। तादात्म्यसंबन्धावच्छिन्नप्रतियोगिकोऽन्योन्याभावः। यथा घटः पटो न भवतीति ॥ ६९ ॥

प्रागभावं लक्षयति— अनादिरिति। आकाशादावतिव्याप्तिवार-णाय सान्त इति। घटादावतिव्याप्तिवारणायानादिरिति। प्रतियो-गिसमवायिकारणवृत्तिः प्रतियोगिजनको भविष्यतीति व्यवहारहेतुः प्रागभावः॥ प्रध्वंसं लक्षयति— सादिरिति। घटादावतिव्याप्तिवार-णायानन्त इति। आकाशादावतिव्याप्तिवारणाय सादिरिति। प्रतियो-गिजन्यः प्रतियोगिसमवायिकारणवृत्तिर्ध्वस्तव्यवहारहेतुर्ध्वंसः॥ अत्य-न्ताभावं लक्षयति— त्रैकालिकेति। 'अन्योन्याभावेऽतिव्याप्तिवारणा-य संसर्गावच्छिन्नेति। ध्वंसप्रागभावयोरतिव्याप्तिवारणाय त्रैकालि-केति॥ अन्योन्याभावं लक्षयति— तादात्म्येति। प्रतियोगितावच्छे-दकतयारोपासंसर्गभेदादेकप्रतियोगिकयोरत्यन्ताभावान्योन्याभावयोर्भे-दुत्वम्। केवलदेवदत्ताभावो दण्ड्यभाव इति प्रतीत्या विशिष्टाभावः। एकसत्त्वे द्वौ न स्त इति प्रतीत्या द्वित्वावच्छिन्नोऽभावः। संयोगसं-बन्धेन घटवति समवायसंबन्धेन घटाभावः। तत्तद्घटाभावाद्घटत्वाव-च्छिन्नप्रतियोगिकसामान्याभावश्चातिरिक्तः। एवमन्योन्याभावोऽपि। घटत्वावच्छिन्नः पटो नास्तीति व्यधिकरणधर्मावच्छिन्नप्रतियोगिताका-भावो नाङ्गीक्रियते। पटे घटत्वं नास्तीति तस्यार्थः। अतिरिक्तत्वे स केवलान्वयी। सामयिकाभावोऽत्यन्ताभाव एव समयविशेषे प्रतीयमानः। घटाभाववति घटानयनेऽत्यन्ताभावस्यान्यत्र गममाभावे-ऽप्यप्रतीतेर्घटापसरणे सति प्रतीतेः। भूतले घटसंयोगप्रागभावप्रध्वं-सयोरत्यन्ताभावप्रतीतिनियामकत्वं कल्प्यते। घटवति तत्संयोगप्राग-भावप्रध्वंसयोरसत्त्वात्। अत्यन्ताभावस्याप्रतीतिः। घटापसरणे च संयोगध्वंससत्त्वात्प्रतीतिरिति। केवलाधिकरणादेव नास्तीति व्य-वहारोपपत्तावभावो न पदार्थान्तरामिति गुरवः। तन्न। अभावान-ङ्गीकारे कैवल्यस्य निर्वक्तुमशक्यत्वात्। अभावाभावो भाव एव नातिरिक्तोऽनवस्थाप्रसङ्गात्॥ ध्वंसप्रागभावः प्रागभावध्वंसश्च प्रति-

RAMAKRISHNA MISSION INSTITUTE OF CULTURE LIBRARY

योग्येव । अभावाभावोऽतिरिक्त एव । तृतीयाभावस्य प्रथमत्वान्नानवस्थेति नवीनाः ॥

सर्वेषां पदार्थानां यथायथमुक्तेष्वन्तर्भावात्सप्तैव पदार्था इति सिद्धम् ॥ ७० ॥

ननु प्रमाणप्रमेयसंशयप्रयोजनदृष्टान्तसिद्धान्तावयवतर्कनिर्णयवादजल्पवितण्डाहेत्वाभासच्छलजातिनिग्रहस्थानानां तत्त्वज्ञानान्निःश्रेयसाधिगम इति न्यायशास्त्रे षोडशपदार्थानामुक्तत्वात्कथं सप्तैवेत्यत आह— सर्वेषामिति । सर्वेषां सप्तस्वेवान्तर्भाव इत्यर्थः ॥ आत्मशरीरेन्द्रियार्थबुद्धिमनःप्रवृत्तिदोषप्रेत्यभावफलदुःखापवर्गास्तु प्रमेयमिति द्वादशविधं प्रमेयम् । प्रवृत्तिर्धर्माधर्मौ । रागद्वेषमोहा दोषाः । राग इच्छा । द्वेषो मन्युः । मोहः शरीरादावात्मभ्रमः । प्रेत्यभावो मरणम् । फलं भोगः । अपवर्गो मोक्षः । स च स्वसमानाधिकरणदुःखप्रागभावासमानकालीनो दुःखध्वंसः । प्रयोजनं सुखं दुःखं हानिश्च । दृष्टान्तो महानसादिः । प्रामाणिकत्वेनाभ्युपगतोऽर्थः सिद्धान्तः । निर्णयो निश्चयः प्रमाणफलम् । तत्त्वबुभुत्सोः कथा वादः । उभयसाधनवती विजिगीषुकथा जल्पः । स्वपक्षस्थापनहीना वितण्डा । कथा नाम नानावक्तृकः पूर्वोत्तरपक्षवाक्यसंदर्भः । अभिप्रायान्तरेण प्रयुक्तस्यार्थान्तरं प्रकल्प्य दूषणं छलम् । असदुत्तरं जातिः । साधर्म्यवैधर्म्योत्कर्षापकर्षवर्ण्यावर्ण्यविकल्प्यसाध्यप्राप्त्यप्राप्तिप्रसङ्गप्रतिदृष्टान्तानुपपत्तिसंशयप्रकरणाहेत्वर्थापत्त्यविशेषोपपत्त्यविशेषोपलब्ध्यनुपलब्धिकारणं नित्यानित्यकार्यसमजातिः । वादिनोऽपजयहेतुर्निग्रहस्थानम् । प्रतिज्ञाहानिः प्रतिज्ञान्तरं प्रतिज्ञाविरोधः प्रतिज्ञासंन्यासो हेत्वन्तरमर्थान्तरं निरर्थकमविज्ञातार्थमपार्थकमप्राप्तकालं न्यूनमधिकं पुनरुक्तमननुभाषणमज्ञानमप्रतिभाविक्षेपोऽमतानुज्ञपर्यनुयोज्योऽपेक्षणं निरनुयोज्यानुयोगोऽपसिद्धान्तो हेत्वाभासश्च निग्रहस्थानानि । शेषं सुगमम् ॥ ननु करतलानलसंयोगे सत्यपि प्रतिबन्धके सति दाहानुत्पत्तेः शक्तिः पदार्थान्तरमिति चेन्न । प्रतिबन्धकाभावस्य कार्यमात्रे कारणत्वेन शक्तेरनुपयोगात् । कारणस्यैव शक्तिपदार्थत्वमिति ॥ ननु भस्मादिना कांस्यादौ शुद्धिदर्शनादाधेयशक्तिरङ्गीकार्येति चेन्न ।

भस्मादिसंयोगसमानकालीनास्पृश्यस्पर्शप्रतियोगिकयातदभावसहितभस्मादिसंयोगध्वंसस्य शुद्धिपदार्थत्वात् । स्वत्वमपि न पदार्थान्तरम् । यथेष्टविनियोगयोग्यत्वस्य स्वत्वस्वरूपत्वात् । तदवच्छेदकं च प्रतिग्राहादिलब्धत्वमेवेति ॥

अथ विधिर्निरूप्यते— प्रत्यवायजनकचिकीर्षाजनकज्ञानविषयो विधिः । तत्प्रतिपादको लिङादिर्वा । कृत्यसाध्ये प्रवृत्त्यदर्शनात्कृतिसाध्यता ज्ञानप्रवर्तकम् । न च विषभक्षणादौ प्रवृत्तिप्रसङ्गः । इष्टसाधनतालिङ्गकृतिसाध्यताज्ञानस्य काम्यस्थले नित्यनैमित्तिकस्थले च विहितकालजीवित्वनिमित्तकज्ञानजन्यत्वस्यैव प्रवर्तकत्वात् । न चानुगमः । स्वविशेषणवत्ताप्रतिसंधानजन्यत्वस्यानुगतत्वादिति गुरवः । तन्न । लाघवेन कृतिसाध्येष्टसाधनताज्ञानस्यैव चिकीर्षाद्वारा प्रयत्नजनकत्वात् । न च 'नित्येष्टसाधनत्वाज्ञानाभावादप्रवृत्तिप्रसङ्गः । तत्रापि प्रत्यवायपरिहारस्य पापक्षयफलत्वस्य च कल्पनात् । तस्मात्कृतिसाध्येष्टसाधनत्वमेव लिङाद्यर्थः ॥ ननु "ज्योतिष्टोमेन स्वर्गकामो यजेत" इत्यत्र लिङा स्वर्गसाधनकार्यं प्रतीयते । यागस्याशुविनाशिनः कालान्तरभाविस्वर्गसाधनत्वायोगाद्योग्यं स्थायिकार्यमपूर्वमेव लिङर्थः । कार्यं कृतिसाध्यं कृतेः सविषयत्वात् । विषयाकाङ्क्षायां यागो विषयत्वेनान्वितस्य कार्यमिति' नियोज्याकाङ्क्षायां स्वर्गकामपदं नियोज्य परतयान्वितकार्यबोद्धा नियोज्यः । तेन ज्योतिष्टोमनामकयागविषयकं स्वर्गकामस्य कार्यमिति वाक्यार्थः संपद्यते । वैदिकोलिङित्वात् "यावज्जीवमग्निहोत्रं जुहुयात्" इति नित्यवाक्ये सत्यपूर्वमेव वाच्यं कल्प्यते ॥ "आरोग्यकामो भैषजपानं कुर्यात्" इत्यादौ लौकिकलिङ्कार्ये लक्षणेति चेन्न । आतुरस्याप्यारोग्यतानिश्चयाभावेन साधनतया प्रतीत्यनन्तरं निर्वाहार्थमवान्तरव्यापारतयापूर्वस्य कल्पनात् । कीर्तनादिना न श्रुतेस्तेन यागध्वंसो व्यापारो लोकव्युत्पत्तिबलात् । क्रियायामेव कृतिसाध्येष्टसाधनत्वं लिङा बोध्यत इति लिङत्वेन रूपेण विध्यर्थत्वम् । आख्यातत्वेन प्रयत्नार्थकत्वम् । पचति पाकं करोतीति विवरणदर्शनात् । किं करोतीति प्रश्ने पचतीत्युत्तराच्चाख्यातस्याप्रयत्नार्थत्वनिश्चयात् । रथो गच्छतीत्यादावनुकूलव्यापारे लक्षणा । "देवदत्तः पचति तण्डु-

लाः। देवदत्तेन पच्यते तण्डुलः" इत्यत्र कर्तृकर्मणोर्नाख्यातार्थत्वम्.। किंतु तद्गतैकत्वादीनामेव । तयोराक्षेपादेव लाभः । प्रजयतीत्यादौ धातोरेव प्रकर्षे शक्तिः। उपसर्गाणां द्योतकत्वमेव न तत्र शक्तिरस्ति ॥ पदार्थज्ञानस्य परमं प्रयोजनं मोक्षः। तथाहि । "आत्मावारे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः" इति श्रुत्या श्रवणादीनामात्मसाक्षात्कारहेतुत्वबोधनात् । श्रुत्या देहादिविलक्षणात्मज्ञानेऽप्यसंभवादिनिवृत्तेर्युक्त्यनुबन्धानुरूपं मनःसाध्यत्वान्मननोपयोगिपदार्थनिरूपणद्वारा शास्त्रस्यापि मोक्षोपयोगः। तदनन्तरं श्रुत्युपदिष्टयोगविधिना निदिध्यासने कृते तदनन्तरं देहादिविलक्षणात्मसाक्षात्कारे सति देहादावहमभिमानरूपमिथ्याज्ञाननाशे सति दोषाभावात्प्रवृत्त्यभावे धर्माधर्मयोरभावाज्जन्माभावे पूर्वधर्माधर्मयोरनुभवेन नाशे चरमदुःखध्वंसलक्षणो मोक्षो जायते । ज्ञानमेव मोक्षसाधनं मिथ्याज्ञाननिवृत्तेर्ज्ञानमात्रसाधनत्वात् । " तमेवं विदित्वातिमृत्युमेति । नान्यः पन्था विद्यतेऽयनाय " इति साधनान्तरनिषेधाच्च । ननु "तत्प्राप्तिहेतुर्विज्ञानं कर्म चोक्तं महामुनेः" इति कर्मणोऽपि मोक्षसाधनत्वस्मरणाज्ज्ञानकर्मणोः समुच्चय इति चेन्न । " नित्यनैमित्तिकैरेव कुर्वाणो दुरितक्षयम्। ज्ञानं च विमलीकुर्वन्नभ्यासेन च पाचयेत् । अभ्यासात्पक्वविज्ञानः कैवल्यं लभते नरः " इत्यादिना कर्मणो ज्ञानसाध्यत्वप्रतिपादनात् ॥ ज्ञानद्वारैव मोक्षसाधनं न साक्षात्। तस्मात्पदार्थज्ञानस्य मोक्षः परमं प्रयोजनमिति सर्वं रमणीयम् ॥

कणादन्यायमतयोर्बालव्युत्पत्तिसिद्धये ।
अन्नंभट्टेन विदुषा रचितस्तर्कसंग्रहः ॥

इति महोपाध्यायान्नंभट्टविरचितः स्वकृतदीपिकासमेतस्तर्कसंग्रहः समाप्तः ।

TRANSLATION.

'Having placed in my heart the Lord of the world, [having meditated on God], and having saluted my preceptor, I compose this Compendium of Logical results for the pleasant comprehension of the uninstructed.'

1. 'There are seven Categories;—Substance, Quality, Action, Genus, Difference, Co-inherence and Non-existence.'

2. 'Amongst those (categories), Substances [the abodes of Qualities] are nine;—Earth, Water, Light, Air, Ether, Time, Place, Soul and Mind.'

3. 'There are twenty-four Qualities;—Colour, Savour, Odour, Tangibility, Number, Dimension, Severalty, Conjunction, Disjunction, Priority, Posteriority, Weight, Fluidity, Viscidity, Sound, Understanding, Pleasure, Pain, Desire, Aversion, Effort, Merit, Demerit and Faculty.'

4. 'There are five Actions;—Throwing upwards, Throwing downwards, Contraction, Expansion and Going.'

5. 'Genus [a common nature] is of two kinds;—Higher and Lower.'

6. 'Differences, which reside in eternal substances, are endless.'

7. 'Co-inherence is one only.'

8. 'Non-existence is of four kinds;—Antecedent non-existence, Destruction, Absolute non-existence and Mutual non-existence.'

9. 'That is Earth, in which there is the quality Odour. It is of two kinds;—Eternal and Non-eternal. In its atomic character it is Eternal; and when some product arises out of those atoms, then that is called Non-eternal. This [earth in the character of a product] is of three kinds, through the differences of body, organ of sense and mass. The body is that of us men. The organ is the apprehender of odour, called the Smell, which resides in the fore-part of the nose. And the masses [what have parts] are clods, stones, &c.'

10. 'That is Water, which appears cold on touching it. 'And it is of two kinds;—Eternal and Non-eternal. In the form of atoms, it is Eternal; and when a product is produced by those atoms, then that is called Non-eternal. This [water in the form of products] is of three kinds, through the differences of body, organ of sense and mass. The body exists in the world of *Varuṇa*. The sense is the percipient of savour, which is called the Taste, and which resides in the fore-part of the tongue. The masses are rivers, seas, &c.'

11. 'That is Light, the sensation by touch of which is warm. This is of two kinds;—Eternal and Non-eternal. It is Eternal in the form of atoms, and in the form of products it is Non-eternal. This [light in the form of a product] is of three kinds, through the differences of body, organ of sense and mass. That the body exists in the Solar realm, is well-known. The sense, the percipient of colour, which is called the Sight, resides in the fore-part of the pupil of the eye. Masses are of four kinds, through these differences;—Produced in earth, Produced in the sky, Produced in the stomach, and Produced in mines. Produced in earth, it is fire, &c. Produced in the sky, it is lightning &c., the fuel of which is water. Produced in the stomach, it is the cause of the digestion of things eaten. Produced in mines, it is gold &c.'

12. 'That is Air, which has not colour, and has tangibility. It is of two kinds;—Eternal and Non-eternal. In the form of atoms it is Eternal; and in the form of products it is Non-eternal. This [air in the form of products] is of three kinds, through the differences of body, organ of sense and mass. The body is in the ærial world. The sense is the Touch, the apprehender of tangibility, existing throughout the whole body. The mass is that which is the cause of the shaking of trees &c.'

13. 'Air circulating within the body is called *Prâṇa*. Although it is but one, yet, from the difference of its accidents, it is called by Breath, Flatulence, &c. [Breath, Flatulence, Cerebral pulsation, General pulsation and Digestion].'

14. 'That is Ether, in which there resides the quality of sound. It is one, all-pervading and eternal.'

15. 'That is Time, which is the cause of the employment of

'Past' &c. [Past, Present and Future.] It is one, all-pervading and eternal.'

16. 'That is Space, which is the cause of the employment of 'East' &c. [East, West, North and South.] It is one, all-pervading and eternal.'

17. 'That is Soul, which is the substratum of knowledge [that in which knowledge resides.] It is of two kinds;—the Animal soul and the Supreme soul. The Supreme soul is God, the Omniscient. He is One only and devoid of joy or sorrow. The Animal soul is distributed to each body. It is all-pervading and eternal.'

18. 'That is Mind, whose sense is the cause of the perception of pleasure, pain, &c. It is innumerable, for it remains with each Soul. It is in the form of an atom and is eternal.'

19. 'That quality, which is apprehended only by the sense of Sight, is called Colour. And it is of seven kinds, through the differences of White, Blue, Yellow, Red, Green, Brown and Variegated, residing in earth, water and light. In earth, colour of all the seven kinds resides; in water, white colour not lustrous resides, and in light, lustrous white colour resides.'

20. 'That quality which is known through the sonse of Taste, is called Savour. And it is of six kinds, through the differences of Sweet, Sour, Saline, Bitter, Astringent and Pungent, residing in earth and water. In earth, there is savour of the six kinds; and in water, there is only the sweet savour.'

21. 'The quality which is apprehended by the sense of Smell, is called Odour. And it is of two kinds;—Fragrance and Stench, residing in earth alone.'

22. 'That quality which is perceived only by the organ of Touch, is called Tangibility. And it is of three kinds, through the differences of Cold, Warm and Temperate. This quality resides in earth, water, light and air. Coldness resides in water; Warmth in light, and Temperateness in earth and air.'

23. 'The four of which colour is the first [Colour, Savour, Odour and Tangibility] may be produced in Earth [in earthy things] by maturation [a special conjunction of Heat], and they are then Transient. In others [in Water, Light and Air] Colour &c. are not produced by maturation. They are then

Eternal or Transient. When they reside in eternal things, they are Eternal; and when they reside in things not eternal, they are said to be Transient.'

24. 'That quality, which is the peculiar cause of the conception of Unity &c., is called Number. This resides in the nine substances. Reckoning from Unity, it is as far as a *Parârdha* [100,000,000,000,000,000]. Unity is both Eternal and Non-eternal. In an eternal thing, it is Eternal; and in a non-eternal thing, it is Non-eternal. But Duality &c., is everywhere Non-eternal.'

25. 'The peculiar cause of the conception of Bulk, is called Measure. It resides in the nine substances. And it is of four kinds;—Small, Great, Long and Short.'

26. 'The peculiar cause of the conception of distinct things is called Severalty. It resides in all the substances.'

27. 'The peculiar cause of the conception of conjoined things is called Conjunction. It resides in all the substances.'

28. 'That quality which annihilates Conjunction, is called Disjunction. It resides in all the substances.'

29. 'The peculiar cause of the conception of things Far and Near, is called Remoteness and Proximity. These reside in the four substances beginning with earth, [earth, water, light, air] and mind. They are of two kinds;—Made by Space and Made by Time. Remoteness made by Space is in that thing which remains in a distant place; and Proximity made by Space is in that thing which remains in a place near. In the person who is elder, there is Remoteness made by Time; and in the person who is younger there is Proximity made by Time.'

30. 'The quality which is the non-intimate cause of incipient falling, is called Weight. It resides in earth and in water'.

31. 'The quality which is the non-intimate cause of incipient trickling, is called Fluidity. It affects earth, water and light. It is of two kinds;—Natural [established by its own nature], and Adscititious [produced by some cause]. Natural fluidity resides in water; and Adscititious fluidity resides in earth and light. In earthy substances, such as butter &c., flui-

dity is produced by the conjunction of fire. In light, (it is produced) in gold &c.'

32. 'The quality which is the cause why particles &c. become a heap, is called Viscidity. It resides in water alone.'

33. 'The quality which is apprehended by the organ of hearing, is called Sound. It resides only in the ether. It is of two kinds;—Inarticulate and Articulate. In-articulate sound is produced by the instrumentality of a drum &c.; Articulate sound is that, which is in the shape of the Sanskrit or any other language.'

34. 'Knowledge, which is the cause of every conception (that can be put in words) is called Understanding. It is of two kinds;—Remembrance and Notion. The knowledge which is produced only by its own antecedence, is called Remembrance; and knowledge which is different from that, is called Notion. It is of two kinds;—Right and Wrong. Of whatever description anything is, when our idea of that thing is of that same description, it is called a Right notion; as, in the case of silver, the idea of its being silver. This is called *Prama* [commensurate with its object.] The supposing a thing to be as the thing is not, is called a Wrong notion; as, in the case of a shell, the notion of its being silver. This is called *Aprama*.'

35. 'Right notion is of four kinds, through the divisions of Perceptions, Inferences, Conclusions from similarity and authoritative Assertions understood. The efficient [peculiar] cause of those, also is of four kinds, through the divisions of Perception, Inference, Recognition of similarity and authoritative Assertion.'

36. 'Whatever thing, through its operating, is the cause, not common to all effects, of some given effect, that is the instrumental cause thereof. That which is invariably antecedent to some product, and is not otherwise constituted [is not by any thing else—except the result in question—constituted a cause] is the cause (of that product). That which annuls its own antecedent non-existence is called an Effect.

37. 'Cause is of three kinds, through the distinctions of Intimate, Non-intimate and Instrumental. That in which an effect intimately relative to it takes its rise, is an Intimate

cause; as, threads are of cloth, and the cloth itself of its own colour &c. Where this intimate relation exists, that cause which is associated in one and the same object with such effect or cause, is Non-intimate; as, the conjunction of the threads is the non-intimate cause of the cloth, and the colour of the threads, that of the colour of the 'cloth. The cause which is distinct from both of these is the Instrumental cause; as, the weaver's brush, the loom &c. are of cloth. Among these three kinds of causes, that only is called an instrumental cause which is not a universally concurrent cause or condition (of all effects as God, time &c. are).'

38. 'The Cause of the knowledge, called sensation is an organ of sense; knowledge produced by the conjuction of an organ of sense and its object, is sensation. It is of two kinds;—Where it does not pay regard to an alternative, and Where it does. The knowledge which does not pay regard to an alternative is that which involves no specification, as in the simple cognition that 'this is something that exists.' The knowledge which contemplates an alternative is that which includes a specification, as, 'This is *Dittha*,' 'This is *Brâhmaṇa*,' 'This is black."

39. 'The relative proximity of a sense and its object, which is the cause of perception, is of six kinds;—Conjunction, Intimate union with that which is in conjunction, Intimate union with what is intimately united with that which is in conjunction, Intimate union, Intimate union with that which is intimately united, and the Connection which arises from the relation between that which qualifies and the thing qualified. When a jar is perceived by the eye, there is (between the sense and the object) the proximity of Conjunction. In the perception of the colour of the jar, there is the proximity of Intimate union with that which is in conjunction; because the colour is intimately united with the jar, which is in conjunction with the sense of vision. In the perception of the fact that colour generically is present, there is the proximity of intimate union with what is intimately united with that which is in conjunction; because the generic property of being a colour is intimately united with the particular colour which is intimately united with the jar

which is in conjunction with the sense of vision. In the perception of sound by the organ of hearing there is the proximity of Intimate union; because the organ of hearing consists of the ether which resides in the cavity of the ear, and sound is a quality of ether, and there is Intimate union between a quality and that of which it is the quality.' In the perception of the nature of sound, the proximity is that of intimate union with what is intimately united; because the nature of sound is intimately united with sound which is intimately united with the organ of hearing. In the perception of non-existence, the proximity is dependent on the relatipn between a distinctive quality and that which is so distinguished; because when the ground is (perceived to be) possessed of non-existence of a jar, the non-existence of a jar distinguishes the ground which is in conjunction with the organ of vision. Knowledge produced by these six kinds of proximity is Perception. Its instrumental cause is Sense. Thus it is settled that an organ of sense is what gives us the knowledge called sensation.

40. 'The instrument (in the production) of an inference is a generalized Fact. An Inference is the knowledge that arises from deduction. Deduction is the ascertaining that the subject possesses that character which is invariably attended [by what we then predicate of it.] For example, the knowledge that, 'this hill is characterized by smoke, which is always attended by fire,' is a deductive application of a general principle; the knowledge produced from which, *viz.* that 'the hill is fiery', is an inference. Invariable attendedness is the fact of being constantly accompanied; as,—in the example 'Wherever there is smoke, there is fire [by which it is invariably attended]'. By 'the subject's possessing a character &c.,' is meant that in a mountain &c. there is present that which is invariably attended.'

'41. 'A general principle is of two kinds, in so far as it may be useful for One's self, and for Another. That which is employed for One's self is the cause of a private conclusion in one's own mind. For example, having repeatedly and personally observed, in the case of culinary hearths &c., that where there is smoke there is fire, having assumed that the concomitancy is invariable, having gone near a mountain, and be-

ing doubtful as to whether there is fire in it, having seen smoke on the mountain, a man recollects, the invariable attendance of fire where there is smoke. Then the knowledge arises that 'this mountain is characterised by smoke, which is invariably attended by fire'. This is called the Consideration of a sign. Thence is produced the knowledge that 'the mountain is fiery,' which is the Conclusion. This is the process in inference for One's self. But, after having, to the satisfaction of his own mind, inferred fire from smoke, when one makes use of the five-membered form of exposition for the instruction of another, then is the process one of inference for the sake of Another. For example :—

(1) The mountain is fiery ;
(2) Because it smokes ;
(3) Whatever smokes is fiery, as a culinary hearth ;
(4) And this is so ;
(5) Therefore it is fiery as aforesaid.

In consequence of the token here rendered, the other also admits that there is fire.'

42. 'There are five members of this syllogism ;—the Proposition, the Reason, the Example, the Application and the Conclusion. 'The mountain is fiery', is the Proposition; 'Because it smokes,' is the Reason ; 'Whatever smokes &c.,' is the Example; 'And so this mountain is,' is the Application; 'Therefore it is fiery', is the Conclusion.

43. 'The cause of an inference, whether for one's self or for another, is simply the Consideration of a sign ; therefore the *anumâna* [the cause of an inference] is just this Consideration of a sign.'

44. 'A sign is of three sorts ;—That which may betoken by its presence or by its absence ; That which betokens only by its presence; and That which betokens only by its absence. The first is that token which is possessed of pervading inherence both in respect of its association (with the thing which it betokens) and its absence (when the thing it betokens is absent) as, for example, 'smokiness' when 'fire' is to be proved. When it is said, 'where there is smoke there is fire, as on a culinary hearth,' we have a case of concomitant presence. When it is said, 'where fire is

not, there smoke also is not, as in a great deep lake,' we have a case of concomitant absence. The second is that token which has no negative instance, as when it is said 'the jar is nameable because it is cognizable, as cloth is,' there is no instance of nameableness or of cognizableness being present where the other is absent, because everything (that we can be conversant about) is both cognizable and nameable. The third is that token in regard to which we can reason only from its invariable absence. For example :—

(1) Earth is different from these (other elements);
(2) Because it is odorous ;
(3) Nothing that is not different from these is odorous;—as water ;
(4) But this is not so ;
(5) Therefore it is different from the other elements.

But if [in the third member of the argument] we had argued [affirmatively] that 'what possesses odour is different from the other elements,' we should have had no example to cite in confirmation, seeing that of earth alone can that property be asserted.'

45. 'That whose possession of what is to be established is doubtful is called the Subject ; as the mountain, when the fact of its smoking is assigned as the reason (for inferring the presence of fire). That which certainly possesses the property in question is called an instance on the same side; as the culinary hearth, in the same example. That which is certainly devoid of the property in question is called an instance on the opposite side ; as the great deep lake, in the same example.'

46. The five, that merely present the appearance of a reason, are:—That which goes astray; That which would prove the contradictory ; That where there is an equally strong argument on the other side; the Unreal; and the Futile. The alleged reason which goes astray, is that which has not just the one conclusion. It is of three kinds;—What would prove two much ; What belongs to none besides the individual; and the Non-exclusive .The fallacy falls under the first head, when that which is alleged as the proof may be present whilst that which is to be proved is absent ;—as for instance, if one should say, 'The moun-

tain is fiery, because it is an object of right knowledge,' [the reason assigned would be liable to this objection] because the being an object that may be rightly known is predicable also of a lake, which is characterised by the absence of fire. That (pretended token) which belongs neither to any similar instance nor to any one dissimilar, is one devoid of community. As, when one says, ' Sound is eternal, for it has nature of sound.' Now the nature of sound belongs to sound alone, and to nothing else, whether eternal or uneternal. The pretended argument, which can bring an example neither in support nor in opposition, is Non-exclusive. For example, should one say, ' Everything is non-eternal because it is cognizable,' there would be no example to cite, because ' every thing' (leaving nothing over) is the subject of the conclusion. A reason proving the reverse, is that which invariably attends the absence of what is to be proved. For example—suppose one should say, 'sound is eternal because it is created.' (We should reject his argument at once, because the fact of having been created implies non-eternity—the negation of being eternal). A counter-balanced reason is that along with which there exists another reason, which (equally well) establishes the non-existence of what is to be proved. As if one should argue, ' Sound is eternal, because, it is audible, as the nature of sound is (by both parties admitted to be),' (it might be argued, with equal force on the other side, that) ' sound is non-eternal, because it is a product, as a jar is.' An unreal reason is threefold,—whence there is not established the existonce of any such locality as that where the property is alleged to reside; Where the nature alleged does not really reside in the subject; and Where the alleged invariableness of concomitancy is not real. (As an example of) the fallacy of non-existent locality (suppose that one argues), ' The sky-lotus is fragrant, because the nature of a lotus resides in it, as in the lotuses of the lake'—here the sky-lotus is (alleged as) the locality (of the nature of a lotus,) and in fact it [the sky-lotus] does not exist. As (an example of) an argument where the nature does not really exist in the subject (suppose one were to argue), ' Sound is a quality, because it is visible'—here (every one would perceive at once, that) visibility does not reside in sound, for sound is recog-

nised by the hearing (not by vision). A reason, when there is an indispensable condition, is faulty as regards comprehensiveness. Such an indispensable condition is what always attends property to be established, but does not always attend what is brought forward in proof. Invariable attendance on the property to be established consists in the not being the counter-entity of the absolute non-existence, which has the same location as that which is to be proved. Non-invariable attendance on what is brought forward in proof consists in the being the counter-entity of the non-existence which has what is brought forward in proof. (Suppose it to be argued that), 'The mountain must smoke, because it is fiery'—in this case the contact of wet fuel is an indispensable condition. For, 'wherever there is smoke, there is the conjunction of wet fuel' —so that we have here invariable attendance on what is to be proved. But it is not true that 'wherever there is fire, there there is conjunction of wet fuel'—for there is no conjunction of wet fuel in the case of an (ignited) iron ball—so we have here non-invariable attendance on the proof. As there is thus its invariable attendance on what is to be proved, the contact of wet fuel is an indispensable condition for the sufficiency of the reason alleged. As it would require this additional condition (in order to prove that smoke must be present), fieriness (in the argument before us) is faulty as regards comprehensiveness. An argument is futile when the reverse of what it seeks to prove is established for certain by another proof. For example (it may be argued that), 'Fire is cold, because it is a substance. There coldness is to be proved; and its opposite, warmth, is apprehended by the very sense of touch. Hence the argument is futile.'

47. 'Comparison or the recognition of likeness, is the cause of an inference from similarity. Such an inference consists in the knowledge of the relation between a name and the thing so named. Its instrument is the knowledge of a likeness. The recollection of the purport of a statement of resemblance is the operation of that instrument. For example—a person not knowing what is meant by the word '*gavaya*,' having heard from some inhabitant of the forest that a *gavaya* is like a cow, goes

to the forest. Remembering the purport of what he has been told, he sees a body like that of a cow. Then this inference from similarity arises (in his mind), that 'this is what is meant by the word *gavaya*.'

48. 'A word [right assertion] is the speech of one worthy (of confidence). One worthy, is the speaker of the truth. A speech [sentence] is a collection of significant sounds; as, for example, 'Bring the cow.' A significant sound is that which is possessed of power (to convey a meaning). The power (of a word) is the appointment, in the shape of God's will, that such and such an import should be recognizable from such and such a significant sound.'

49. 'The cause of the knowledge of the sense of a sentence is the Inter-dependance, Compatibility and Juxta-position (of the words). Inter-dependance means the inability in a word to indicate the intended sense in the absence of another word. Compatibility consists in (a word's) not rendering futile the sense (of a sentence.) Juxta-position consists in the enunciation of the words without a (long) pause between each.'

50. 'A collection of words devoid of inter-dependance &c., is no valid sentence—for example 'cow, horse, man, elephant,' gives no information, the words not looking out for one another. The expression 'He should irrigate with fire' is no cause of right knowledge, for there is no compatibility (between fire and irrigation.) The words 'Bring—the—cow,' not pronounced close together but with an interval of some three hours between each, are not a cause of correct knowledge, from the absence of (the requisite closeness of) juxta-position.'

51. 'Speech is of two kinds;—Sacred and Profane. The former being uttered by God, is all authoritative: but the latter, only if uttered by one who deserves confidence, is authoritative; any other is not so.'

52. 'The knowledge of the meaning of speech is verbally communicated knowledge; its instrumental cause is language.

53. 'Incorrect knowledge is of three sorts, through the divisions of Doubt, Mistake, and (such opinion as is open to) *Reductio ad absurdum*. The recognition, in one (and the

same) thing possessing a certain nature, of several heterogeneous natures as characterising it, is Doubt. For example 'a post or a man.' Apprehending falsely is Mistake. For example, in the case of a shell, the idea of silver. *Reductio ad absurdum* consists in establishing the pervader [here supposed to be denied] through the allegation of the pervaded [here supposed to be granted]. For example, 'If there were not fire [which is denied,] then there would be no smoke [which is admitted.]'

54. 'Memory also is of two kinds;—Correct and Incorrect. Correct memory is that which arises from correct knowledge. Incorrect memory is that which arises from incorrect knowledge.'

55. 'What all perceive to be agreeable, is Pleasure.'

56. 'What appears disagreeable, is Pain.'

57. 'Desire means wishing.'

58. 'Aversion means disliking.'

59. 'Effort means action.'

60. 'Merit arises from the performance of what is enjoined.

61. 'But Demerit (arises) from the performance of what is forbidden.

62. 'The eight qualities—Understanding and the rest [Understanding, Pleasure, Pain, Desire, Aversion, Effect, Merit and Demerit] are distinctive of Soul alone.'

63. 'Understanding, Desire and Effort are of two kinds;—Eternal and Transient. Eternal in God, and Transient in mortals.'

64. 'Faculty is of three kinds;—Momentum, Imagination and Elasticity. Momentum resides in the four beginning with Earth, [Earth, Water, Light and Air] and in Mind. Imagination, the cause of memory, and arising from notion, resides only in the Soul. Elasticity is that which restores to his former position what had been altered. It resides in things like mats &c., formed of the earthy element.'

65. 'Action consists in motion. Throwing upwards is the cause of conjunction with a higher place. Throwing downwards is the cause of conjunction with a lower place. Contraction is the cause of conjunction with what is near the body. Expansion is the cause of conjunction with what is distant.

Going is every other variety. Action resides only in the four beginning with Earth [Earth, Water, Light and Air] and in Mind.'

66. 'Genus is eternal, one, belonging to more than one, and residing in Substance, Quality and Action. It is of two kinds;—Higher and Lower. The higher Genus (the *summum genus*) is existence. The lower Genus is such a one as Substantiality [the common nature of what are called Substances].'

67. 'Differences residing in eternal substances, are excluders (of each from genus of nature with the others).'

68. 'Intimate relation is Co-inherence. It exists in things which cannot exist separately. Two things which cannot exist separately are those of which two, the one exists only as lodged in the other. Such pairs are, parts and what is made up of the parts, qualities and the thing qualified, action and agent, species and individual, and difference and eternal substances.'

69. 'Antecedent non-existence is without beginning, and has no end. Such is the non-existence of an effect previously to its production. Destruction has a beginning, and has no end. (Such is the non-existence) of an effect subsequently to its production. Absolute non-existence is that of which the counter-entity is considered independently of the three times [past, present and future]. For example;—(Such is the non-existence in the instance where it is remarked that) there is not a jar on the ground. Mutual non-existence is that of which the counter-entity is considered with reference to the relation of identity. For example;—(Such difference is referred to when it is remarked that) a jar is not a web of cloth.

70. 'Since every thing is properly included under the categories that have been now stated, it is established that there are only seven categories.'

'This Compendium of Logical results was composed by the learned Annam Bhatta, in order to perfect the acquaintance of students with the opinions of *Kaṇâda* and of the *Nyâya*.'

INDEX.

*** The figures refer to the sections of the text.

अत्यन्ताभावः (अभावः)..... ६९
अधर्मः (गुणः) ६१
अनुपसंहारी (सव्यभिचारः)..... ४६
अनुभवः (बुद्धिः) ३४
अनुमानम् [लिङ्गपरामर्शः]
(प्रमाणम्) ४०
अनुमितिः (अनुभवः) ४०
अन्योन्याभावः (अभावः) ६९
अन्वयव्यतिरेकि (लिङ्गम्)... ... ४४
अन्वयव्याप्तिः ४४
अपक्षेपणम् (कर्म)... ... ... ६५
अपरम् (सामान्यम्)..... ... ... ६६
अपरत्वम् (गुणः)..... ... २९
अप्रमा [अयथार्थः] (अनुभवः)... ३४
अभावः (पदार्थः)..... ..... ८
अयथार्थः [अप्रमा] (अनुभवः) ... ३४
अयथार्था (स्मृतिः)... ... . ५४
अयुतसिद्धः ६८
अवयवः ४२
असमवायि (कारणम्) ३७
असाधारणः (सव्यभिचारः)..... ४६
असिद्धः (हेत्वाभासः) ४६
आकाङ्क्षा..... ..... ४९
आकाशम् (द्रव्यम्)..... १४
आकुञ्चनम् (कर्म)..... ६५
आत्मा (द्रव्यम्)..... ..... १७
आपः (द्रव्यम्)... .... १०
आप्तः ४८
आश्रयासिद्धः (असिद्धः)..... ४६
इच्छा (गुणः)..... ..... ५७
इन्द्रियार्थसंनिकर्षः ३९
उत्क्षेपणम् (कर्म)..... ..... ६५
उदाहरणम् (अवयवः) ४२
उपनयः (अवयवः)..... ४२
उपमानम् (प्रमाणम्) ४७
उपमितिः (अनुभवः)..... ४७
उपाधिः ४६
करणम् ३६
कर्म (पदार्थः)..... ४, ६५
कारणम् ३६
कार्यम् ३६
कालः (द्रव्यम्)... ... . १५
केवलव्यतिरेकि (लिङ्गम्). ४४
केवलान्वयि (लिङ्गम्)..... ४४
गन्धः (गुणः) २१
गमनम् (कर्म)..... ६५
गुणः (पदार्थः)..... ..... ३
गुरुत्वम् (गुणः)... ... ... ३०
तर्कः (अयथार्थानुभवः) ५३
तेजस् (द्रव्यम्) ११
दिक् (द्रव्यम्)..... ..... १६
दुःखम् (गुणः)... .... ५६
द्रवत्वम् (गुणः)..... ३१
द्रव्यम् (पदार्थः)... .... २
द्वेषः (गुणः)..... ..... ५८
धर्मः (गुणः)..... ६०
निगमनम् (अवयवः)..... ४२
निमित्तम् (कारणम्) ३७
निर्विकल्पकम् (प्रत्यक्षम्) ३८
पक्षः ४६
पक्षधर्मता..... ..... ४०
पदम्..... .... ४८
पदार्थः १
परम् (सामान्यम्)..... ६६
परत्वम् (गुणः)... ... ... २९
परामर्शः ४०

परार्थम् (अनुमानम्)..... ४१
परिमाणम् (गुणः)..... २५
पृथक्त्वम् (गुणः)..... ..... २६
पृथिवी (द्रव्यम्)... .... ९
प्रतिज्ञा (अवयवः)..... ..... ४२
प्रत्यक्षम् (प्रमाणम्)... ... ... ३८
प्रध्वंसः (अभावः)..... ६९
प्रमा [यथार्थः] (अनुभवः) ३४
प्रयत्नः (गुणः)..... ..... ५९
प्रसारणम् (कर्म)..... ... . ६५
प्रागभावः (अभावः)..... ..... ६९
प्राणः (वायुः)..... .... १३
बाधितः (हेत्वाभासः) ४६
बुद्धिः (गुणः)... .... ३४
भावना (संस्कारः) ६४
मनस् (द्रव्यम्)..... १९
यथार्थः [प्रमा] (अनुभवः)..... ३४
यथार्था (स्मृतिः)..... ..... ५४
योग्यता..... .... ४९
रसः (गुणः)..... २०
रूपम् (गुणः) १९
लिङ्गम् (हेतुः)..... ..... ४४
लिङ्गपरामर्शः [अनुमानम्]
(प्रमाणम्) ४१
वाक्यम् ४८
वायुः (द्रव्यम्)..... १२
विपक्षः ४९
विपर्ययः (अयथार्थानुभवः) ५३
विभागः (गुणः)... .... २८
विरुद्धः (हेत्वाभासः)..... ..... ४६
विशेषः (पदार्थः)..... ६,६७
वेगः (संस्कारः) ६५
व्यतिरेकव्याप्तिः ४८
व्याप्तिः ४०
व्याप्यत्वासिद्धः (असिद्धः) ४६
शक्तिः ४८
शब्दः (गुणः)..... ३३,४८
शाब्दज्ञानम् ५२
संयोगः (गुणः)..... २७
संशयः (अयथार्थानुभवः)..... ५३
संस्कारः (गुणः)... .... ६४
संख्या (गुणः)..... ..... २४
सत्प्रतिपक्षः (हेत्वाभासः) ४६
सन्निधिः ४९
सपक्षः ४९
समवायः (पदार्थः)..... ..... ७,६८
समवायि (कारणम्)... ... . ३७
सविकल्पकम् (प्रत्यक्षम्) ३८
सव्यभिचारः (हेत्वाभासः)... ... ४६
साधनाव्यापकः ४६
साधारणः (सव्यभिचारः) ४६
साध्यव्यापकः ४६
सामान्यम् (पदार्थः)..... ५,६६
सुखम् (गुणः)..... .... ५५
स्थितिस्थापकः (संस्कारः)... ... ६४
स्नेहः (गुणः)..... ३२
स्पर्शः (गुणः)..... .... २२
स्मृतिः (बुद्धिः)..... ३४
स्वरूपासिद्धः (असिद्धः)..... ४६
स्वार्थम् (अनुमानम्)..... ४१
हेतुः (अवयवः)..... ४२
हेत्वाभासः ४६

THE RA... MISSION
INSTI... OF CULTURE
LIBRARY

निर्णयसागर छापखान्यांतील विक्रीचीं पुस्तकें.

		किं. रु.	आ.	ट.आ.
संस्कृत				
श्रीमद्भगवद्गीता (फारच बारीक टैपानीं छापलेली)	...	०	५	॥
पंचरत्नी गीता (कित्ता)...		०	७	१
अध्यात्मरामायण (कित्ता)...		१	४	१॥
सप्तशती प्रयोगांसहित (कित्ता)...		०	५	१
विद्यारण्यस्वामिकृत अनुभूतिप्रकाश.		२	४	२
रामचन्द्रिका नाम शब्दरूपावलिः.....		०	४	॥
शिवतांडवस्तोत्र..		०	१	॥
रत्नसमुच्चय (यांत अनेक कवींच्या सुमारें ९०० म्हणी आहेत.)		०	२	॥
प्रश्नोत्तरपयोनिधि (हा संस्कृत शिकणाऱ्यांस उपयोगी आहे.)		०	४	१
ईसप्नीतिकथानां प्रथमो भागः.....		०	६	१
,, द्वितीयो भागः.....		०	६	१
अभिनवकादम्बरी...		०	८	१
मराठी.				
श्रीमंत प्रहिले बाजीराव पेशवे यांचें चरित्र.		१	८	२
विष्णुबावा ब्रह्मचारीकृत वेदोक्तधर्मविचार..... ...		०	७	॥
आनंदराव (मुलांस बोध व कर्मणूक होण्याजोगी गोष्ट).		०	१	॥
बालसंगोपन (लहान मुलांचें स्त्रियांनीं संरक्षण कसें करावें)		०	२	॥
दादोजी कोंडदेव आणि छत्रपति शिवाजीमहाराज. ...		०	६	१
आलफ्रेद धि ग्रेत ह्यांचें चरित्र. (वि० कों० ओककृत).		०	१०	१
साम्युअल जान्सन ह्यांचें चरित्र. (कित्ता)		०	७	१
श्रीएकनाथ महाराज यांचें चरित्र...		०	१२	२
कालिदासकृत रघुवंशाचें पद्यात्मक भाषांतर.... ...		२	०	३
सद्वर्तन (यांत नीतिशिक्षण उत्तम प्रकारचें आहे.) ...		०	१२	१॥
विद्यार्थी (हें पुस्तक मुलांस फार उपयोगी आहे.) ...		०	१॥	॥
मुलांचें कल्याण (कित्ता)		०	१॥	॥
महामारी (यांत महामारीचीं कारणें व ती निवारण्याचे उपाय सांगितले आहेत)		०	६	॥
पथ्यापथ्यविचार...		०	२	॥
ययातिराजाची कथा...		०	१	॥
विद्यार्थ्यांचा व्याकरणमित्र.....		०	१॥	॥

THE RAMAKRISHNA MISSION INSTITUTE OF CULTURE
LIBRARY
CALCUTTA